No. १४३४

Title चिन्तामणि प्रकाश:

Author म.म. रुचिदत्त:

Extent १६६ Age x

Subject न्यायशास्त्रं

प्रत्यादि

प्रत्यक्षचतुर्वचिंतामणि

न्याय

॥ श्रीमन्मंगलमूर्तये नमः ॥ कृष्णेतरच्छदपदाङ्कितांतरालमुक्तालनिभ्रमसितनुन्नपयोध
स्तनोर राय ॥ इष्टोऽस्तु दामसितविच्छिन्नतनोस्तुषुस्तरुषाशयनश्री क्लिष्टशिवंशिवायाः ॥१॥ अथास्य क
चिद्दत्तेन जयदेवाख्यगुरुरोः ॥ चिंतामणो ग्रंथमणोर्बकाश्रायप्रकाश्यते ॥२॥ प्रारिप्सि
तस्य प्रतिबंधकविघ्नविघातायकृतं नमस्कारं शिष्यान् शिक्षयितुं आदौ निबध्नाति गुणा
तीतइति। सत्त्वरजस्तमोलक्षणगुणातीत इत्यर्थः अपिशब्दो विरोधाभासाय इष्टोऽस्तु इति कृते छः
इच्छायागुणत्वमादाय विरोधस्तानं त्रिगुणसविवोज्ञाने छाडयस्तन्यानित्यर्थः अकारोकारम
काररूपस्याक्षरमयः ॐकारमय इत्यर्थः तन्मयत्वं च तद्वाच्यत्वेन वाच्यवाचकभावस
१२ बंधेन ॐकाररूपशब्दस्य गुणत्वेनात्मत्वाद्विरोधाभासः ४ त्रिमूर्तिः ब्रह्मविष्णुशिवात्मकमूर्तित्रि
तयवान् अत्र सन्निविशेषः अथ च मूर्तिः अवच्छिन्नपरिमाणयोगित्वं गुणातीतस्य न संभव ॥१॥

नीति विरोधाभासः। यद्वा। शरीरस्य कर्मात्मसंयोगमात्रस्य संबोध्यः। ननु तद्रसाख्यानार्थपेत्वव त्वलाभा
द्विरोधाभासः। रूपानिरूपाधिपरदुःखजहरणेच्छा। परमगातिरत्वं तर्हि नकर्ता। अपवपरमगतिः
परमज्ञानवानिति विरोधाभासः। एकः समानजातीयद्वितीयरहितः। एकत्वसंख्यावत्त्वमादा
य विरोधाभासः। पुरभिदे पुरनामकदैत्यभेदनकर्त्रे। एतेन लिङ्गानिवर्त[illegible] नक्षमत्वमस्य सूचि
तं। स्वनामग्रंथनाम च स्वकस्यनुवृ नये प्रदर्शयन्न स्यग्रंथस्य ग्रंथांतरापेक्षया वेलक्षण्यं प्रवृत्तं
गमाह। अन्वीक्षेति। अत्र न्यायशास्त्रभाष्याकरमतसिद्धांतसाराभिज्ञरूपनत्वं द्योतयन्निरा
सक्षमोऽन्यवाक्यमयत्वं प्रकर्षो दर्शितः। दीसोपदेशः। ग्रंथस्य तस्य चिंतामणिरूपनामधेय
करणो बीजभूतं मणिसादृश्यं दर्शयति। यतो मणिरिति। विपक्षेति। परव्यामोहनशक्ति
मणोरपि कुतोऽस्ति विपक्षसैन्यादौ किंचास्याहरीनमवत्। यतो मणिसादृश्यं बोध्यं।
स्वकृतेस्यं मंगलस्य व्यभिचारेण वैफल्यं मा भूदिस्युपोद्घातसंगत्यातस्य समाप्तिसा

॥२॥ धननतोऽप्यवस्थापयितुं प्रमिमारभ्यपतिः। इहेति। प्रसंगएवात्र संगतिरित्यन्ये। इहजगतीति। खल्वथवा
कचालंकारे। एकेवाकृता। आविर्भवतिपत्तिः। अन्तोऽप्यमन्त्रलकनाशंका निरस्ता। आरंभसमये।
नत्पूर्वसमये आचरन्ति विघ्नज्ञानवंत इति शेषः। मंगलेसमाप्तिसाधनत्वं नवेति विप्रतिपत्तौ पू
र्वपक्षमाह माहेति। नन्वेति। तत्र समासौ। नन्वेति किंनिरुविचारलयाअन्यहेतुकएवात्र संशयइत्या
हुः। प्रथमोद्दिष्टत्वेनपुरस्फूर्तिकतया प्रथमपूर्वपक्षमाशंक्यनिराकरोति। नान्वयेति। नान्वयव्य
तिरेकसहचारज्ञानसाध्यावाध्यक्षगम्येत्यर्थः। यद्यपि कारणतान्तरारीरप्रविष्टव्याप्तेरन्वयव्या
प्तितया नव्यतिरेकसहचारज्ञानापेक्षा। अन्वयसहचारज्ञानस्यत्वेन हिलंबेनतेज्ञानवि
लंबाभावात्। तथापि कारणाभावे कार्याभावत्व संशयो व्यभिचारसंशयत्वेन तदुहेम ॥२॥
तिबंधकइतितन्निवृत्त्यर्थं तत्र कार्याभावज्ञानमनुसरणीयमेव तदेव च व्यतिरेक
सहचारज्ञानमित्याहुः। वस्तुतस्तुउभयस्यापि सहचारस्यैकेनानुगतेन रूपे

रूपेणान्वयव्याप्तिग्राहकत्वमिति व्यतिरेकेण वक्ष्यामः॥ विनापीति तथा च व्यभिचारेण ग्राह्यकारण
त्वस्यासावनिश्चयेनान्वयसहचारेण न वा व्यतिरेकसहचारेण तद्ग्रह इत्यर्थः यद्यपि जन्मान्तरमंगळ
संशयात् व्यभिचारनिश्चयो नास्त्येव तत्संशयस्त्वविरोधी तस्य ग्राह्यसंशयपर्यवसन्नत्वेन प्रमा
णापरिपंथित्वात् तथापि तत्पक्षेण व्याप्तिग्रहेऽन्वयव्यतिरेकाभ्यां तादृशस्यापि तस्य प्रतिबंधकत्वं
अत एव व्यभिचारज्ञानमात्रस्य तत्प्रतिबंधकत्वमिति सिद्धांतः अन्योन्याश्रयादिति ग्रंथे जन्मान्तरमं
गळे व्यभिचाराभावे सति हेतुत्वग्रस्तद्ग्रहे च समाप्त्या तदनुमानमित्यर्थः ननु समाप्तेः कार्यतया सकार
णत्वेन परिशेषान्मंगळानुमानमस्त्वित्यत आह लोकेति तथा च न परिशेष इति भावः यद्यपि न केवलम
न्वयव्यभिचारः किंतु अन्यथासिद्धिरपीत्याह लोकेति अत्रानुमानमात्रं स्यान्निषेधति नापीति नापि परि
शेषानुमानेन कारणताग्रह इति योजना केचित्तु अपरिशेषानुमाने विशेष्यासिद्धिमुद्धर्तुमनुमाह मंगळे मान॥

3

सफलमिति सफलमनीष्टफलकमित्यर्थः नं तु बलवदनीष्टाननुबंधीष्टसाधनमित्यर्थः अर्थांतरा
पत्तेः विशेष्यासिद्धश्च परस्य तावतैव संभवात् नवेवं निष्फले कर्मणि व्यभिचारमरहितपरशिष्टपदेनेव व्य
भिचारवारणे हेतावविगीतपदवैयर्थ्यमिति शिष्टेति वाच्यं अविगीताचारविषयत्वस्य हेतुत्वं तरस्य स्व
रूपकत्वेन सार्थकत्वात् तथा च हेतौ निःफलजलताडनादेर्दानिषिद्धतया अविगीतत्वेन तत्र व्यभिच
रइति वाच्यं न वि ग्रहस्यादिना तत्रापि वेदनिषेधात् अन्यथा विशिष्टसाध्यकरणेपि न हेतुव्यर्थमेव
स्यात् न चात्र पक्षे इष्टोपायतांशे एवं व्यभिचारमरहितशिष्टपदार्थो वाच्यः तथा च निषिद्धकर्मणि व्यभि
चारवारणाय अविगीतपदमिति वाच्यं एवमपि प्रमादकृतमधुविषसंपर्कान्नभोजने व्यभिचारता
दवस्थ्यात् यत्तु शिष्टपदं वेदप्रामाण्याभ्युपगंतृपरं तदाचारत्वं यत्निषयनाचारत्वं तदनभ्युपग
मासंभावितावारत्वमिति यावत् तन्न बहुभिः सर्वैकवाक्यतया एवं च रात्रिश्राद्धादौ व्यभिचारवारणे ॥३॥

पाविभीतपदमितितथिंसंदैवाभ्यरणफलकेविहितेऽभ्यरसादोव्याप्तिबारइनिदिकू॥वस्तुतोविगीतप
दंकाचित्कंकल्पितीविशेषयारविषयत्वादिसेवहेतुःअतएवयत्र्यप्रकाशेयद्रुमानवरणेस्वधेयोल
मितिध्येयं।अन्यात्तत्वंचसर्वैकवाक्यतयासुमहैनत्हर्षमेवशाकीर्त्तनुमितगाकुःआयारभ्यसतिरेवल
षयत्वंचयघपिफलेपातिव्याप्तिवारस्तथापिसाध्यत्वेनकृतिविषयत्वेहेतुःफलेतद्हेशतयाकृतिविषयत्व
मितितत्वैतदानीमैगलावारसमपेअपेक्षितत्वेनेतिपैगलावारवहत्तेस्यकामनाविषयत्वेनोपस्थितत
भा०का०६ त्यादिस्यर्थःअतथात्वाचानियमेनोपस्थितत्वातथावान्येषांफलत्वानावेऽसिद्धपरिशेषानुमानेसम
नीतरापफलकत्वेसतीतिविशेषणंसिद्धमितिभावः॥ननुमानहदन्यनियातोपस्थितिःस्वर्गस्तुसकलका
मनाविषयत्वेननियतोपस्थितिकःफलंनचेद्दिस्यतआह॥विश्वजिन्न्यायेनेतियथाविश्वजितापजेते
स्यचविशेषतःफलोपस्थितिर्विनाविधेःप्रवर्तकत्वान्यथानुपपत्त्यापविशेषतःफलकल्पनीयेत्वामपश्वादि
नागौणप्रयोजनत्वयास्वर्गापवर्गयोरेवतथात्वेनतयोरप्यपवर्गस्याश्रावरूपतयालघुःस्वर्गएवफलत्वे

ल्पनेतद्दि हपीत्यर्थः गौरवादधिकारद्वयकल्पनागौरवात्र न त्वनुपस्थितकल्पनागौरवात् न्यामप्रत्या
दिसाधारणतयापृथक्शंकानुदयात् विघ्नजित्वस्वर्गफलकत्वे हि प्रधानतयाधिकारत्वे दृष्टस्यापि फ
ळकत्वेव मंगलस्यारब्धकर्मांगत्वेन प्रधानाधिकारकर्त्तव्यत्वेन अधिकाराभेद इत्यर्थः परिशेषानुमा
नेनेति मंगळं समाप्तिफलकं समाप्तीतराफळकत्वे सति सफळत्वादित्यनुमानेनेत्यर्थः न च गौरवेण
सफळत्वानुमितौ स्वर्गविषयत्वेपि न स्वर्गफळकत्वाभावसिद्धिः न कुतो हेतुसिद्धिरिति वाच्यं स्वर्गा
इति॰ न मंगळफळसमाप्त्यपेक्षया तस्य गुरुत्वात् गौरवलिंगे तात्पर्यादित्याहुः यत्तु समाप्तिमात्रफळकत्वेन
घवं अन्यफळकत्वे गौरवमिति लाघवज्ञानसंधानेन व्याप्तिसंधानोपनीतसमाप्तीतराफळकत्वमेव
सफळत्वानुमितौ विषय इति तेन समाप्तिफळकत्वास्यापि तत एव सिद्धौ परिशेषानुमानवैयर्थ्याप
त्तेः इतराफळकत्वे सति सफळत्वमेव हि समाप्तिमात्रफळकत्वमिति व्यभिचारेणाति व्यतिरेकव्यभिचारे
णेत्यर्थः तथा च बाध इत्यर्थः यद्यप्यत्र व्यभिचारनिश्चयो नास्त्येव तत्संशयस्त्वविरोधी संदिग्धेन्यायः च ॥४॥

वर्त्तत इति न्यायात्सत्युतानुगुणोऽन्यथा वेदोपि मूकः स्यात् अयोग्यतासंज्ञायांत्त्वनस्य त्वा॰१
वेदत्तुकूलत्वं नदिक्षापि तुल्यं तथाप्यंधपरंपरा[illegible]पानन्निया प्रकारांतरोपपादने अत
एव श्रुत्येनुमाना स्यामिति अग्रेतत्रापि संमतिमाहेन्नि तथाविधेति श्रुत्यनुमानेव मंप
त्वं वेदमूलकं अलौकिक शिष्टाचारविषयत्वाद्दर्शितत्र अत्रलौकिकत्वं त्राद्य तदुप
पजीविप्रमाणातिरिक्त प्रमाणप्रमापितत्वं वेदनीष्टानुबंधीष्टसाधनत्वेतद्धि ताक॰ ५
तत्वं च अलौकिकत्वं एतच्च भोजनादौ व्यभिचारवारणाय अगम्यागमनादौ व्यभि
चारवारणाय शिष्टपदं अत्यंतपरं तद्ग्रहणं च सामान्यतो महाजनपरिग्रहादिति
बोध्यं केचित्तु अविगीतालौकिके शिष्टाचारविषयत्वादिति हेतुः शिष्टपदं येष्टसा
धनतां त्रोत्थमरहितपरं निष्फलं जलताडनादौ व्यभिचारवारणाय नच तस्य विगि

5

तत्वादेव न व्यभिचार इति वाच्यं विगीतत्वं हि वेदनिषिद्धत्वं तच्च नत्र नास्ति सर्वथा दृष्टफ
लत्वेन तत्र प्रसंगात्। न चात्र वैदिकनिषेधासंभवात्र निषेधस्य कथंचित्साक्षाद्विषय
त्वनियमात्र न च लौकिकत्वादेव तत्र न व्यभिचार इति वाच्यं लौकिकत्वं हि अन्वयव्यति
रेकादिप्रमापितबलवदनीष्टाननुबंधीष्टसाधनत्वं न च तत्र तत्र दृष्टादृष्टफलत्वा ताक ४
त्। अविगीतपदेनागम्यागमनादौ व्यभिचारवारणाय न च विशिष्टपदादेव तन्निरासः
तत्रापि सुखजनकत्वेनोक्तरूपविशिष्टाचारविषयत्वसत्त्वात् इत्याहुः। तन्न प्रमादकृ
तमधुविषसंपृक्तान्नभोजने गळलग्नतया मरणसाधने सुखधर्मानैव व्यभिचारा
त्। न च प्रमापितपदस्थाने बोधितपदकरणेऽलौकिकपदेनैव तद्व्यभिचारवारणमिति वाच्यं
अगम्यागमनादौ तेनैव व्यभिचारवारणेऽविगीतपदवैयर्थ्यापत्तेः। न च रागविभ्रमादौ व्यभिचारः ॥ ५॥

रवारणायनत्विति वाच्यं। तस्यनिःफलत्वेनशिष्टपदादेवतद्वारणात्। निःपरिपंथीति। अयोग्यता:
संज्ञायोनविरोधीतन्निम्भयोनास्येवेतिभावः। नचनाहशावेदस्यनानाप्रकारकत्वसंभवात्विशे
षतोव्याप्त्यभावेनविशेष्यानुमानात्सामान्यतोऽनुमितोवेद आनर्थक्यादिविशेषविशिष्टत्वेनाप्र
तिसंहितःकथमिदानीमिंगळस्यसमाप्तिसाधनतांबोधयिष्यतीति वाच्यं।। नह्यनुमितोवेद इदानीमे
वबोधयतीतिब्रूमः। किंतुप्रत्यक्षतादृशार्थायस्तद्बोधकःसइदानीमनुमीयते। इदानींचशिष्टाचार
विषयत्वरूपलिंगेनतज्ज्ञानं।। किमर्थंतर्हिवेदानुमानेस्वतंत्रप्रमाणमूलकत्वेनाप्रपरंपराशंकानि
रासायेत्यादिग्रन्थखंडेस्फुटं।। तत्रापीति। इदंत्वनुमानेसौकर्याद्युक्तंनत्वनुमानाभावेपिशब्देनतज्ज्ञान
कताबोधनेबाधकाभावात्। नचव्यभिचारज्ञानाभावार्थंतद्विशेषादेवतद्भावादिसाफल्यं। ननुमंग
ळेऽपिगंगयादिनदाऽधिकार्येकलाघवेनदेवकुतइत्यतआह। नवेदमिति।। ग्रंथादिसमाप्तिरूपफळजन

6

कावांतरवाक्यरचनादिरूपकर्मांगमित्यर्थः। कर्मार्थिनयेति। कर्मनिष्पत्त्यर्थिनयेत्यर्थः। एतच्चारंभ
णीयायां व्यभिचारवारणाय। शिष्टेरन्नीतेरित्यर्थः। इदं च यानेनांगत्वं च मेण प्रधानार्थितया
क्रियमाणेऽनंगत्वे तेकर्मेति व्यभिचारवारणाय। प्रधानस्यापि प्रधाननिष्पत्त्यर्थितया क्रियमा
णत्वात्तत्र व्यभिचारवारणाय तत्सर्वमिति। तत्कालान्यकाल इत्यर्थः। ननु तद्धागत्वावच्छिन्नका
ल इत्यर्थः। उत्तरांगे साध्यसत्वेन शास्त्रस्य व्यर्थत्वादिति। यत्तु पूर्वांगित्वमेव साध्यं तथा चोत्तरांगे
व्यभिचारवारणाय तत्सर्वमिति तन्न। पूर्वांगित्वसाधनस्यार्थान्तरत्वात्। अंगत्वमात्रस्यैव प्रकृतोपयो
गित्वादुक्तेनैवोपपत्तेः। न चानेककरणात्मकदर्शादेः प्रधानस्य प्रथमकरणत्वागे व्यभिचार इति
वाच्यं तत्सर्वमित्यत्र यावन्ति प्रधानत्वं बिभ्राणानि तत्सर्वस्य विवक्षितत्वात्। ननु घटार्थितया
घटस्य पूर्वं दण्डो विधीयते चेन्न घटे जाते दण्डो गमिति चेन्न चेदबोधितत्वे तेन तदर्थितया शिष्टस्तत्स
र्वं क्रियमाणत्वादिरचनासंपत्तेः। न च तस्यांगत्वमिष्टमेवेत्यप्याह। फलांतरानाव इति॥ प्रधा ॥६॥

नत्वाभिमतफळत्वेनयदभिमतंतंनदन्यफळो हेत्वे नाक्रियमाणत्वेसतीत्यर्थः। तेनमंगळीकृ
तनमस्कारादीनांफळांतरप्रभुत्वेरिदमसिद्ध मितिपरास्तं॥ मंगळीकृतनत्यादिविशेषणेन
फळांतरमितियथाश्रुतएवहेतुरित्यप्याहुः। फळांतरवतिआरंभणीयादौव्यभिचारवारणायस
त्यंतं। चैत्यवंदनादिनियतपूर्वंक्रियमाणेव्यभिचारवारणायफळवदिति। चैत्यवंदनादिकमफळ
मितिमतावेः। नचतत्रतस्यांगत्वमेवफळवत्संनिधावफळंतदंगमित्यादिनाफळवत्कर्मान्वित
स्यैवअफळस्यांगत्वव्यवस्थापनात्। प्रधानत्वाभिमतपूर्वकेनचित्वअंगत्वक्रमेणकृतेनिष्फळेक
र्मणिव्यभिचारवारणायनियमतइति। प्रधानेकर्मणिव्यभिचारवारणायतत्सर्वमिति। ननुव्यतिरेके
स्पयानियमविवक्षायांउक्तएवव्यभिचारः। जात्यपेक्षयानियमोक्तौस्वरूपासिद्धिः। ग्रंथारं
भसमयेपिकैश्चिन्मंगळाकरणस्यसंभवात्॥ आरंभणीयांअज्ञानवतोविनापिकेचिदकर नार
णेनव्रताहज्ञानियमगर्भहेतुत्वभावेसत्संतवैयर्थ्यापत्तेश्चेतिचेत्॥ अत्राहुः॥ नियमतइत्यस्य

वेदबोधितत्वे सतीत्यर्थः। तथा च फलांतराभावे सति वेदबोधितत्वे सति फलवत्कर्मारिप्समाने नक्रियमा
णत्वादित्येको हेतुः फलांतराभावे सति वेदबोधितत्वे सति तत्सर्वं क्रियमाणत्वादित्यपरो हेतु
रिति हेतुद्वये तात्पर्यं। न चाद्यहेतौ प्रधाने व्यभिचारः तद्धि कर्मारिप्समानस्य न कार्यं किंतु कर्म कुर्वा
णस्येति तत एव तद्व्यभिचारवारणादिति। न चोत्तरहेतावंगांगे व्यभिचारस्तस्याप्यंगत्वादिसाकुस्।
तदन्यत्वेन विशेषणान्नोक्तदोषद्वयमन्ये। प्रथमहेतौ प्रथमविशेषणासिद्धिं परिहरति। आचारेति
आचारानुमानमेव मानत्वेनाभिमतं तस्य च स्वतंत्रप्रमाणमूलकत्वोपदर्शनाय श्रुतेरुपादानीइ[illegible]म
नीमनुमितायास्तस्या अर्थप्रतिपादकत्वात् इति ध्येयं। वादिभेदेनोत्तरयोपन्यास इति केचित्। द्वि
तीयहेतौ विशेषणासिद्धिं परिहरति। तत्फलत्वेति समाहितफलकत्वबोधनादित्यर्थः। उत्तरहेतौ प्रथ
मविशेषणप्रयोजनं दर्शयति। [illegible]दर्शेति। अत्र स्वरूपासिद्धिं बाधं चाशंकते नन्विति। यत्तु मंगलेनांगं
अलौकिकत्वादिति विरोधं शंकितमिति तन्न। विश्वजिन्न्यायात्स्वर्गः फलमिति तदुत्तरग्रंथविरो ॥८॥

धात्। नच सिद्धेन प्रतिरोधस्तत्र व्यक्तत्वाभावात्। लौकिकेति। आरब्धकर्मणीत्यर्थः। नन्वेवं मंगल
स्याकारणत्वेऽर्थ ध्वर्गीथाघ्कसत्तिः कथमित्यत आह लोकेति। आरइति लोहकोळे इत्यर्थः। मदहर
थादिवक्ळइत्यन्ये। इंद्रबाहुलौहिकाकः। आरंभेति आरंभसमयनियतकर्त्तव्यताकत्वमित्यर्थः। न
तु नैमित्तिकमेव प्रकरणप्रस्ययाप्यवणात्। न च मंगलाचारयुक्तानामित्यत्र प्रयतात्मनामित्या
दिना विनिपाताभावपदेन प्रत्यवायाभावप्रदर्शनमिति वाच्यं। तच्च मंगलपदस्य आदर्शादिदर्शना
दिपरत्वात्। तस्येति। अलौकिके लौकिके चांगमित्यस्येत्यर्थः। अलौकिकस्य लौकिकांगत्वे लौ
किककर्मसहकारित्वेनोपकारजनकत्वं तत्रैश्च स्वयंतु न लौकिककर्मसहकारितत्साकल्येऽस्य
सत्त्वं विना कार्यव्यतिरेकाभावात्। तेन अपूर्वजनकमेव अलौकिके कर्मणि लौकिकांगं नत्वन्याह
इंगमपीति भावः। अन्याहृशत्वमेव दर्शयति। अयंत्विति। मंगलजन्य इत्यर्थः। ननु तथेति न लौकिकावग
तकारणसहकारीत्यर्थः। तथा च तद्रूपोपकारजनकस्यैव परं लौकिकांगत्वमिति भावः। न च पुत्रेष्या

घसर्वस्यलोकावगतकारणसहकारित्वमेवेतिवाच्यं।नहिन्नेस्तुकेनियमस्यविवक्षितत्वात्इत्य
र्थः।नचिंद्रबाकुर्बंधनवन्मंगळस्याप्यसर्वस्वपापकारजनकत्वमेवनतुकथमस्यापिलौकिकीगत्य
मित्यतआह।विघ्नेति।यदापसंगादाहविघ्नेति।सतीतिननुविघ्नेसतिअसर्वद्वाराइदमंगमि
तिनोक्तव्यभिचारः।इत्यपिसुवचं।किंचोत्रमतेजन्मांतरीयस्यापिमंगळस्यसमाप्तिहेतुत्वा
न्मंगळजन्यादृष्टव्यतिरेकोदुर्ग्रहइतिचेन्न।नह्यसर्वविघ्नंविनादृष्टारब्धसमाप्तिजनकम
विनाश्रेयवानोत्यः।असंभवान्नहिसमाप्तिप्रति बंधकेसतिकुतोपिकर्मसमाप्तिसंभवः
नोघः।विघ्नध्वंसस्यावश्यकत्वेनतस्यैवद्वारत्वोचित्यात्।नत्वंतराससर्वज्ञनयित्वातद्वाराविघ्न
ध्वंसोद्वारंगौरवादितिभावः।कल्पेतियद्यप्येवंलाघवात्तचाप्यसर्वमेवद्वारंस्यान्नविघ्न
ध्वंसः।तथापिउक्तयुक्त्यावश्यकत्वइत्यादिनावक्ष्यमाणयुक्त्यावश्यमानिकेगौरवमितिभा
वः।विघ्नाभावएवेति [illegible] अन्यथाविघ्नज्ञानव[illegible]यस्यापिमंगळाचरणध्रसंगइतिभावः॥मु॥ ७॥

तितएवेति।निर्विघ्नसमाप्तिकामोमंगलमाचरेदितिकल्पनीयवेदादित्यर्थः।सर्वत्रैककर्त्तृत्वेव्यापारद्व
कल्पनीयोऽनुशासद्इतिभावः।नद्वारएवेतिनद्वारोपस्थितिरित्यर्थः।तज्जन्यत्वेसतितज्जन्यज
नकत्वरूपस्यद्वारत्वस्यक्लृप्तवेदादनुपस्थितेरितिध्येयं।ताहशाचारानुमितताहशवेदाद
पितदनुपपत्तिस्ततएवेत्यप्याहुः।किंचेति।लौकिकारब्धकर्मांगत्वंचसाधितमेवेतिभावः।विघ्नध्वंसस्य
द्वारत्वेबाधकमाशंकतेनन्विति।अत्रविघ्नज्ञानमधिकारइतिनविवक्षितंतथासतितज्ज्ञानस्यप्रव
र्त्तकतापत्तेः।अपिमग्रंथपर्यालोचनयास्वरूपसतएवप्रवर्त्तकत्वनिश्चयात्।किंतुविघ्नज्ञानवा
न्यःसमाप्तिकामःसएवात्रअधिकारीतथाचविघ्नज्ञानवतःसमाप्तिकामनाऽधिकारइत्यत्रतात्प
र्यं।केचित्तुविघ्नज्ञानवान्प्रवृत्तिमान्समाप्तिकामोऽधिकारीबोध्यतइत्यर्थइत्यप्याहुः।प्रायश्चि
त्तइति।तत्रनिष्प्रत्यूहपरस्यैवप्रवर्त्तकत्वंनतुतज्ज्ञानमात्रस्येत्यर्थः।विरोधादिति।फलजनकत्वस्या
धिकारतयाधिकारत्वंप्रतिबंधकत्वंचेतितद्भावमित्यर्थः।सावेति।यद्यपिकामनास्वरूपसतीप्रवर्त्तिका

न तु निश्चितानां तथापि कामनाभिलाषं विना काम्यकर्मानिर्वाहात् कामनाज्ञानस्य तत्रोपयोग इत्या
9 शुः। लाघवादधिकारनिश्चयत्वेनान्यत्र प्रवर्तकत्वावधारणात् अस्याश्चाधिकारत्वात्तन्निश्च
योपि प्रवर्तक इत्यन्ये। विघ्नध्वंसे नेति। प्रधाने पूर्वोक्तविरोधादधिकाराभावेनांगेपि तथात्वादिति भा
वः। एतेन मंगलं ज्ञाताधिकारकर्तृकमित्यपि निरस्तं व्यभिचारमाह। क्वचिदिति। न केवलं नाशसं
शये मंगल एव प्रवृत्तिः किंत्वन्यत्रापीत्याह। अपि चेति। प्रायश्चित्ते च न तत्संशये प्रवृत्तिः। तथैव
विधिबोधनादिति भावः। किंचेति। विघ्नसंशये विघ्नध्वंसविशिष्टसमाप्तिरूपफलसंदेहो न प्र
वृत्तिप्रतिबंधक इत्यर्थः। न च वैदिके फलनिश्चयादेव प्रवृत्तिरिति वाच्यं। श्येनाभावात्तु मि
स्फ्या१३ तवेदनसंशयेपि न हि बोधनादिति भावः। श्लिष्टेत्याधिकरणाविरोधमात्रीकतेन न चेति। ननु स्पष्टा आ
श्लिष्टेत्यद्धोपमज्यादिष्वावेत्युक्तमाय न रूंनिर्वपेदित्यादिनाविहितस्पष्टा श्लिष्टेज्या दे
दर्शपूर्णमासप्रकृतिकत्वेन प्रकृतिवद्विकृतिः कार्येत्यतिदेशप्राप्तदेवधर्मग्रहेन दंगदेवता ॥९॥

वाहनस्य सर्वदिने ऽननुष्ठानमित्यर्थः। अत्र द्वारपदं प्रहृत्योपयियं परे आश्लेषस्य निमित्तत्वेन
द्वारत्वाभावात्। अत एव दृष्टान्तदार्ढ्यं इति कयोर्न वैश्रीस्म्यं। मध्यवर्तित्वसाधर्म्येण द्वारत्वे किंचि
त्स्यान्ये। प्रसक्तस्याप्यननुष्ठाने दृष्टान्तमाह। यथेति। व्रीहीनवहन्तीत्यत्र व्रीहिपदस्य यवादि सा
धारण्यार्थं अजहत्स्वार्थलक्षणया नियोगसाधनीभूतद्रव्यमात्रपरत्वे कृष्णलेष्वपि प्राप्तेरिति
स्तुत्या नियोगसाधनत्वेन बोधितकृष्णलस्यावघाते प्राप्तेऽपि वैतुष्यद्वारबाधेऽवघातानन्नुष्ठा
नं यथोक्तं तथाश्लेषद्वारसंज्ञापेप्यतिदेशप्राप्तदेवतावाहनाननुष्ठानं इत्यर्थः। एतेन कृष्ण
ले द्वारबाधे ऽहनुनसंज्ञाय इति वैषम्यमित्यपास्तं। प्राप्ताननुष्ठानोक्तिमात्रे दृष्टान्तत्वात्। व्य
तिरेकज्ञानविषयतया समानत्वेन दृष्टान्तत्वमित्यन्ये॥ कृष्णलः सुवर्णमाषः। ननु नियोगसा
धनीभूतसतुषद्रव्यत्वेनैवाजहत्स्वार्थलक्षणास्तु तथा च कृष्णलेऽप्रसंग एव ननुवाधेऽत

10

स्य प्रसंगः सर्वत्वादिति चेत् ॥ अत्राहुः ॥ व्रीहिभिर्यजेत व्रीहीनवहन्ति व्रीहीन्प्रोक्षति इत्यत्र यागा
वघातप्रोक्षणानां सामानाधिकरण्यमनुभूयते तत्र तुल्यप्रकारोपस्थितिं विना न संभवतीत्ये
कप्रकारोपस्थितिर्निर्वाह्या ॥ न च प्रोक्षणादावपि सानुष्ठीतैव्रमित्येकत्रसा ऽनुष्याप्रवेशोऽवघा
तेऽपि न तत्प्रवेशः इति प्रसंगसंभव एवेति ॥ यत्तु आश्लेषो न द्वार इत्यपरितोषाद्बीजमुक्तं एव
द्वितीयदृष्टान्तोऽयं यथेति ॥ तन्न ॥ तथा सति सिद्धान्ते द्वितीयदृष्टान्तवैषम्यस्याप्युपदर्शनप्रसंगात् ॥
नहि नैमित्तिके होत्रादिना द्वितीयदृष्टान्तस्य किंचिद्दूषितं ॥ अत एव यथा वेति क्वचित्कः पाठः
ग्रामादिक इति विलोचपाम ॥ अत इतीति तथा च प्रवृत्त्यौपयिकस्याश्लेषसंदेहे पर्यवाह ना
ननुष्ठाने तथा प्रवृत्त्यौपयिकविघ्नसंदेहे मंगलाननुष्ठानं स्यादित्यर्थः ॥ प्रवृत्त्यौपयिकसंज्ञाया
त्वाविशेषेऽपि निमित्तसंज्ञायते नाश्लेषसंज्ञायस्य प्रतिबंधकत्वे विघ्नध्वंससंज्ञायस्य फलसं
पर्यवसन्नतया शिष्टाचारानुमितश्रुत्या विघ्नज्ञाने च तत एव मंगलविषयप्रवृत्तिबोधनाच्च ॥ ॥१०॥

नश्यति बंधकत्वमित्याशयेनाह। नैमित्तिकेहीति। नित्य इति। पद्यपूपपदविभक्तेः कारकविभक्तिर्बली
यसी तथापि नेदस्याधिकरणत्वासंभवान्निमित्तसप्तम्येवेति तद्धेतुनिमित्तवानधिकारीत्यर्थ इत्याहुः
आश्लेषनिश्चयाभावादित्यत्र निश्चयग्रहणं अधिकारनिश्चयार्थं। यत्तु वस्तुतो निश्चयपदमयुक्तं अ
धिकाराभावस्यैवसंभवादिति तन्न। स्वरूपतोऽधिकाराभावस्य प्रवृत्त्यप्रतिबंधकत्वात्। अग्रिमदिने स्पर्शा
श्लेषो यत्र तत्राधिकाराभावासंभवाच्च। अपि चेति। नन्वेवं क्षयाह निमित्तकश्राद्धादावपि सर्वदिने नि
रामिषत्वोऽजनादेरंगस्याननुष्ठानं स्यात् इति चेत् न। न च तादृशसंशये प्रागुत्पन्नेऽपि तत्कर्त्रादिना मानस
कर्तव्यतानिश्चयादित्याहुः। केचित्तु आशौचादिसंदेहाधीनकर्तव्यतानिश्चयाभावातिरिक्तस्थ
ले निश्चयो हेतुरित्याहुः। ननु यत्राप्तवाक्यादिना सर्वदिने तत्र कोश्लेषनिश्चयस्तत्रावाहनप्रसंग इति
चेत्। इष्टापत्तेरिति केचित्। न च संज्ञापस्थले तदकरणे कथं यागसिद्धिः रंगहानेरिति वाच्यं। नित्यवन्नै
मित्तिकेपि किंचिदंगहानावपि फलसिद्धेरित्येके। संज्ञायेन कर्तव्यतायाज्ञानेवान्नतस्यांगत्वमित्यपा

कुश। स्पष्टाश्लेषोत्तरमपि कथं नावाहनमिति शिष्यजिज्ञासायामाह। स्पष्टाश्लेषे सतीति। न च नित्ये किंचिदे
ग हानिवदत्रापि सर्वदिनांगबाधेपि नैतस्यादिति वाच्यं। कालांतरस्याविदितत्वाविशेषे विनियं तु मन्त्रस्य
त्वात्त्यागे किंचिदंगहानावपि कर्मनिष्पत्त्यभ्युपगमेन तत एव यागनिष्पत्तिसंभवे प्रयत्नगौरवाच्चेति
न्तावः। मीमांसेत्यिति। स्वर्हात्तिविघ्नज्ञानवान्नसमाप्तिकामोऽधिकारीत्यर्थः। ननु नैमित्तिके निमित्तास
त्त्ययवानधिकारी तत्कथं विवाहनिमित्तसंस्कारे नैमित्तिकस्याभ्यनुष्ठानमत आह। तद्विषयादितिप
आचारादिति। इदानीं प्रत्यक्षवेदाभावेन तादृशाचारानुमितश्रुत्या विवाहज्ञानेवान्फलकामोऽ
धिकारी बोध्यत इत्यर्थः। एतेन विवाहज्ञानस्याधिकारत्वेन ज्ञानस्य प्रवर्त्तकतापत्तौ गौरवमिति प
रास्तं फलकामनयाएवाधिकारत्वात्॥ तथा च विवाहातिरिक्तस्थले नैमित्तिके हीत्याहि हृदयं। त
द्वेदमित्यत्र व्यापकानुपलब्धिबाधमात्रांकने नाचेति। प्रधानेति। प्रधानकर्तव्यताबोधकविध्येकवा
क्यतापन्नत्राद्बोध्यकर्तव्यताकत्वमित्यर्थः॥ समाप्ताविति। समाप्तिस्थल इत्यर्थः। ननु प्रधानकर्तव्यतादौ ॥११॥

धकप्रमाणापेक्षितशाब्दबोध्यकर्तव्यताकत्वमेवांगत्वेनं चैन्न तु नाहंश प्रमाणस्य विधित्वमपि विवक्षितं
गौरवात् तच्च प्रकृतेप्यस्तीत्याशंक्य निराकरोति। नचेति। शास्त्रीयशाब्द॰ एकदेशोपेक्षणीयः। तस्य लौकि
कप्रमाणस्य निरपेक्षितत्वात् शास्त्रमनपेक्ष्यैव कर्तव्यताबोधकत्वसंभवात्। अपूर्वेति। तथा चांगत्वमात्रं शा
वैदिकांगत्वं वा न प्रधानविधिविधेयत्वव्याप्यमिति भावः। आचारेति। यद्यपि श्रुत्यानांगत्वं बोध्यते तथापि
स्मृत्या कारणं च बोधाद्यर्थादंगत्वमवगम्यते इति भावः। उक्तयुक्त्यापि गौरवेण विधित्वं त्याज्यमित्याह प्रधा
नेति। प्रधानकर्तव्यताबोधकमानापेक्षणीयमानबोध्यकर्तव्यताकत्वमित्यर्थः। नैरपेक्षितत्वादिति। वि
घ्नध्वंसकारणीभूतमंगलकर्तव्यताबोधकशाब्दसापेक्षत्वादित्यर्थः। यागादिवदिति। अत्र विशेषविधिं वि
नेति विशेषः। तेन नाधिवासनादेरंगत्वविरोधः। केचिद्यागादीति पाठः। तत्र यागादिप्रधानमित्यर्थः। अत्र मु
नेर्जन्मांतरीयमंगलस्यापि हेतुत्वात् तस्य न व्यभिचार इति भावः। असाधारणेति। असाधारणत्वमात्रं योगा
गभूतासनप्राणायामादौ अतिव्याप्तं बंधनकेत्वमाचं शिखाबंधनस्य मंत्रविशेषविशिष्टशिखायाः एवांगत्वादस्त्वि व१

रत्वेनासर्वजनकर्तृत्वात्प्रधानकालान्वयाज्ञानञ्च व्यभिचार इति विशिष्टनियमः॥ न च विशिख इति श्रवण
सदा बद्धशिखेन चेति श्रवणेन च शिखायाः अङ्गत्वप्रतीत्या तस्याश्च परमापूर्वसिद्धिकालाव[...]तन
(नथा लेस) पानापूर्वद्वारांगत्वमिति वाच्यं। शिखायाः प्रधानकालान्वयनियमे ऽनेवेत्यमिमग्रंथविरोधात्। तथा च
यस्य प्रधानकालान्वयस्तस्यांगत्वमिति न शिखायास्तथात्वं किं तु कर्तुरेव। न चैवमदृष्टो सत्यनंतरम
पि शिखाधारणस्यावश्यकत्वापत्तिः॥ कर्मांगीभूतशिखाबंधनक्रियायास्तावतानिर्वाहेऽपि प्रधान
भूतसार्वकालिकशिखाधारणस्यानिर्वाहात्। अन्यथा शिखाया एव द्वैरूप्यानुपपत्तेः फलानेरसत्वास
त्वयोः प्रधानागभावप्रयोजकयोरेकत्रासंभवात्। न च द्वैरूप्यानुपपत्तिरिष्टैवेति वाच्यं। अपसिद्धांता
दित्याहुः। केचित्तु विशिख इत्यादिश्रवणेन शिखाया एवांगत्वं तस्याश्च न प्रधानकालान्वयः॥ न द्वन्च
यित्वं हि प्रधानकालसमाप्तकालसन्निकृत्वं प्रधानकालमात्रान्वयित्वं वा न पाच नोत्तरग्रंथविरोधः
प्रतिभावः। न चैवमसर्वजनकत्वमात्रएवनियमोस्तु शिखायाः स्थिरत्वेनासर्वोकत्वनादिति वाच्यं। अ ॥१२॥

धिवासनादेर्व्यभिचारात्॥ ननु तस्यासाधारण्यादोषतादवस्थ्यं॥ विशेषविधिं विनेत्यनेन दर्शितत्वेना स्य।
सिद्धत्वादित्याहुः॥ देवतायतिति॥ प्रमाणान्तरादिति। तथा चापूर्ववत्त्वे परं निरुक्तपदानुष्ठानमुपपद्यतेऽ
नि तावः॥ विघ्नज्ञानवत्त्वमिति। तथा च स्वतः सिद्धदुरितानावावगतौ मंगलाननुष्ठानमिष्टमेव
वस्तुतोऽपूर्ववत्त्वे न चापि तदनुष्ठानापत्तिः स्यादिति भावः॥ प्रमत्तेति॥ ननु सति विघ्ने तद्ध्वंस
द्वारा तस्यांगत्वादिति निर्बंधपर्यालोचनया विघ्नस्थलीयसमाप्तित्वावच्छेदेन हेतुत्वलाभा
त् समाप्तित्वावच्छेदेन व्यभिचारेप्यदोषः॥ न चैवं समाप्त्याजन्मान्तरीयमंगलानुमितिरिति मं
गलविरोधः॥ विघ्नध्वंसपूर्वकत्वविशेषणनिश्चयस्यापि कचित्सद्भावात्॥ इति चेन्न॥ यच्च मंग
लतयोपि विघ्ननाशादेनावश्यायाससाध्ये सत्यपि प्रमत्तेन च क्वायाससाध्यप्रायश्चित्ते न विघ्नो
नाशितः तदनंतरं समाप्तिस्तत्र [illegible]न्तिप्रायेणास्योक्तत्वात्॥ ननु तथापि नमंगल[illegible]मेवं

13

निवाच्यं॥नचमंगलव्यवहाराभावेनार्थोतेत्यात्॥अतएवतत्रविघ्ननिश्चयस्यप्रवर्त्तकत्वेमंगलेनु
तज्ज्ञानमात्रस्येत्याहुः॥फलमिति॥फलत्वेनवाव्यानचोक्तव्यभिचारएवेतिभावः॥तत्त्वेति॥तथा
चजन्मांतरीयमंगलस्यैवहेतुत्वान्नव्यभिचारइतिभावः॥तस्मादिति॥एवोक्तेमेप्रेत्यानुष्ठितस
माप्ताविति शेषः॥अन्येत्विति॥नचप्रधानीभूतयोर्मध्येदिसमाप्त्याफलत्वास्युपगमेंगत्वमेवस्या
दितिवाच्यं॥दंडचक्रादिवत्परस्परसहकारित्वेनत्वंगांगीभावइत्याशयात्॥प्रधानायाइति॥
नचांगत्वमेवस्यादितिवाच्यं॥स्वर्गरूपफलस्यैवगुणेनांगत्वाभावात्॥ननुमंगलस्यकामि
कार्यत्वेनकामनायाअनियमान्नियतंतत्करणंनस्यादित्यतआह॥कामनेति॥ननुसमा
प्तावेवनकामनानियमइत्याशंक्यनिरोति॥नचेति॥विशिष्टहेतुत्वोपगमेविशेषणी
भूतसमाप्तावपीष्टसाधनतावगमनियमात्कामनावश्यंभावइत्यर्थः॥विहितेति॥अत्र॥१३॥

प्रधानपदंसांगप्रधानपरंतेनयत्रोत्तरांगदक्षिणादिकंनकृतंप्रधानेनचअतिशयोजनितस्त
त्रनव्यभिचारः॥कृषिजन्यपाकजविशेषेव्यभिचारवारणायविहितपदं।कृषिस्तुक्रतोज
नादिवद्रागप्राप्तत्वान्नविहितेत्याहुः॥अंगजन्यातिशयेव्यभिचारवारणायप्रधानदंपे॥
फलेतरनाशकानाश्यत्वेसतीतिविशेषणीयं।तेनकर्मनाशादिपारगमनादिनाशिनया
गाद्यपूर्वेणव्यभिचारः॥अतएवकृत्या जनितापूर्वेप्रतिकृत्यानाशितेनव्यभिचारः॥यदि
चापूर्वयोस्तत्रसत्प्रतिपक्षवत्प्रतिरुद्धत्वंतदाऽप्रतिरुद्धत्वेनापिविशेषणीयं।केचित्तुअति
शंयत्वेअदृष्टत्वेनेनकृष्यादिजन्यातिशयेनव्यभिचारः॥नचैवंविहितपदंव्यर्थंफलपदस्येष्टरूप
परतयादुरितापूर्वेव्यभिचारवारकत्वात् इत्याहुः॥ननुमंगलजन्यापूर्वविशिष्टोपक्षाप्रसि
द्ध्याकथमापादनमितिचेन्न॥मंगलेयादिसांगप्रधानत्वेसतिशब्दबोधितनाशका

नाश्यापूर्वद्वारस्यादावश्यकत्वकं स्यादित्यापादनात्॥ अप्रयोजकत्वं निरस्यति॥ फलेति॥ इष्टापत्ति
माशंक्याह॥ नचैवमिति॥ ऐहिकेति॥ उक्तयुक्तेरिति भावः॥ आगंतुकेति॥ यद्यपि कृत्याजनितापूर्व
वत् मंगलजन्यापूर्वस्यापि प्रति दुरितेन नाशः प्रतिबंधो वा संभवत्येव नहि देवा फलानवद्ध्यं
भावोपि न तथापि यथा नत्र प्रमाणं तथा च नास्तीति भावः॥ यद्वा एतत् दुस्वरसादेवाह किंचेति॥
न च प्रहरपाद्यस्तावादौ अदृष्टं विना का गतिरिति वाच्यं। तन्नत्कृष्टाव्यवहितपाठक्रमेण चर
मवर्णोच्चारणस्यैव तत्त्वार्थो नेत्यादित्याकुः॥ ननु यत्रो न रागेनापि प्रधानं मंगलं समीरितं तत्र ग्रंथा
नस्याहृष्टव्यापारं विना चिरनष्टस्य कथं हेतुतेति चेन्न॥ तत्रापि तज्जव्यापारोत्तरं चरमव्याप
रस्यैव विघ्नध्वंसस्य हेतुत्वात्॥ इत्येके॥ अनन्यगत्या अपूर्वकल्पनमित्यन्ये॥ ननु यथा जो
जकादृष्टं भोजनादिषु पुरुषव्यापारमुत्पाद्य भोगमुत्पादयति तथा मंगलजन्यादृष्टमपि॥ १४॥

मपुरुषव्यापारमुत्पाद्यसमाप्तिमुपादयेदित्यनुज्ञयेनाहापयेति॥ तथा च मंगलस्य प्रधा
नत्वेप्यदृष्टद्वारत्वेपि च सर्वोक्तव्यभिचारो नापाकृत इति तत एवास्य न हेतुत्वमित्यर्थः॥ विक
ल्पएवेति॥ यद्यप्येवमपि न व्यभिचारोद्धारः तथापि तत्तद्व्याप्येतरसकलसमवधाने यद
न्वये कार्यान्वयस्तदेव कारणं लाघवात्॥ न तु यदन्तावेर्याकान्तावदन्यपि विशेषणगौर
वात् तथा चाप्यस्तनमेवेति व्यभिचारोत्र न परिपंथीत्याशय इत्याहुः॥ वस्तुतस्तु तृणारणि
मणिन्यायेन वैजात्यकल्पनादेव न व्यभिचारः॥ न चैवं वाजपेयाश्वमेधयोरपि स्वर्ग
जनकत्वे किं न विकल्प इति वाच्यं॥ यत्रान्यतरसत्त्वं अपरकार्योत्पत्तिप्रतिबंधकं तत्र वि
कल्पात्॥ अत एव तदनुसारेणैव दूषयति॥ न हीति॥ ननु वैकल्पिकैककारणद्वयं कथमेकत्र

15

नप्रयुज्यत इत्यत आह॥ विकल्प इति॥ तत्कारणद्वयस्य परस्परप्रतिक्षेपेणैव शास्त्रतया परस्परानप्रे
क्षणेनैव जनकत्वादित्यर्थः॥ तृणादौ न तथा न जनकत्वमित्यत्र स्वभाव एव शरणं॥ न चेति॥
यद्यपि न त्रयसिसां गोपीत्यादेरकृतत्वादिदमप्यसिद्धं तथापि व्यतिरेकव्यभिचारमात्रोद्भा
वनात्रांकेयमिति ध्येयं॥ इष्टेति॥ साधनत्वं च नियतप्राक्सत्त्वघटितमिति न गर्हे व्यतिरेकव्य ८४
भिचार इदो विरोध्येवेति भावः॥ अथेति॥ व्यभिचाराद्वा नैर्हि प्रत्यक्षकारणतामहेहे
तुसहचारज्ञो न सहकारी न तु ग्राहकेनेन तद्भानेपि स्वर्गादिसाधन नाग्रहादिति भावः॥ अ
शक्यत्वादिति॥ अयोग्यता निश्चयस्य शाब्दग्रहपरिपन्थित्वादिति भावः॥ न चैवं यागा
दिबोधकस्तुतौ का गतिरित्यत आह॥ यागेति॥ स्वर्गादिविशेषइव समाप्तिविशेषे यथा ॥१५॥

न्हेतुत्वेनतथावक्ष्यते॥विघ्नसंसर्गान्ताचेति॥येनरूपेणविघ्नसंसर्गान्तावस्यहेतुनातेनभ
गवत्कार्यतापि॥नन्वकार्याकार्यद्वित्तित्वयाकथंतस्यकार्यतावच्छेदकत्वमितिवाच्यं॥यत्र
मोभयस्यासतःश्रुतिमतेनप्रमात्ववद्दोषात्॥यस्मिन्निति॥असत्वाघटितमपि पारिभा
१४ षिकमिदंप्रवृत्त्यूपयिकमितिन्नाः॥नचेवंरासत्तादावतिप्रसक्तेमितिवाच्यं॥यद्व्यति
रेके सत्वमेवेतिनियमस्यविवक्षितत्वात्॥नचघटजातीयस्य रासत्तादिव्यतिरेके
सत्वमे व॥दंडरूपाद्यतिव्याप्तिवारणायानन्यथासिद्धत्वपिमवोध्यं॥नन्चेवंप्रागभा
वस्यमंगलसाध्यतानस्यात्तद्व्यतिरेकेनस्यानादित्वेनसर्वक्षणेसत्वादितिचेत्॥अ
त्रवदंति॥साध्यत्वेनपदद्दसिमतत्तनत्वानियोग्यनुयोगितावरूपसंबंधाश्रयोयःप्रागभा

वः तन्नाशकस्वस्यव्याप्येतरसकलसमवधानेसतियस्मिन्सतिइत्यादिविवक्षितौ॥ नादृष्ट
घटादिस्थलेसाध्यत्वाभिमतंघटादित्वनियोगिकः प्रागभावः प्रकृतेतुसाध्यत्वाभि
मतएवप्रागभावः उक्तरूपेणत्यनुगमः॥ एवंचनरासत्वादावतिप्रसक्तिः॥ रासत्वत
व्याप्येतरसकलघटप्रागभावनाशकस्ययावद्घटोत्पादकस्यसमवधानेरासत्वव्य
तिरेकेणघटव्यतिरेकासिद्धेः॥ दंडादौनथेतिचेन्नसाध्यत्वौ॥ ननुमंगलमंगलव्याप्ये
रविघ्नप्रागभावनाशकसकलसमवधानेसतिमंगलव्यतिरेकेविघ्नप्रागभावव्य
तिरेकोन्नवत्तुनहृष्टार्यमंगलेसत्यपिमक्षणेप्रागभावसत्वंकथंनवत्तुविघ्नप्रागभा
वनाशकस्यसकलस्यविघ्नोत्पादकसामग्रीत्वेननसमवधानेविघ्नोत्पादनियमेनवि

ग्नप्रागभावासत्त्वात्॥ नच मंगलमेव साक्षात्प्रतिबंधकमिति वाच्यं॥ तथा सति मंगलसत्त्वे मंगलाभावरू
पकारणाभावान्नादृष्टस्य समवधानुस्यैवासिद्धेरिति चेन्न॥ स्वस्वाभावस्वव्याप्येतरतन्नाशकसमवधाने
सतीत्यर्थात्॥ तथा च मंगलाभावेतरविघ्नप्रागभावनाशकसकलसमवधानेपि मंगलसत्त्वेऽग्रिम
क्षणे विघ्नप्रागभावसत्त्वं स्यादेव मंगलाभावरूपकारणाभावे विघ्नानुत्पत्तेरिति॥ एतेन समानकालो
त्पत्तिकस्वव्येतरविघ्नाभावयोः परस्परसाध्यतापत्तिर्निरस्ता॥ अन्यत्र स्वस्वव्याप्येतरेत्यादिकारणताल
क्षणवत्त्विरसनीयं इति॥ एवं निर्विघ्नमिति॥ संसर्गाभावमात्रे निःशब्दार्थो न तु ध्वंस एवेति भावः॥ व्यति
रेकव्यभिचा[illegible]रं निरस्यति॥ सर्व[illegible]ति॥ यद्यपि विकल्पे व्यभिचारताद्रवस्थ्यमेव तथापि पूर्ववदेवन
दुद्धार इति भावः॥ अन्वयव्यभिचारं निरस्यति॥ यद्येति॥ नच सांगादेदिककर्मणः फलावश्यंभाव
इति वाच्यं॥ बहुतरविघ्नवत्समासो बहुमंगलस्य हेतुत्वादिति भावः॥ नच त्यंताभावेऽत्र मंगलसाध्य

त्यो ऽभावेन द्वारत्वाभावेऽपि प्रागभावस्योक्तरीत्या तत्साध्यत्वमस्तीति कादाचित्कविघ्नाभावत्वेन तद्वारत्वमस्त्वि
त्यत आह ॥ किं चेति ॥ यत्र समाप्तिपर्यंतं विघ्नकारणं न जातं तत्रेदं बोध्यं ॥ एतदेव स्पष्टयति ॥ एवमपीति ॥ ए
एवं सतीत्यर्थः ॥ किं च [illegible] मंगळसमानकालीनविघ्नकारणविनाशद्वारा प्रागभावस्य साध्यत्वे तदनंत
रोत्पन्नविघ्नकारणविनाशद्वारापि वा घे विघ्नध्वंसेति ॥ अंत्येत्याह किं चेति ॥ एवं सति मंगळानंतरोत्प
न्नविघ्नेन कुत्रापि समाप्तिप्रतिबंधो न स्यात् ॥ तज्जनितादृष्टेन विघ्नकारणनाशात्तदनुपपत्तेरित्यर्थः ॥
अन्वयव्यभिचारमुद्धरति ॥ प्रचितमिति ॥ एवं सति व्यतिरेकव्यभिचार इत्याह ॥ अथवनादपीति ॥ तु
वीति ॥ तृणारणिमणिवत्कार्यतावच्छेदकभेदान्न व्यभिचार इत्यर्थः ॥ अत्राप्युक्तयुक्त्यतो व्यभिचार इत्याद
नेति ॥ बहुत्वस्येति ॥ यद्यप्येकत्वद्वित्वभिन्नसंख्यात्वादिनानुगमः संभवत्येव तथापि व्यभिचार एव
तादवस्थ्यं ॥ आरब्धनिर्वाहइति ॥ अत्रेवदंति ॥ आरब्धनिर्वाहविशेषितस्यैवाविघ्नध्वंसस्य प्रकृतका
मनाविषयत्वान्न केवलस्यैव तस्य फलत्वमुक्तं किंतु निर्दिष्टस्यैवाविशेषणत्यागे बीजाभावात् ॥ ॥१८॥

केवलस्यतस्यगंगास्नानादिनोनावेनमंगलव्यभिचारित्वाद्बेति ॥ नन्न ॥ तस्यविघ्नविशेषणतयाफलीन
र्णोवेबाधकस्यव्यक्तत्वान्तथाचतदुपलक्षितविघ्नध्वंसस्यैवफलत्वं ॥ नचव्यभिचारः ॥ यागादेःस्वर्गी
विशेषइवविघ्नध्वंसविशेषेनस्यहेतुत्वादन्यथाबाधापत्तिःगंगास्नानादिनाविघ्नध्वंसेयत्तसमापि
स्नानंतनवापिव्यभिचारात् ॥ मानन्दिति ॥ मावर्त्तनामित्यर्थः ॥ यद्वेति ॥ एवंसिमास्तरूपसर्जनतया
कामनाविषयत्वमनुरोधान्येनेतिनपर्वानेदः ॥ नारहानेति ॥ यद्यप्यवैलाघवमूलकोन्यायइ
हतुसमाप्तौव्यभिचारेणविशेष्यबाधामूलकइतिसविशेषणेहीतिवत्कुसुचितमनएवइत्यप्रकाशा
दौनश्रेवलिखनेनतथापिविघ्नध्वंसविशिष्टसमाप्तेःफलत्वेगौरवाल्लाघवमप्यस्यैवेति उन
यन्यायावतारसंतवइतिनावधि ॥ नसमाप्तिःउन्नयनोव्यभिचारादिति ॥ अत्रवदन्ति ॥ ननुसमाप्तिमा
त्रंप्रतिमंगलत्वेनहेतुत्वंश्रुतिर्नबोधयतियेनसांगादृष्टादिककर्मणःफलाव्यवहितत्वेननस्मिन्सन्य

18

प्तिसमाप्यन्तावेनान्वयव्यभिचारः स्यात्। किंतु बहुविघ्नकं यावद्बहुमंगलस्याल्पतरत्वंकयाल्पस्यविघ्नस्याना
भावारेण नादृशाचारानुमितश्रुत्या मंगलसमसंख्यविघ्नस्थलीयसमाप्तिं प्रति समाप्तिस्थलीय
विघ्नसमसंख्यमंगलत्वेन स्वसमसंख्यविघ्नसहितकर्मस्थलीयमंगलत्वेन वा हेतुत्वं बोध्यते। एत
देवाभिसंधाय आचार्यचरणैरुक्तं प्रचितनस्यास्येव बलवत्तरविघ्नवारणे कारणत्वात् तथा च नान्व
यव्यभिचारः॥ अत एव न व्यतिरेकव्यभिचारोपि समाप्तिमात्रं प्रति तस्य हेतुत्वानभ्युपगमात्॥ स
प्तिविघ्नस्याग्रत्वादिति ग्रंथपर्यालोचनया समाप्तिविशेषफललाभात्॥ नैवं जन्मान्तरीयतदनु
मानमिति ग्रंथविरोधः। तस्य यत्र केनापि समाप्तो न समाप्तिविशेषत्वनिश्चयस्तदभिप्रायिकत्वा
त्॥ न वेदं समाप्यतामिति कामनया तदाचारात् अनुमितापि श्रुतिः समाप्तिकामो मंगलमाचरेदि
त्याकारिकैवेति ततः समाप्तित्वावच्छेदेन मंगलजन्यताप्रतीतिरिति वाच्यं॥ निर्विघ्नं समाप्यतामि
तिकामनया तदाचारात् निर्विघ्नसमाप्तिकामो मंगलमाचरेदित्याकारिकाया श्रुतेरनुमानेन विघ्नध्वं ॥१८॥

सत्वेकसमाप्तित्वावच्छेदेनैव न तत्तज्जन्यताप्रतीतेः॥ अस्तु वा समाप्तिकामइत्याद्याकारकश्रुत्यनुमानेन तथा
पि न समाप्तित्वावच्छेदेन तज्जन्यताप्रतीतिः॥ किंतु तत्सामानाधिकरण्येन यथा स्वर्गकामो यजेतेत्यत्र॥
अन्यथा यागं विना स्वर्गइतिव्यभिचारसत्वे स्वर्गेपि यागजन्यता न प्रतीयेत॥ अथ यागजन्यस्वर्गे
जातिभेदोप्यस्तीति तदवच्छेदेन तत्र यागस्य साधनत्वं श्रुत्या बोध्यत इति चेत्तर्हि समाप्तिमंगलजन्य
समाप्तावुपाधिभेदोस्ति तदवच्छेदेन मंगलस्य तत्र कारणत्वं श्रुत्या बोध्यत इति तुल्यं॥ वस्तुतः साध
नताबोधात्पूर्वं स्वर्गजातिभेदोपस्थितौ न मानमस्ति येन तमादाय कारणताबोधः स्यात्॥ किंतु प्र
थमं मतिप्रसक्तेन कार्यतानवच्छेदकेनापि स्वर्गत्वेन रूपेणोपस्थिते स्वर्गविशेषे प्रति श्रुत्या याग
स्य साधनत्वं बोध्यते न ह्युद्बोधनानंतरं कारणभेदप्रतिसंधाने न तत्र जातिभेदः कल्प्यते॥ एवं समाप्तित्वे
नातिप्रसक्तेनापि रूपेणोपस्थिते समाप्तिविशेषे प्रति मंगलस्य साधनत्वं श्रुत्या बोध्यते तदनंतरं का
रणताभेदप्रतिसंधानात्तत्र कार्यतावच्छेदको विघ्नध्वंसीयसमाप्तित्वादिरूप उपाधिः कल्प्यते॥ ननु यदि

कार्यतावच्छेदकप्रतीतावपि अतिप्रसक्तधर्मसामानाधिकरण्येन कारणताग्राहकादिना बोध्यते तदा प्रत्यक्षेणा
19 पि बोध्येताविशेषादिति चेन्न ॥ ग्राहकाभावात् ॥ अन्वयव्यतिरेकौ हि तत्र तद्ग्राहकौ ॥ न तु तत्रातिप्रसक्तेन द्रव्य
त्वादिना दंडान्वयव्यतिरेक ग्रहो यत्र दंडस्तत्रावश्यं द्रव्यत्वं तावत्ताभावात् ॥ यत्र द्रव्यत्वं तत्र दंडनियमाभावाच्च ॥
अत एव यत्र यागादौ तत्रातिप्रसक्तधर्मसामानाधिकरण्येन जन्यता प्रत्यक्षेणापि गृह्यते एव तट्टणादौ मणि
स्तत्र ॥ समानप्रकारकं हि विरुद्धज्ञानं समानप्रकारकान्वयज्ञानविरोधि तथा च स्वर्गत्वविशिष्टतावच्छेदनया
न्निवारणहानिवच्छेदेन नियतपूर्ववर्तित्वं मा गृह्यतामन्याश्रयधर्मिणि हेतुतात्पर्यबोधकं ॥ किंच तवापि
मते प्रायश्चित्तादिना विघ्नध्वंसस्य संभवादतिप्रसक्तेन विघ्नध्वंसत्वेनापेक्षितो विघ्नध्वंसविशेषं प्रत्येव हे
तुता वेदेन बोध्यते ॥ यदि च नमस्कारादिकमाचरेदिति प्रत्येकमेवविधिकल्पनं तदा सुतरामतिप्रसक्तिः
विघ्नध्वंसस्य स्नात्यादिजन्यविघ्नध्वंसेपि सत्वादिति चेन्न ॥ मैवं ॥ विघ्नध्वंसविशिष्टसमाप्तेः फलत्वे विशे
षणीभूतविघ्नध्वंसफलत्वस्यावश्यकत्वाल्लाघवाच्च ॥ स एव फलेन समाप्तिर्गौरवात् ॥ न च यागादेरप्यपूर्वे ॥१९॥

मेवफलंस्यादितिवाच्यं॥ नस्यप्रथममनुपस्थितत्वात्॥ अतीतस्वर्गसाधनतानुपपत्त्यावतत्कल्पनादृष्टार्थंउपजी
व्यविरोधेनस्वर्गफलत्वानपवादकत्वात्॥ इष्टहेतुविघ्नसंशयेनिश्चयेवाशिष्टानांमंगलाचरणादिदृष्टत्वाच्चस्याव
श्यंकामनाविषयत्वे नोपस्थितत्वाद्युक्तलाघवावतारात्॥ यत्रापीदंसमाप्यतामितिकामनातत्रापिविघ्नध्वं
सोहृदिवेष्टते॥ अन्यथाविघ्नज्ञानवदन्यस्यापिमंगलाचरणप्रसंगात्॥ किंचविघ्नध्वंसस्यसंनिहितवत्त्वात्तदन मा०४
हानंतरंमंगलस्यतत्सर्वविघ्नत्वग्रहाकुलत्वकल्पितत्ववत्तस्यान्यथासिद्धत्वं॥ अन्यथामणिध्वंसजन्यविह्निदा
हे मणवयवव विनाशस्यापिहेतुतापत्तेः॥ अतएववकारादितदुत्पत्त्यभावेनहेतुनिष्टत्रिमात्रेष्टविलक
स्वकारणादेवनिसिद्धांतश्च॥ अन्यथातत्रापितद्रूपरीत्यापत्तेः॥ नचैवंसमाप्तेः कामनाविषयत्वानुपपत्ति
रितिवाच्यं॥ इष्टसाधनताज्ञानस्यकामनाहेतोरूनयत्रसत्वेनोनयत्रतदविरोधात्॥ नहिपाकप्रवृत्तिक
लेतृप्तिकामनास्तीतितस्यतद्धितजनकत्वमपि॥ अपिवविघ्नसमसंख्यमंगलत्वेनहेतुत्वेअधिकसंख्य
मंगलात्समाप्यतावापत्तेः॥ नचविघ्नान्यूनसंख्यमंगलत्वेनहेतुत्वं॥ यच्चाज्ञेनमीथेमोरखुसमसंख्य

मधिकसंख्यं वा मंगलं कृतं तत्र समाप्त्यभावेनान्वयव्यभिचारात्॥ नापि हि विघ्नाभावे सत्यपि ज्ञानादि रूपलौकिक
सत्कार्यता वादेव समाप्त्युत्पत्तिः॥ न हि विघ्नाभावस्य समकारणं येन तच्चैव विघ्नसद्भावादेव समाप्तिर्न जाय
यत इत्यनिर्देश्यता॥ तथात्वे तेषामसहकारित्वप्रसंगात्॥ अत एव वस्तुनि कश्चिल्लोकावगतकारणतावादिनि।
न च लोकावगतकारणवत्तत्राप्यन्वयव्यतिरेकाभ्यां दोषायेति वाच्यं॥ सांगादृष्टिक कर्मणः फलाव्यभिचारितावइ
निःसिद्धत्वात्॥ अन्यथा विघ्नसमसंख्यत्वेन हेतुतापि न कल्प्येत॥ न च तत्रांगवैगुण्यात् तथा॥ नमस्कारादि
रूपत्वेनाल्पांगतया सावधानकृते तस्मिन्नु तदभावात्॥ किंच प्रमत्ताद्यनुष्ठितेऽसमाप्तौ मंगलं विनैव विघ्न
संसर्गाभावो हेतुस्तथा च तत्र कृप्त सर्ववर्त्तिनएवास्ये अपि समाप्तिसंभवेऽतत्सहभूतस्य मंगलस्यान्यथा
सिद्धत्वात् वेदेनापि कारणताबोधनमशक्यं॥ अपि च मंगलसमसंख्यविघ्नस्थले वा यसमाप्तिर्लीविघ्नध्वंस
विशिष्टसमाप्तिर्वा। विघ्नध्वंसद्वारकसमाप्तिर्वा कार्यतावच्छेदकं॥ ना॥२४॥ यत्र केचिद्विघ्नाः प्रायश्चि
त्तनाशिताः केचिच्च मंगलेन तत्र समाप्तौ मंगलस्याहेतुतापत्तेः॥ तत्र विघ्नस्य मंगलाधिकसंख्यत्वात्॥ ॥२०॥

विशेष

यदि च तत्र मंगलेन विघ्नध्वंसमात्रं जन्यते समाप्तिस्तु स्वकारणादेवेति मन्यसे तदान्यत्रापि तुल्यं। न हि ती
पः। गंगास्नानादिनापि च विघ्नध्वंसस्तत्र न हि शिष्टसमाप्तेः मंगलं विनाप्युपपत्तेर्व्यतिरेकव्यभिचारात्।
तस्य सर्वपापक्षयहेतुत्वेन समाप्तिं प्रति निर्बंधकविघ्नो मंगलनाश्य एवेत्यत्र मानाभावात्। नीलघटत्व
वदार्थसमाजमहिम्नैवोपपत्तेः। न तृतीयः। अन्योन्याश्रयात् सिद्धे हि मंगलस्य समाप्तिहेतुत्वे विघ्नध्वंसस्य
द्वारत्वसिद्धिः न तु सिद्धे च तदवच्छेदेन मंगलस्य हेतुत्वसिद्धिरिति। किं च विघ्नध्वंसस्य द्वारत्वं न समाप्तित्वा
वच्छेदेन मार्गव्यभिचारात्। नापि समाप्तित्वावच्छेदेन तस्यानिर्वक्तुमशक्यत्वात्। शक्यत्वे वा तदवच्छे
देनैव मंगलस्यापि हेतुतास्तु। अन्यथा मणिध्वंसद्वारकदाहत्वावच्छिन्ने मण्यवयवविनाशस्यापि हेतु
तापत्तेः। अन्यथासिद्ध्यादिना न तस्य हेतुत्वमिति यदि न दोषस्तत्रापि तुल्यमिति संक्षेपः। केचित्तु वि
घ्नध्वंसोपि न फलं किं तु विघ्नानुत्पादः। विघ्नो मा भूदित्युद्दिश्य प्रवृत्तेः। न तु विघ्नो निवर्ततामिति। अ
त एव दुःखं मा भूदिति कामनया क्रियमाणस्य प्रायश्चित्तस्य दुःखानुत्पाद एव फलमित्याहुः। प्रावि

नेति ॥ तथा च तत्तद्विघ्नध्वंसं प्रति तत्तन्मंगलस्य हेतुत्वमिति भावः ॥ नन्वेवं मंगले प्रवृत्तिर्न स्यादिति वा
वाच्यं ॥ प्रायश्चित्तादिनाऽपि विघ्नध्वंसं प्रति हिंसामान्यत एव कारणता विशेषतो परा ॥ तथा च सामा
न्यकारणताज्ञानात्स्व प्रवृत्तिरिति भावः ॥ ननु विघ्नध्वंसोऽपि मंगलव्यभिचारीति कथं तत्फलं स्यादित्यत
आह प्रारिप्सितेति ॥ ननु प्रारिप्सितत्वं विघ्नध्वंसे विशेषणमुपलक्षणं वा ॥ आद्ये प्रारिप्सितस्यापि फ
लत्वापत्तिः ॥ अन्त्ये व्यभिचारतादवस्थ्यं कर्मारम्भकाले नास्तिकादिनापि प्रारिप्सितसमाप्त्यु
पलक्षितविघ्नध्वंसस्य संभवादिति चेन्न ॥ तस्योपलक्षणत्वान्न व्यभिचारः ॥ प्रायश्चित्तादिना २५
ऽपि विघ्नध्वंसे तात्पर्यात् ॥ आरम्भणीयावदिति ॥ तथा च द्वारीभूतसमयस्तद्रंगमिति भावः ॥ ननु
मंगलवज्जन्यविघ्नध्वंसस्यापि व्यभिचारेण कथं समाप्तिहेतुत्वमित्यत आह विघ्नेति ॥ विघ्नध्वं
सत्वेन तस्य न हेतुत्वं किंतु विघ्नसंसर्गाभावत्वेन तथैव प्रतिबंधकाभावस्य हेतुत्वात् तथा च नो
क्तदोष इति भावः ॥ लाघवान्मंगलमाचरेदित्येव श्रुतिकल्पनमिति येमन्यन्ते तन्मतं दूषयितुमा ॥२१॥

ह॥ स्यादेतदिति॥ नापीति॥ इष्टप्रतिबंधकदुरितनाशककारीयमिति व्याप्तिवारणाय प्रारिप्सि
तेति॥ प्रारिप्सितगमनप्रतिबंधककुंडोपशमहेतुकियायामतिव्याप्तेराह विघ्नेति॥ वि
घ्नोपशमहेतुकियात्वं तदुपशमार्थितया क्रियमाणत्वं तेन प्रतियोगिनि विघ्नेऽदृष्टादौ च नाति
प्रसंगः॥ यदि च विघ्नो निश्चित्य तादृशविघ्नोपशमार्थितयाशाय निश्चित्ताचरणं सिंन्न इति तदा तदन्य
त्वेनापि विशेषणीयं॥ विघ्नोत्सारणेति॥ विघ्नत्वं च प्रारिप्सितप्रतिबंधकदुरितत्वं तेन कारीयं नि
तिप्रसंगः॥ अदृष्टद्वावतिव्याप्तेराह साधारणेति॥ तथा च तादृशविघ्नध्वंसमात्रनिष्ठकार्यता प्र
तियोगिककारणतावच्छेदकावच्छिन्नत्वं इति फलितार्थः॥ एवं च ध्वंसत्वावच्छिन्नं प्रति प्रतियो
गित्वेन हेतुत्वं तन्मते नेदं दोषः॥ तेन प्रतियोगिविघ्ने नातिप्रसंगः॥ यन्मते न तादृशध्वंसत्वा
वच्छिन्नं प्रति तत्प्रतियोगिनो हेतुत्वं तदा तदन्यत्वेनापि विशेषणीयं॥ अत एवाद्यव्याप्तकाशा

दोषप्रतिबंधकान्यस्यसत्त्वइतिविशेषणोसीगच्छते।नचप्रायश्चित्तेऽतिप्रसंगस्तत्रस्यनिरुक्तविघ्न
त्वेन्नपापध्वंसेपियोग्यत्वादित्यकं।प्रारिप्सितप्रतिबंधकोविघ्नोनप्रायश्चित्तनाश्यःकिंतुनर
कजनकएवेत्याहुः।अन्योन्याश्रयादिति।वेदेप्रसक्तेननोमन्वाद्याचारात् तदाचारविषयतयाव
सिद्धमंगलत्वमादायवेदप्रसक्तेरित्यन्योन्याश्रयादित्यर्थः।प्रारिप्सितेति।आरंभणीयायामति
व्याप्तेराहसत्यंतेति।गंगास्नानादावतिव्याप्तिवारणायाहकर्मीरंतेति।लेखनपाठकालिकपचम
दिनादावतिव्याप्तेराहविहितेति।विहितत्वंचस्वार्थेणबोध्यंतेनप्रयाजादौनातिप्रसंगः।यदि
वैदिकपदमप्यस्तितदानभएवातिव्याप्तिवारणविहितपदंचबोधितपरंबोध्यं।ताहशेति।
यन्निबंधनंविहितत्वमादायमंगलस्यपुरस्कारेणवेदांतरप्रवृत्तिरितिशेषः।भावनाकिमन
नेतिभावः।वेदादिति।नवेश्वरेणस्मृतिप्रणयनेमानाभावादितिभावः।निर्विघ्नमिति।एतच्च
संप्रदायमतेस्वमतेतुप्रारिप्सितेविघ्नध्वंसकामइतिबोध्यं।नचैवतिप्रत्यकमेवास्त्यर्थः।नेदुप ॥२२॥

जीव्येति॥ प्रत्येकविधानानंतरमेवेत्यर्थः॥ मंगलं चतुरस्कारेणापि दक्षुनर्वेदीतरकल्पनेनवेद्यर्थ्यादि
तिभावः॥ तथेति निर्विघ्नसमाप्त्यनामितिकामनयेत्यर्थः॥ अतएवशाययष्टिनादावपिनातिप्रसंगः॥ न
चदर्शदर्शनादिकमपिमंगलं न तु तस्य विघ्नोपशमहेतुत्वमित्यव्याप्तिरित्यत आह मंगलेति॥ तथेति
ति॥ पारिभाषिकमित्यर्थः॥ ननु विनिपातो न विघ्नते इति स्मरणाद्विघ्ननिवर्तकत्वमेवतस्येत्यत आह कृत
येति॥ तथा च प्रत्यवायपरिहारार्थत्वमेवास्येत्यर्थः॥ जुहुनामिति ह्निनहोमान्तरविधिवाक्यस्थेदापत्तेः न
थाच पापप्राप्ताप्तत्यादफलकेस्याग्निहोत्रस्यैवायमर्थवादः इति निष्क्रियेतेनतदनुरोधेन आगमावपवस्य
नपदस्यचैसपरत्वेवाक्यभेदापत्तिरितिभावः॥ अथवा इदं इति॥ यद्यप्यथवा होमीयान्तर्गतत्वकथं मंग
लं तस्य तज्जन्यत्वात्तथापि तदुच्चारणहेतुज्ञानेतत्रमंगलं॥ तद्दर्शितैवेनेववर्णेमीथइतिवदंति॥ ॐकार
इतिपुरासिरसक्षो ब्रह्मणो मंगलानुष्ठानकाले यत इमौ द्वावौ निर्यातौ ततस्तत्कालानुष्ठानविषय
त्वेन मांगलिकावित्यर्थः॥ गुणवत्तयेति॥ गुणवत्तया ज्ञानेस्वरूपयोग्यत्वाद्वा हेतुत्वमित्यर्थः॥ यद्य जननं
पिदानदाक्षिण्यादिसाधारणस्यैकस्य गुणस्य स्याभावादननुगमस्तथापि वेनने तत्तत्र शब्दविष

23

यतात्प्रयोजकत्वेन दानादेरनुगमइत्याहुः॥यमुद्दिश्येति॥तथा च ज्ञानत्वादिव्याप्यजातीनांस्वापकर्ष
बोधनानुकूलतावच्छेदकत्वेनाननुगतीकृतानांनमस्कारपदप्रवृत्तिनिमित्तत्वं॥यथा स्वजातीयसाक्षा
त्कारप्रतिबंधकतावच्छेदकत्वेनाननुगतीकृतानांतारत्वादिजातीनांतारपदप्रवृत्तिनिमित्तत्वं॥अनुका
र्यिकादिष्वेवजातिः संकरापत्तेः॥नमस्कारपदस्य प्रत्येकजातिप्रकारकज्ञानजनकत्वान्नानार्थ
तैव॥अन्यथाऽक्षादिपदेऽपि सा न स्यात्तदन्यान्यत्वादिनाकथंचित्तत्राप्यनुगमसंभवादिह॥योऽद्भुव नमस्
कारकज्ञानातावान्नतथातद्दाच्यत्वेऽपि तुल्यमितियैर्मन्यंते तन्मतमाहयद्वेति॥वस्तुतोवाचिकादि
नमस्कारेषुदेववंदनीयत्वाद्यनुमापकत्वेनतज्जातीरादायानंदवेदकल्पनापेक्षयाप्रत्येकजातिप्रकारकज्ञा
नजनकत्वमस्तिर्द्धं॥नह्यनंततत्तज्जातिप्रकारकज्ञानजनकत्वेवाच्यास्युपगमो॥अन्यथा नारादिपदा
नामपिनानार्थतापत्तेरितिपूर्वरीत्यैवकल्पः साधुरितिध्येयं॥नचैवंनमस्कारत्वस्य सिद्धिः कथमिति
वाच्यं॥उपाधिभेदादुपपत्तेरित्याहुः॥अत्र च वाचिकनमस्कारेश्वरसमवर्णस्थितिरेवनमस्कारत्वंजा ॥२३॥

त्तिरिति॥ नच विनिगमनाविरहः मध्यमादिवर्णवृत्तित्वे चरमवर्णज्ञानं विना तत्प्रत्यक्षताप्रसंगात्तदपेक्षायां
चरममध्यमादिवर्णनाशादप्रत्यक्षताप्रसंगात्॥ चरमवर्णवृत्तित्वे पूर्ववर्णसंस्कारसहकृतस्य चरमवर्ण
स्य तज्ज्ञानहेतुत्वमिति वदंति॥ न चैवं स्फोटत्वं जातिरेवास्त्विति वाच्यं॥ देवदत्तीयत्वादिना संकरापत्तेः॥
नानात्वकल्पने च मानाभावात्॥ तावद्यावत्त्वस्य संस्कारेण वेदकल्पने नैतद्वेदकल्पेनापत्तेः॥ पूर्वोक्तरू
पेणैव तत्कल्पनमिति भावः॥ नमस्कार्यानमस्कार्यविषयकसम्भ्रान्त्वेन च नमस्कारत्वं न जातिरव्या
प्यवृत्तितापत्तेः तथा च नमस्कारपदप्रयोगस्तत्र नास्तीत्यत आह॥ कायिकादीति॥ न चोन्मादाद्यहेतुक
त्वेन विशेषितस्य कायिकादिव्यापारस्य स्वस्मिन्बुद्धिविशेषपूर्वकत्वेन व्याप्तिग्रहादनुमानं स्यादिति वाच्यं॥
तदज्ञानेपि करशिरःसंयोगादिविशेषज्ञानादनुमितिदर्शनात्॥ जातिविशेषस्यानुगतविकल्पात्
न चान्यतरकर्मजत्वादिना सांकर्यं॥ वाचिकत्वस्य नानात्वेनाप्युपपत्तेरित्यादिकं॥ स्वीकुर्वन्तीति॥ ननु यावद्वे
दप्रामाण्यस्योपगंतव्यं विवक्षितं यत्किंचिद्वेदप्रामाण्यस्योपगंतृत्वं वा॥ नाद्यः॥ किंचिद्वेदार्थानां तत्प्रामा

परामनभ्युपगच्छतोऽपरसकलवेदप्रामाण्यमभ्युपगच्छतोऽशिष्टत्वापत्तेः॥ नान्त्यः॥ नहि स्यात्सर्वज्ञता
नीत्यादिवेदप्रामाण्याभ्युपगन्तृत्वात् बौद्धस्यापि शिष्टत्वापत्तिरिति चेन्न। विशिष्यतत्तद्वेदप्रामाण्या
भ्युपगमेऽपि स्वतात्पर्यविषये सर्वे वेदाः प्रमाणमिति सामान्यतो यावत्तस्यैव विवक्षितत्वात्॥ ननु
वाभ्युपगमो न विशेषणं सुषुप्त्यादिदशायामशिष्टत्वापत्तेः॥ न चेष्टापत्तिस्तदानीमपि शिष्टत्वव्य
वहारात्॥ नोपलक्षणं गौडे तिव्याप्तेः॥ अनादौ संसारे कदापि तेन तदभ्युपगमात्॥ न च तज्जन्मा
भ्युपगमो विवक्षितः। एकस्मिन्नेव जन्मनि शिष्टत्वानन्तरं बौद्धत्वादशायामतिव्याप्तेरिति चेन्न॥ वे
२४ दप्रामाण्याभ्युपगमसमानकालीनया बौद्धैराद्यभ्युपगमसंसर्गाभाववत्त्वस्य विवक्षितत्वात्॥ आचा = २४
रइति। अविगीतत्वं यदि शेषणं नेदानीमपि स्वरूपमित्यर्थः॥ ननु वेदानुमापकप्रविष्टं शिष्टत्वं अन्वी
तरूपं अन्यथा अलौकिकपदप्रक्षेपेण जोजनादौ व्यभिचारवारणेऽपि शिष्टकृतनिष्फलकर्मणि व्य
भिचारापत्तेः॥ अलौकिकादिपदेनैव कथंचित्तद्वारणे निष्फलचैत्यवंदने व्यभिचारवारणार्थमुपात्त॥२४॥

शिष्टपदवैयर्थ्यापत्तेः॥ तथा चागम्यागमनादौ व्यभिचारवारणायादविगीतपदं नैदंयमेवेत्यानुयेनाह यदेति॥
ननु चैवं म्लेच्छमतादिनः शिष्ट इति पर्यवसितं तथा च तादृशो पाखंडे च शिष्टव्यवहारः स्यादित्यत आह लोकेति॥ ए
तेन शिष्टव्यवहारत्वप्रयोजकत्वेन प्राथमिकैः शिष्टलक्षणं कृतमिति ध्वनितं॥ नन्वेवं वेदनिषिद्धलोकदृष्टत्वेन शि
ष्टव्यवहारहेतुरिति पर्यवसितं॥ नच सर्वकालीनेन कस्यापि कादाचित्कबोधस्यासत्त्वेन तद्भावविशेषेण तस्या
पि तत्वं स्यादित्यत आह यदेति॥ इदमपि व्यवहारोपयोगि न त्वनुमानोपयोगीति बोध्यं॥ विगीतेति॥ सर्वज्ञ अ५
स्यापि कर्मक्षयार्थं निषिद्धाचारे व्यभिचारवारणायेदं॥ न चैवं वीतरागादिदृष्टत्वं तस्यासिद्धं तेन विना घट्टस्य मा
वादिति वाच्यं॥ रागादिपदस्य तद्विशेषपरत्वात्॥ अत एवाना[illegible] सक्तो द्विषं च्युतं केति भावः॥ तद्धी =
ति॥ व्याप्यव्याप्यस्य सुतरां व्याप्यत्वादिति भावः॥ नन्वनुमानोपयोगिमाप्तव्यवहारोपयोगि स्यादित्यत आह
आधुनिकेति॥ सदिति॥ सतां शिष्टानां॥ छ॥ [illegible]॥ छ॥ प्रेक्षावत्प्रवृत्त्यर्थं स्वग्रन्थे निश्चयस्य सफलत्वं वदन्निश्चि
श्यासंगमयन्न तस्यानिषेधं दर्शयति॥ अथेति॥ मंगलनिरूपणानंतरं प्रामाण्यतत्वमत्र ग्रंथे विविच्यत इ

25

त्यनेन संबध्यते तेनावसरलक्षणासंगतिर्दर्शिता ॥ अथ शास्त्रे मंगलार्थमित्यन्ये ॥ अन्ये हि तेन मंगलं सर्वविद्या
साध्यनिर्विघ्नप्रयोजकत्वं तत्संपादकतया ॥ तदुक्तं प्रदीपः सर्वविद्यानामित्यादिना ॥ माध्यमकः प्रत्यवति
ष्ठते नन्विति ॥ वक्ष्यमाणेति परस्परं मीमांसकेन व्याप्तिकास्यामिति शेषः ॥ ननु साध्यप्रग्रहेण शुद्धहेतुः मा३
व्यभिचारादन्यथा सद्धेत्वेति न टस्थः प्रत्यवतिष्ठते ऽथेति ॥ नवेति ॥ अत्र यस्य हेतोः संशयव्यतिरेकनिश्चयो
यत्र [illegible] प्रतिबंधको तन्निश्चयस्तद्धेतुरिति साधारण्यव्याप्तिरभिमता प्रकृत्तिपदं प्रकृतनाभिप्रायेण ॥ अत
एवानुमितौ व्याप्तेरेवेति दृष्टान्तः ॥ अत्र साध्यव्यतिरेकनिश्चयो साध्यनिश्चये प्रतिबंधकः ॥ न हि तन्निश्च
= यस्तद्धेतुरिति अत उक्तं संशयेति ॥ तथा च साध्यसंशयस्याप्रतिबंधकतया संशयपदोपादानेन साध्य
भिन्नस्य यस्य व्यतिरेकनिश्चय इत्यर्थे तात्पर्यं ॥ एतेन यथाश्रुते व्याप्तिव्यतिरेकज्ञानमात्रं प्रतिबध्ये व्याप्ति
२विषय निश्चये व्यभिचारः साध्यभिन्नत्वेन निश्चयविशेषणे तु संशयपदोपादानं व्यर्थमिति निरस्तं ॥ संशयप
दोपादानमहिम्नैव साध्यभिन्नत्वलाभात् ॥ यत्तु अयोग्यतानिश्चयप्रतिबध्ये शाब्दज्ञाने फलव्यतिरेक ॥२५॥

निश्चयप्रतिबंध्ये कृष्णादिप्रवृत्तौ च व्यभिचारवारणाय संशयपदोपादानमिति॥ तन्न॥ उक्तयत्र निश्चयस्यापि हे-
तुत्वेन व्यभिचाराभावात्॥ निश्चयत्वेन जनकत्वं विवक्षयित्वैवोदुपादानस्यासंगतत्वदुक्तिकत्वात्॥ केचित्तु निश्चय- =
त्वेन जनकत्वाविवक्षायामपि योग्यतासंशयजन्ये शाब्दज्ञानविशेषे व्यभिचारवारणएव तन्निश्चयाभावेऽज्ञानावस्था।
पि साध्यत्वाविशेषमतस्य तत्राभावादिति संशयपदोपादानमन्याहुः॥ असाधुत्वनिश्चयो न प्रतिबंधक इति मत इ-
दं बोध्यं॥ तन्निश्चयस्तद्धेतुरित्यत्र ज्ञानमात्रे तात्पर्यं॥ दृष्टार्थप्रवृत्तिः प्रामाण्यावधारणं विनापि यथा न तथास्त्व॥
सत्य५ अदृष्टार्था तु वैदिकी प्रवृत्तिः प्रामाण्यसंशये संभवंती प्रामाण्यावधारणसाध्येत्यन्याशयेन सिद्धांतयति॥ हू॥ ने
४मत ति॥ एवं सति निरस्ते तटस्थो मीमांसकं मुत्थापयति॥ नन्विति॥ यद्यपि माध्यमिकमतनिराकरणपूर्वकमेव मत४
तदुत्थापनं युक्तं तथापि प्रामाण्यपरतः व्यवस्थापने मीमांसकमतनिराकरणमेव भावीत्याशयेन माध्यमि-
मर २ति कमतं निराकृत्यैव तदुत्थापितमिति ध्येयं॥ मीमांसकः॥ चित्तयसाधारणीं विचारांगसंशयबीजं तु तौ विप्र-
प्रतिपत्तिं दर्शयति॥ ज्ञानप्रामाण्यमिति॥ अत्र त्वमान्यज्ञानत्वादिकमेकं पक्षत्वेनाभिमतं मीमांसकैर न१

26

पिच्च मान्यज्ञानत्वादेर्व्यवसायानुपनीतत्वेनानुव्यवसायादिना ग्रहणानभ्युपगमात् ॥ किंतु रजतत्वव
तिरजतत्वप्रकारकज्ञानत्वादिकं प्रामाण्यपदत्वेनानुगतत्वेनास्तिसंहितं ॥ न च गुरुमते रजतत्ववतीति
व्यर्थं पक्षेतरंजकस्यापि दानात् ॥ अत्र ज्ञानपदं करणप्रामा[illegible]ण्यभ्रमनिराकरणायेति केचित् ॥ न
पद४ न ज्ञानपदसत्वेपि तत्सत्वात् ॥ ज्ञानादेरपि करणत्वात् ॥ ज्ञायतेऽनेनेति व्युत्पत्त्या चक्षुरादेरपि ज्ञानत्वा
त् ॥ यदि च प्रामाण्यपदस्य विशेष्यपरत्वं तदा भ्रमासंग्रह एवेति ॥ अन्ये तु प्रामाण्यपदेन द्वितीयेतंकार
कत्वमात्रपरं तच्चेच्छादावपि न यथोक्तसाध्यवदिति ॥ बाधवारणाय ज्ञानपदं ॥ तेन तद्वतितत्प्रकारक
ज्ञानत्वे पर्यवसितं ॥ न च घटत्ववतीत्यादेर्ज्ञानेच्छासाधारण्येनेच्छावृत्तेनागृहीतापि यावज्ज्ञानग्राहक न्ने४
ग्राह्यत्वं साध्यमस्त्वेवेति नोक्तदोष इति वाच्यं ॥ यावत्ज्ञानग्राहक[illegible]ग्राह्यत्वं हि यावत्स्वाश्रयग्राह
कग्राह्यत्वं ॥ यथाश्रुतेऽसंभवात् ॥ तथा च ज्ञानपदानंतर्भावे बाध एव स्वाश्रयीभूतेच्छाग्राहकेपाने
दग्रहणात् ॥ नहि [illegible] व्यवसायवदिच्छायामपि उपनायकत्वं कश्चिदभ्युपैति ॥ येन तथा स्यादित्याहुः ॥ ॥ २६ ॥

नन्विन्द्रियं तत्प्रकारीभूतप्रकारकत्वं तद्विशेष्यीभूतविशेष्यत्वादिना स्वाश्रयग्राहकसामग्रीविशेषणीयानवा
आद्येनोक्तबाधः॥ तेन रूपेण स्वाश्रयीभूतेच्छाग्राहकेण तद्वितिः तत्प्रकारकत्वस्यावश्यं ग्रहणात्॥ अन्त्ये ज्ञानपद
तत्त्वविपिबाधएव ज्ञानपदादिना तद्ग्रहणादिति॥ वस्तुतस्तु प्रामाण्यमात्रपक्षत्वेऽनुव्यवसितत्वजन्यज्ञानप्र
माण्यांशे बाध इत्यत उक्तं ज्ञानपदं विशेषपरं॥ तत्र तिनच ग्राह्यप्रामाण्याश्रयत्वेनाभिमतज्ञानेऽप्रामाण्यग्रा
हिकायावतीतज्ज्ञानग्राहिका सामग्री तावद्ग्राह्यं तत्प्रामाण्यमिति मीमांसकचिन्तनसाधारणविधिकोऽर्थः॥
अत्रपक्षीभूतयत्प्रामाण्याश्रये दोषवज्ज्ञानप्रामाण्यग्राहिका काचित्सामग्रीत्वेन बाधवारणायोक्ते अप्रामा
ण्याग्राहकेति॥ न च गुरुमतेऽप्रामाण्याप्रसिद्ध्या तद्ग्राहकाप्रसिद्धिरिति वाच्यं॥ अप्रामाण्यस्य व्यधिकर
णप्रकारकत्वस्यच्छायातन्मतेऽप्रसिद्धेः॥ ननु स्वयमोगस्य तस्य भ्रमसंभवात्॥ भ्रमस्तु तन्मते संसर्गा
ये स्वमतेऽन्यथाख्यातिरित्यन्यदेतत्॥ एवमप्यप्रामाण्यवत्प्रामाण्यप्रकारकज्ञानरूपस्य प्रामाण्यस्याप्रा
माण्यग्राहकसामग्र्येव परं ग्रहणादं ज्ञाने बाध इत्युक्तं तद्दिति॥ न चाप्रामाण्यग्राहिकेत्यर्थः॥ वस्तुतस्तु तत्प्रा

27 म

माण्यविशेष्यग्राहकेत्यर्थः॥तेनयत्रपक्षेतन्नतिप्रामाण्याभ्रयेतद्प्रामाण्यावगाहनमेवज्ञानतत्र न बाध
इति ध्येयं॥अनुमितिग्राह्यत्वेनसिद्धसाधनवारणाययावदिति॥ज्ञानग्राहकेत्यत्रस्वरूपयोग्यतानविवक्षि
ता॥तथाचनाहंज्ञास्यामिनोयोगादेःसर्वस्यप्रामाण्यग्राहकत्वाद्बाधइत्यतउक्तंसामग्रीति॥ननुज्ञानप
दादिनाप्रामाण्यास्याग्रहाद्यथा [illegible] श्रुतेबाधः॥नचस्वविषयकज्ञानग्राहकसामग्रीविवक्षिता॥घ
टज्ञानमित्यादिशब्देनापितद्ग्रहाद्॥नचतेनतद्ग्रहेनवत्यवेतिवाच्यं॥घटत्वप्रकारकत्वंघटविशेष्य स्य५
कत्वस्यचतत्रसर्वथाप्रतीतेः॥पदार्थत्वाद्अवाक्यार्थत्वाच्चेतिचेत्॥अत्रवदंति॥ज्ञानग्राहक
सामग्रीसैवात्रविवक्षिता॥यातज्ज्ञानप्रकारीभूतधर्मप्रकारतेयातत्प्रकारविशेष्यीभूतधर्मिविशेष्य क४
कतयातज्ज्ञानंग्राहयति॥अनुव्यवसायादिसामग्रीसातथैव॥नचतथाहंनेवव्यवसायस्यभानात्॥
इदंरजतत्वेनजानामीत्यादौज्ञानेविशेष्यत्वेनेदंपदार्थस्यप्रकारकत्वेनचरजतत्वस्यभानात्॥
नसंवर्कं तदनुमानसंगच्छते तच्च नास्त्येवेति केचित्तु काचित्कापि ज्ञायेणार्थेहि प्रकारस्त्यादिस्थ ॥ विषयतावच्छेदेति ॥ इदं साध्यं परस्परविरु तु३
द्धप्रकारकवह्नित्वप्रकारकज्ञानत्वादिति हेतुमभिप्रेत्य ॥ अन्यथाऽनुमेयावह्निरिति ज्ञाने व्यभिचारापत्तेः ॥ केचित्तु विषयताश्रयाद्वृ
त्तिवह्निश्चप्रकारकाज्ञानेति साध्यार्थे तावता न कथं चित्त्वारत्यादिस्थ ॥ न प्रथमं साध्याप्रसिद्धेरिति ॥ अत्रापीदं चिन्त्यं । नवे दे वयदि प्रथमानुमा

५१

ता२

भानेन साध्यप्रसिद्धिः स्यात् तच्च न तेनाभावस्येव साधनात्॥ प्रकारान्तरेणैव साध्यप्रसिद्धेः प्रथमम् अप्रामाण्याभावलिंगत्वेनाभिम
तत्वेन च तत्सिद्धिसंभवः॥ तस्यापि प्रामाण्यव्याप्यत्वात्॥ अबाधितत्वेऽविषयकत्वाभावसत्त्वे सविषयकत्वादित्यादिहेतुसिद्ध्यर्थं प्र
थमानुमानावतारइत्यप्यतएव निरस्तं॥ नसावधित्वेति॥ विशेष्यधर्मिणि तस्याः प्रवृत्तिसमानाधिकरणे दत्वादिसामानाधिकर
ण्यादिति भावः॥ भवति॥ ननु मणिर्मणिजनकइति ज्ञानवतः फलज्ञानत्वेन प्रमागोचरमणित्वनिश्चयस्य मणिप्रवर्तकत
या मणित्वाभाववद्विशेष्यकतया च व्यभिचारः स्यादिति चेत्॥ न॥ फलज्ञानात् प्रवर्तकत्वस्य वक्ष्यमाणत्वात्॥ समानविषयत्वेन
प्रवर्तकः स्यविशेषणाद्वा॥ ज्ञानप्रयत्नयोरिति॥ नन्वनयोर्युगपदुपस्थितौ मनसा कार्यकारणभावग्रहः सैतवीसेच
न संभवति॥ क्षणिकत्वेन युगपदुपस्थापनाभावात्॥ न च स्मृत्युपनीततद्धेतुः स्मृतेरपि ज्ञानगोचरतायास्तदनुव्यवसा
यपूर्वकत्वात् तथा च प्रवर्तकज्ञानस्य यदानुव्यवसायस्तदा ततः प्रवर्तकज्ञानं विनाशप्रयत्नेऽरेव हेतुत्वाभावे दुर्लभा
कुतस्तद्धेतुधीः॥ अननुव्यवसायेच संस्कारानुत्पादेक स्मृतिः केवातदनुपनीततद्धेतुत्वधीरिति चेत्॥ अत्र वदंति॥
ज्ञाने ज्ञाते तस्य ज्ञानत्वेन समानविषयज्ञानत्वेन वा सामान्यलक्षणया ज्ञाने सति तेन ज्ञानेन वानागतस्यापि विषयी
ना१ कृतत्वैनाहेत्वाज्ञातिरस्यउनुरुयादप्रवृत्त्यनंतरं कार्यकारणभावपरिच्छेदः सामान्यलक्षणया प्रत्यासत्त्या ज्ञाने वति॥ ४९॥

नां२

चयीकृतस्य चरमोत्पन्नप्रवृत्तिजनकज्ञानस्य प्रवृत्त्यनंतरं स्मृत्यपनये वाधकाभावात्॥ इदमपि च सामान्यलक्षणा
स्वीकारे बीजं॥ अन्यथा ज्ञाने छादिषु जनकत्वधीर्न स्यादिति॥ यत्केन तस्य च व्यवसायानंतरं विषयविशिष्टज्ञानानु
व्यवसायस्तदनंतरं विनश्यदवस्थेन व्यवसायेन छाद्युत्पादनं तत्र संस्कारो न दुर्लभः॥ गौरवेण स्वसमयवर्त्तित
याऽनुव्यवसायं प्रति व्यवसायस्याहेतुत्वादिति॥ ननु × यत्र चेछासामग्रीबलवत्वात् व्यवसायानंतरमिछा तदनंतरं
विनश्यदवस्थेनानुव्यवसायजननं ततो विनश्यदवस्थेछाया प्रवृत्तिः तत्रापि सन्दुर्लभत्वः॥ × तथापि समर्थप्रवृ
त्तिजनकतावछेदकस्य प्रामाण्यस्याज्ञाने कथं ज्ञानतादृशप्रवृत्तिकारणतागृहः ज्ञानेशसिद्धसाधनमितिचेत्॥
न। तृणारणिमणिन्यायेन व्यक्तावपि तद्ग्रहसंभवादित्येके॥ एतद्स्वरसादेवाह दोहसर्थविशेष्यकेति द्वितीयहे
तुरित्यन्ये॥ अनावसाध्यकेति॥ अप्रामाण्यानावसाधक इत्यर्थः॥ निर्विकल्पस्येत्युपलक्षणं घटादेरपीति द्रष्टव्यं
सपक्षत्वेनेति॥ साध्यवत्वेनेत्यर्थः॥ सांख्याप्रसिद्धिदशायामेवानावानुमानादिति भावः॥ तथेत्यादि॥ अत्रापि साध्य
देवादौ सर्वविसंगतिरूहनीया॥ अन्ये त्विति॥ अत्र साध्ये पृथिवीत्वासमानाधिकरणत्वं तदधिकरणानधिकरण
त्वं हेतोश्च गोत्वासमानाधिकरणत्वं तदनधिकरणाधिकरणत्वमेव॥ एवं च गगनादिप्रकारके गगनत्वमित्यादि

ज्ञाने व्यभिचारवारणाय गंधसमानाधिकरणप्रकारकेति विशेषणं॥ अत्र च गंधसमानाधिकरणप्रकारत्वे
धर्मीयस्याऽसामानाधिकरण्येन संबंधो नास्ति सा विषयता नाहं ज्ञाप्रकारिका विवक्षिता तथा च गंधसमाना-
धिकरणप्रकारसमानाधिकरणत्वे पर्यवस्यति। तेन नोक्तव्यभिचारः॥ न चैवं गंधसमानाधिकरणत्वमात्रमेव वि-
षयताविशेषणमस्तु लाघवादिति वाच्यं॥ गंधसमानाधिकरणत्वस्य विषयतापदार्थानन्वयेन व्यर्थविशेषणत्वान-
वकाशात्॥ गंधासमानाधिकरणप्रकारेति विशेषणं च पृथिव्यां पृथिवी जलं चेति संशये व्यभिचारवारणा-
येति वदंति॥ तन्न॥ अयं गगनवान् पाकजरूपवांश्चेति घटविशेष्यके भ्रमे व्यभिचारात्॥ वस्तुतु गंधसमाना-
धिकरणप्रकारकत्वेन साधिकरणमात्रप्रकारकत्वं विवक्षितमिति नोक्तव्यभिचार इति ध्येयं॥ अन्ये तु सा-
ध्यपदं प्रकारपदं धर्ममात्रपरं विनिकल्पकेपि विषयतानन्दात् तत्र व्यभिचारवारणाय गंधसमानाधिकरणा-
प्रकारकेति विशेषणमित्याहुः॥ यत्तु गंधासमानाधिकरणप्रकारकविषयताप्रतियोगित्वादित्येको हेतुः
मात्रपदोत्तत्वेन गंधसमानाधिकरणमात्रप्रकारकविषयताप्रतियोगित्वादित्यपरो हेतुरिति हेतुद्वयं तात्पर्यं ॥५०॥

मिति॥ तन्नुच्छं॥ गंधसमानाधिकरणमात्रप्रकारकत्वं गंधासमानाधिकरणाप्रकारकत्वे सति गंधसमानाधिकरणप्रकारकत्व
मेव। तथा च व्यर्थविशेषणत्वमेव सत्यंतमात्रस्यैवाविवक्षितत्वे प्रथमदलस्य विशेषणविशेष्यभावमात्रस्यैव विवक्षितत्वे न्नमसंश
यादौ व्यभिचारइति॥ तेनेति॥ गंधासमानाधिकरणाप्रकारकत्वविशेषणेनेत्यर्थः॥ निश्चयत्वेति॥ न हि विशेषणं विहाय संशयव्याव
र्त्तकार्थं ज्ञानत्वस्थाने निश्चयत्वं यादृशमित्यर्थः॥ न चैवमपि कथंचिदव्यवच्छेदइति वाच्यं॥ परस्परविलक्षणप्रकारकत्वनिश्च
यत्वपदेन तस्यापि व्यवच्छेदात्॥ केचित्तु गंधसमानाधिकरणः प्रकारो यत्र सामानाधिकरण्येन संबंधेन नास्ति तादृशविषयता
प्रतियोगिनिश्चयत्वादिति विवक्षितमतो न समव्यवच्छेद इत्याहुः॥ ननु प्रकारत्वेदेन विषयतात्वेदात् पृथिवीत्वमात्रप्रकारकविष
यतामादाय तत्रैतात्पृथिवीत्यनुभवे गंधासमानाधिकरणत्वादिहेतुसत्वाद्व्यभिचार इत्याशंक्य निराकरोति तेनेति॥ तथा च पृ
थिवीत्वांशे साध्यमप्यस्ति तत्र तत्रांशे साध्याभावसत्वेपि हेतुरेव तत्र नास्तीति न व्यभिचार इत्यर्थः॥ नमप्रमेति॥ जलपृथिव्योरिमे
पृथिव्याविति समूहालंबन इत्यर्थः॥ इदं चेत्रैतात्पृथिवीत्यनुभवे प्रकारत्वेदेन विषयतात्वेदास्य पगमे न हेतुसत्वमस्य पेत्य समा
हिती॥ वस्तुतस्तु प्रकारत्वेदेन विषयतात्वेदामानाभावात् किंतु विशेष्यत्वेदेनेव॥ अन्यथा जलपृथिव्योरिमे पृथिव्याविति
समूहालंबने जलांशे पृथिवीत्वमात्रप्रकारकविषयतामादाय हेतुसत्वेन पृथिवीत्वासमानाधिकरणजलत्वादेरप्रकार

वच्छिन्नविषयताकत्वात्साध्याभाववत्त्वेन व्यभिचाराप्रसङ्गः॥ तथा च तच्छ्रीमत्त्वपृथिवीत्वोभयप्रकारावच्छिन्नाएकैव विषयतेत्यकत्रैक
५। तोस्तत्रागमनाद्व न व्यभिचार इत्याह विशेष्यत्वे देनेत्यादिना स्करमतमादृत्यैवेति॥ ग्रंथासमानाधिकरणेति॥ असामानाधि
करण्येन दधिकरणानधिकरणत्वं धर्मेत्वेन न विवक्षितं तेन गगनं गगनत्वमितिज्ञानेन व्याप्तिचारः॥ प्रकारकत्वेन विषयतावि स२
शेषणाच्च निर्विकल्पकेन व्यभिचार इति ध्येयम्॥ अग्निमहतावपि पृथिवीत्वप्रकारकपदं निर्विकल्पके व्यभिचारवारणाय॥ किं
त्वर्थादिति॥ अत्रापीदं चिन्त्यं॥ साध्याप्रसिद्धावदेवापि न तत्प्रामाण्यसिद्धिः॥ कथं विरुद्धसिद्धेः प्रथमनये वोक्तहेतुभिरनसाध्य
वि सिद्धावरोधश्च इति॥ उक्तरीत्या वान्यत्रापि प्रामाण्यानुमानमित्याह एवमिति॥ ज्ञानीतरोपस्थापिकेति॥ अत्र दर्शिते॥ ज्ञानीतरो
पनीतं न त्वेदं मनसा स्यात्तत्त्वग्रहणात्तदिति न वाप्यनुमतौ अन्यथा तत्र प्रामाण्यग्रहस्यासं न वाच्यः एवं च व्यवसायापन्नति
मपि न तत्त्वमनुव्यवसायेन तथा ग्राह्यमवनं हि ज्ञानीतरोपस्थापितमेव ज्ञानं मनसा प्रामाण्यग्रहः न तु योगसन्निकृष्टत
स्मिन्नितरथमानमस्ति न हीन्द्रियस्यार्थस्वभावोयदुपनीतं उपनीतवृत्तेनयेवग्रहणातिनथासति सुरभिचन्दनमित्यादिचा
क्षुषज्ञानानुत्पत्तेः॥ मनसस्तथास्वभावत्वेपि नास्ति मानाभावात् अहंगौर इत्यादिप्रत्ययाच्च॥ न चायं चाक्षुष एव।
आत्मविशेष्यकत्वानुपपत्तेः॥ मीलिताक्षस्य न स्वभावाच्च॥ अन्यथा व्यवसाये घटविषयकत्वमपि नालिखेत॥ न च सं ॥५१॥

शयानुपपत्त्यास्वतस्त्वावतारकत्वनं तस्यनिरस्तत्वात्॥ तथाच कथं न परतस्त्वायोग इति॥ किंचैवमपि विषयविशिष्टानुव्यवसा
यानंतरं ज्ञानामीत्यनुव्यवसायानुव्यवसायेन तद्धेतुबाधकाभावएव तस्यापि तद्ज्ञानविषयकज्ञानजन्यत्वादुक्तज्ञानवत्व
तथाच तदनंतरं कथं प्रामाण्यसंशयः॥ यदि च तन्निश्चयसामग्रीसत्वेपि दोषांतरान्न तन्निश्चयस्तदा ममापि तुल्यमिति॥ अ
पिच मनसा चैवं प्रामाण्यग्रहे परतस्त्वापादनेपि किमिति प्राग्लवीयसंस्कारानुसरणमप्रामाण्याभावानुसरणं मतं चोपप शुमानाय
द्यतमिति॥ तद्ज्ञानेति॥ अत्र जन्यपदद्वयं स्वमतेन परमते व्यावर्त्यप्रसिद्धेः॥ अत एवमर्वतियैवं कृतमिति॥ मनसा चैवं प्रा व्या.५
माण्यग्रहस्य तद्ज्ञानविषयकजन्यज्ञानजन्य[illegible]त्वान्न परतस्त्वतानिरिति युक्तः पाठः॥ अन्यथा हृद्या स्वयमुक्तत्वात् तु
उदाहरन्ति॥ यथेति॥ प्रमा॥ शरीरत्ववति शरीरत्वप्रकारकमित्यर्थः॥ शरीरेशशीति॥ शरीरत्ववतीत्यादिसाध्यसत्वादित्यर्थः॥
एतनेति॥ निरस्तमित्यन्वयः॥ यादृशेनेति॥ शरीरज्ञानत्वं त्वमसाधारणं शरीरविशेष्यकज्ञानत्वं वा प्रामाण्यरूपं साध्यमेव अ
न्यच्च दुर्वचमित्यर्थः॥ शरीरमिति॥ शरीरत्वमात्रप्रकारकज्ञाने पक्षः॥ तत्र करादिमत्वप्रकारकत्वमप्रसिद्धमित्यर्थः॥ विष
यत्वमिति॥ विशेष्यत्वेन स तत्त्वार्थस्तथा तु युक्तानुज्ञासनंभावादित्याशयः॥ ननु करच[illegible]ज्ञानविषयकशरीरत्वप्रकार
कज्ञानान्यशरीरज्ञानत्वादिनिदेनुस्तथा च नासिद्धिः॥ शरीरत्वावच्छेदेन शरीरत्वप्रकारकत्वाभावादित्यत आह नन्वेति॥ फ

52

त्सुखीमनवस्थां निराकरोति॥ अत एवेति॥ यतो प्रामाण्यशङ्काभ्यस्यमेव ज्ञानं स्वार्थानुमापकमित्यर्थः॥ अन्यथेति॥ य
दि प्रामाण्यज्ञाने प्रामाण्यसंशय आवश्यक इत्यर्थः॥ तद्दूषणमित्युपलक्षणं मिश्रमतेपि द्रष्टव्यं॥ गुरुमतेपीति॥ यदि स्व
प्रामाण्यस्य स्वग्राह्यत्वावधारणेन प्रवृत्त्युपयोगित्वं तस्यावश्यवेद्यत्वान्नावासप्रामाण्यत्वावच्छेदेनैव स्वग्राह्यत्वावधारणा
दुत्तरोत्तरज्ञानप्रामाण्ये स्वग्राह्यत्वानुमानानुसरणेनावश्यं त्वावाच्यं॥ तन्मते नानवस्था तदोभमप्युत्तरोत्तरसंकेतज्ञा
नप्रामाण्यस्यावधारणेन प्रवृत्त्युपयोगित्वं तस्यावश्यवेद्यत्वान्नावासप्रामाण्यलक्षणादिना प्रथमतएव सकलप्रामाण्यावधा
रणादुत्तरोत्तरज्ञानप्रामाण्यानुमानानुसरणं नावश्यं नावान्नानवस्थेति तुल्यमिति भावः॥ अनेनेत्यनवस्थय॥ नि
श्चितेपि विषये ज्ञानाविषयत्वरूपसमानधर्मादेव संशयोत्पत्तेः कुशलत्वान्न तु प्रामाण्यसंशयादित्यत आह ज्ञानेनेति॥ तदपि प्रा
माण्यसंशयसहायमेव तत्र संशायकमन्यथा सदेवसंशयापत्तेरिति भावः॥ ननु किं प्रामाण्यग्रहणं पुरोवर्त्तिनि करादिम
त्त्वग्रहोति विशेषदर्शनादेव संशयाभाव तदभावे तु करादिमति पुरुषत्वज्ञानत्वादेर्लिङ्गस्याग्रहात्कथं प्रामाण्यग्रहः
कथं वा विशेषदर्शनं विना तस्मिन् संशयो न रथपुरुषत्वादिप्रत्यक्षं जायते तस्य तद्धेतुकत्वादिति चेत्॥ अत्र वदन्ति॥
द्वि [illegible] यत्र पुरुषत्वादिव्याप्यत्वेन गृह्यमाणकरादि पुरोवर्त्तिनि गृह्यते तत्र विनैव तज्ज्ञानप्रामाण्यग्रहं विशेषदर्शना
देव पुरुषत्वादिनिश्चयः॥ यत्र पुरोवर्त्तिनि पुनर्गृह्यमाणकरादौ पुरुषत्वादिव्याप्तिग्रहं विनैव प्रथमोत्पन्नपुरुषा ॥५२॥

दिज्ञानएवकरादिमत्तिपुरुषज्ञानत्वादिकंपुरुषादिमात्रत्वव्याप्यतयाऽवगम्यते। नचतज्ज्ञानप्रामाण्यनिश्चयानंतरंपुरुष
इत्यन्वयः॥ नचव्याप्यवत्तिव्यापकज्ञानत्वमग्रहीतत्वाविपक्षबाधकाभावेनप्रामाण्यव्याप्तिरेवनगृह्यतइतिवाच्यं॥ श्र
शृंगादिनापिव्याप्तिग्रहसंभवात्। विपक्षबाधकाभावस्यापिसंभवात्तच। तदानींपुरुषादिप्रमाविषयत्वस्यैवपुरुषादि ग्रो२
व्याप्यस्यदर्शनान्नात्योदोषइति॥ पात्विति॥ तन्मयापिवाच्यमितिसंबंधः॥ तथाचसर्वत्रनाप्रामाण्यशंकायेनानवस्थाशं
कास्यादितिभावः॥ तत्समानविषयकेति॥ ननुप्रथमज्ञानेप्रामाण्यनिश्चयेपिद्वितीयज्ञानेकथंनाप्रामाण्यशंकातत्रविशेष
१ ग्र दर्शनाभावात्। नयत्रैवधर्मिणिकरादिमत्वज्ञानेपिपुरुषत्वसंशयोनुत्पन्नविरोधादितिचेत्। अत्रवदंति॥ द्वितीयज्ञा
नस्यपूर्वज्ञानानुव्यवसायस्तद्धर्मिज्ञानाभावादेवनतत्राप्रामाण्यसंशयः॥ अनुव्यवसायश्चेत्तत्तदाविशेषदर्शनादेवनतत
संशयः॥ नद्यनुव्यवसायेपूर्वज्ञानग्रहे तत्प्रामाण्यस्योपनीतस्यज्ञानमितिनियमात्तन्नचतत्तत्त्वेनपूर्वभानानान्तरोपनय
इतिवाच्यं॥ यदवच्छेदेन [illegible] यत्रगृहीतेतत्रतद्ग्रहस्यैवोपनीतभानसामग्रीत्वात्तथाचतद्विषयकत्वावच्छेदेनपूर्वज्ञाने
प्रामाण्यग्रहात्तद्विषयकत्वेनज्ञानेद्वितीयज्ञानेतदुपनयेबाधकाभावएवातएवप्रामाण्यानुमानमथवेत्तत्संनिरूसंतिज्ञा
नान्तरेतदुपनीतस्याप्रामाण्यसंशयाभावेप्रवर्तकज्ञाननिर्वाहादिति॥ अन्येतु अन्यत्रसमानविषयकेस्याविरोधिज्ञा

53 तस्य प्रतिबंधकत्वेपि प्रकृते तेनान्यगत्याभिन्नविषयकस्यापि तथात्वं कल्प्यत इत्याहुः॥ अनुमितिप्रामाण्यपरतस्त्वे शंकावि
रोधं परिहरति यत्विति॥ स्वतोग्रहपक्षे तत्वाद्युपचारकल्पनमिति तात्पर्यः॥ तत्र धूमवति वह्निज्ञानत्वमिति॥ ननु धूमव
तिवह्निज्ञानत्वमित्यनेन न धूमप्रकारकत्वे सति वह्निप्रकारकत्वं विवक्षितं धूमवद्विशेष्यकत्वे सति वह्निप्रकारकत्वं वा॥
नाद्यः॥ तस्य त्वन्मते रूपवत्यनुमितावपि सत्वेन प्रामाण्यनियतत्वाभावात्॥ नांत्यः॥ तस्यानुव्यवसायाग्राह्यत्वात् तद्ग्राह्य
त्वे वा धूमवत्त्वांशे तत्र स्वतः प्रामाण्यग्रहापत्तेः॥ तत्र चेष्टापत्तौ किमपराद्धं वह्निमत्त्वांशे स्वतः प्रामाण्यग्रहणं प्रत्यक्षत
तद्दशाएव प्रामाण्यशंकाविरहस्वीकारात्॥ तत्र स्वीकारे तु युक्तो न तु धूमवत्त्वांशे तद्ग्रहे परामर्शस्यानुमितावपि तत्र शंकया अ
प्रतिरोधात्॥ न च तत्र प्रतिरोधकस्य धूमवत्त्वांशे व्याप्यस्फुरणादेरभावादिति चेत्॥ अत्र वदंति॥ लिंगज्ञानादीनामप्रामाण्य
शंकाविरहे तज्जन्यानुमितावुत्तरकाले प्रामाण्यसंशये बाधकाभाव एव॥ यत्र तु लिंगज्ञानस्यैव प्रामाण्यशंकाकलंके
नानुमित्यनुत्पादस्तत्र प्रामाण्यानुमित्या लिंगनिश्चये सत्यनुमितिरिति तदनुमितौ धूमवद्विशेष्यकत्वं नास्ति तु महति
समानविषयकज्ञानांतरवदिति तदनुमितिविशेषाभिप्रायकोयं ग्रंथ इति॥ अनुव्यवसायस्येति॥ अनुव्यवसायत्वस्ये
त्यर्थः॥ नन्वस्य प्रामाण्यनियतस्यापि तन्नियतत्वेनाग्रहात्कथं तज्ज्ञानस्य संशयनिवर्त्तकत्वं नहि व्याप्यज्ञानमात्रात्संशय ॥५३॥

निवृत्तिरन्यथा तेषु प्रवृत्तिर्न भवति संशयो न स्यात्। एवं धूमवह्निविषयकत्वस्याप्यनुमित्यनुव्यवसायेन ग्रहेऽपि कथं न संशयनि
वृत्तिरित्यनुपपन्नोऽयं ग्रंथस्तस्मादेतन्निष्यं। केचित्तु धूमवह्निविषयकत्वादेः प्रामाण्यव्याप्यतया पूर्वं गृहीते त्व तच्चरमसंस्कारे
सति संशयानवस्थावत्त्वं दशानास्वरूपेणापि न तदुहस्य प्रतिबंधकत्वमित्येवानन्यगत्या कल्पनमित्याहुः। यत्र तन्निय
तत्वेन कदाचित्तस्योपनयस्तन्मात्राभिप्रायकोऽयं ग्रंथ इत्यप्याहुः। विशेष्येति निष्ठेति। यद्यपि निष्कंपप्रवृत्त्युपयोगि तद्वति
तत्प्रकारकत्वरूपं प्रामाण्यं तथापि संशयानुपपत्त्या तदपि न स्वतो ग्राह्यमिति भावः। एवं सति ज्ञप्तिप्रवृत्तेरनुपपाद्येद्वति
ज्ञप्तीति। अत्राप्यप्रामाण्यशंकानिवृत्तिः पूर्ववदेव वाच्या प्रामाण्यज्ञानप्रवर्तकमित्यस्य पेत्याह ज्ञप्तीति। संतम
वधानं प्रामाण्यानुमितिसामग्रीसमवधानं तथा च प्रवृत्तिरपीति तन्नैवं तीकारणतयाश्रयेति प्रामाण्यग्रहमाक्षिपेदत्या
पि ज्ञप्तीति लिंगादिसमवहितादिसमवधानं। ननु स्वतः प्रामाण्यं तस्य निषेधादिति भावः। तदनुरूपमेवोदाहरति नहीति।
केचित्तु यत्र व्यवसायप्रामाण्यग्रहाधीनाऽप्रामाण्यशंकानिवृत्तिस्तत्रैव तत्सामग्रीविलंबात्तदिति प्रवृत्त्यनुपपत्तिरि
त्यत आह स्वादितीति। छ। प्रसंगादाह अप्यधतचेति। अत्र ज्ञानप्रामाण्यं ज्ञानसामग्रीमात्रप्रयोज्यं नवेति विप्रतिपत्ति
रित्याहुः। स्वतस्त्वस्य विवरणं ज्ञानेति। विपक्षबाधकं तर्कमाह तज्जन्यं इति। यद्यप्यत्र यथार्थत्वे व्यधिकरणं तथा

54

पिप्रमात्वं यदि ज्ञानसामग्रीमात्रप्रयोज्यवृत्तिः स्यात्तदा प्रमात्ववृत्तिः स्यात् अप्रमात्ववदित्यापादनीयं। अप्रमायां दोषजन्यत्वाद्दृ
ष्टान्त आपादकासिद्धिरित्याह ज्ञानेति॥ न हीति॥ यथा घटसामग्र्या नीलानुभवेनात्र उत्पद्यमानो नीलघटो घटविशेष
एवं प्रमासामग्र्या दोषानुपदेशादुत्पद्यमानोऽप्रमाविशेषः स्यात्। अन्यथा ज्ञानविशेषोऽपि न स्यादित्यर्थः॥ न स्वतः प्रत
वतिष्ठते अयेति॥ तथा च दृष्टान्वयव्यतिरेकानुविधानात् गुणदोषानप्रमाप्रमाहेतू इति भावः॥ तयोरिति प्रमाप्र
मयोरित्यर्थः॥ न तत्सामग्री विशेषसामग्री॥ सामान्यसामग्री ज्ञानिकेति शेषः॥ अन्यथा विशेषवदिहेति सामान्यकार्ये हि
त्यापत्तेरिति भावः॥ ननु सामग्र्याः कार्येऽपि तत्सामान्यसामग्रीसत्त्वे सामान्यकार्योत्पत्त्यापत्तिर्विशेषेणापि निवारयितु
मशक्येति अत आहेति वित्तेति॥ तथा च गुणाद्यभावस्य सामग्र्यभावसंपादनद्वारा प्रमाद्यभावप्रयोजकतया गुणा
देः प्रमादिप्रयोजकत्वमस्त्येवेति भावः॥ अन्यथेति॥ त्वदुक्तरीत्यान्यत्रापि कारणविशेषस्य दृष्टान्वयव्यतिरेकानु
विधायित्वाभावादिति भावः॥ तद्व्यक्तिनेदः॥ अप्रयेति॥ तथा च प्रमात्वावच्छिन्ने तु गुणो न तु गुणहेतुरिति भावः॥ उपाधित्वेन स्व
लक्षणं नित्यवृत्तित्वं न त्वपि इष्टव्यं॥ कार्येति॥ अनित्यप्रमात्वं कार्यतावच्छेदकं कार्यमात्रवृत्तित्ववदित्यर्थः॥ घटज्ञानत्वा
दाविति॥ नित्यज्ञानपक्षे घटनित्यज्ञानत्वादावितिबोध्यं॥ बाधमुक्त्वा विरोधमुक्त्वा नासमाहज्ञानाजनकेति॥ केचित्तु ज्ञानाज ॥५८॥

नकत्वेनयदभ्युपगतेनजन्यत्वेसाध्येविवक्षितेनविरोधात्प्रतिज्ञाविरोधादित्यर्थः॥ प्रमायाज्ञानत्वेनतज्जनकजन्यत्वाभ्युपगमाव
श्यंभावेननतद्विपरीताभ्युपगमात्प्रतिज्ञाविरोधस्याभ्युपगमसमादायेवगृहीतेरित्याह॥ दृष्टांतेपिसाध्यविकलइत्याह॥ अप्र
मायामिति॥ व्याप्यत्वासिद्धिमाह॥ न्यर्थेति॥ विशेष्यतदर्थानन्युत्सत्याविशेषणपदेनविशेष्यातिधानाद्यर्थविशेष्यत्वादित्य
र्थः॥ जन्यमात्रएवसाध्यसत्वात्॥ यद्वाहेतुजन्यत्वस्यैवव्यापकत्वेसाध्येयथविशेषणत्वबोध्य॥ व्यावर्त्येति॥ प्रमायागुण
जन्यत्वासिद्धिदशायांजन्यपदव्यावर्त्यस्येश्वरज्ञानस्याप्रसिद्धेरित्यर्थः॥ वैदिकप्रमाहेतुगुणाश्रयत्वेनवक्तृसिद्धेरितिता
वत्॥ ननुज्ञानत्वावच्छिन्नसामग्र्यतिरिक्तसामग्रीजन्यत्वंनविवक्षितंयेनेंद्रियादिनासिद्धसाधनंस्यात्॥ अपितुज्ञानत्वाभि
व्यंजकसामग्र्यतिरिक्तसामग्रीजन्यत्वमित्यतआहविरोधाच्चेति॥ सामग्रीद्वयमिति॥ तथाचनविरोधइतितावत्॥ प्रमा
याइति॥ ज्ञानत्वप्रयोजकज्ञानसामग्रीजन्यत्वाभावादित्यर्थः॥ हेतुसिद्धिः ज्ञानत्वहेतुत्वप्रसिद्धेरित्यर्थः॥ तथाचनदृष्टांतेसा
ध्यस्याप्रसिद्धिरितितावत्॥ ज्ञानत्वस्यनित्यवृत्तित्वेपिकार्यतावच्छेदकत्वंस्यादित्याशंकतेअथेति॥ यद्धर्माक्रांतस्यासतः
सर्वस्यसत्वंयद्धेत्वधीनंतत्तद्धेतुप्रतियोगिककार्यतावच्छेदकमित्यर्थः॥ तेनप्रमेयत्वादेर्नदंडादिजन्यतावच्छेदकत्वापत्तिरिति
ध्येयं॥ ज्ञानत्वेनतथेति ज्ञानत्वाश्रयायावानुत्पन्नतावतःसर्वस्यैवसत्वंमनःप्रभृत्यधीनमितितत्कार्यतावच्छेदकंज्ञान

55

त्वं न वक्तव्यम्॥ असत इति॥ यद्धर्मावच्छिन्नस्य सर्वस्य सत्त्वं यत्कृत्यधीनं तत्कार्यतावच्छेदकमित्येवास्तु न तु सत इति गौरवात्॥ एवं
च ज्ञानत्वेन कार्यतावच्छेदकमिति भावः॥ व्योमादीति॥ व्योमादिसाधारणस्य च मुक्तिनिष्ठत्वं वर्तमानत्वमात्रेण स्यादेतदेव नियम
म्यतावत्॥ हि तु नियम्यत्वं हि हेत्वधिकरणलक्षणाव्यवहितोत्तरक्षणावच्छिन्नत्वं भवोत्पत्तिर्नित्यसत्त्वं तथाक्षणोत्तरपि
घटादिसत्त्वस्य संभवात्तथा वा सत इति विशेषणेन सत्त्वमुत्पत्तिर्लभ्यते। तेन यद्धर्मावच्छिन्नस्य सर्वस्योत्पत्तिर्यत्कृत्यधीना तन्नियम्य
त्वं तात्पर्यम्॥ नन्वेवं घटत्वादिसमनियतकम्बुग्रीवत्वादावतिव्याप्तिरिति चेत्। न लघुत्वेन धर्मविशेषणादित्याहुः॥
नन्वेवमीश्वरादिजन्यतावच्छेदकं जन्यत्वं न स्यात् सत्त्वादेरेव लघुत्वेन तथात्वसंभवादिति चेन्न एतन्मते इष्टापत्तेः
ज्ञानत्ववन्नित्यवृत्तेरपि तस्य तथात्वाविरोधात्॥ यादृशेति॥ तथा च कृत्यधीनत्वस्यार्थस्य निरूपकतया सत इति विशे
षणं अतिगौरवकरमिति भावः॥ न चैवमपि नीलघटत्वादावतिप्रसंगः बाधकाभावसत्त्वेनेति विशेषणात्।
तदर्थं स्वयमेव वक्ष्यते॥ अनित्येति॥ यद्यपि मीमांसकमते ज्ञानत्वमपि कार्यतावच्छेदकं तथापि न्यायमते नास्य। तेषां
नामिति मन्तव्यम्॥ सिद्धसाधनमिति॥ यद्यपीदं ज्ञानत्वगर्ते प्रथमसाध्येऽपि तुल्यं तथापि दोषान्तरस्यादृष्टतयेदमुप
क्षितम्॥ प्रमात्वमिति॥ यद्यपि कार्यतावच्छेदकमित्यनावश्यकं गुणत्वसिद्धिस्तथापि ज्ञानशरीरादिनिष्ठकारणतापतितया॥ ५५॥

तिककार्यतावच्छेदकत्वेनार्थान्तरवारणाय विशिष्टसाध्यानुपादानमिति केचित्‌ ॥ वस्तुतः प्रमात्वप्रविष्टज्ञानत्वस्य लाघवेन
तदवच्छेदकत्वमिति बाधादेव नार्थान्तरं ॥ अतस्ताद्रूप्यसिद्धये विशिष्टसाध्यमुपात्तं ॥ अतएव सिद्धान्ते अविशिष्टमपि साध्य
मस्त्येवेति भावः ॥ ज्ञानत्वसाक्षादिति ॥ अत्र वैशिष्ट्यं ज्ञानसाक्षादिनाजकोपाधित्वादित्यत्र समुदायस्य तात्पर्यं ॥
विधानविधावत्तिनत्त्वप्रथमविनाशात्‌ ॥ एवं च ज्ञानत्वव्याप्यतान्निन्नतिन्नत्वादिव्याप्यत्वेन प्रमात्वस्य नासिद्ध्यादि
शितिध्येयं ॥ प्रमात्वस्येति ॥ तथा च बाध इति भावः ॥ एतद्देपलक्षणं ज्ञानत्वस्य नित्यवृत्तितया कार्यतानवच्छेदकत्वेन
साध्याप्रसिद्धिरित्यपि द्रष्टव्यं ॥ तथेति ॥ कार्यतावच्छेदकमित्यर्थः ॥ अनित्यधर्मेति ॥ इन्द्रियादिकं तु न तथा हेतुरिति
भावः ॥ न च प्रागभावव्यक्तिविशेषणार्थानेरभावत्वेन विशेषणादित्याहुः ॥ ननु विषयत्वातिरिक्तेन रूपेण हेतुताविव
क्षितेत्यत आह ज्ञानत्वेनेति ॥ ननु प्रमापदेन सर्वविशेषप्रमा विवक्षितेति नाकदोष इत्यत आह कारणेति ॥ तर्कमाह यदीति ॥ न
न्वीश्वरज्ञानव्यतिरेकेति चेत्‌ ॥ न ॥ जन्यत्वेन विशेषणादित्यके ॥ अप्रमाविज्ञानीयेकार्यं न स्यादित्यपरे ॥ वस्तुतस्त
प्रमा न स्यादित्यापादनीयं ईश्वरज्ञानं तु प्रमाप्रमाबहिर्भूतमवतिमतनास्य निधानमिति ॥ अप्रमाव्याप्टेरिति ॥ संयो
गत्वावच्छिन्नं प्रतिद्रव्यत्वेन जनकत्वादित्थमपि द्रष्टव्यं तथेति न जन्यत्वेनासिद्धसाधनमित्यर्थः ॥ तर्कोपीति ॥ अ

56

तिः समुच्चये॥ तथा च तर्कानुमानीयाप्रयोजकमित्यर्थः॥ प्रमाप्रमान्यतरत्वादिति॥ न चेश्वरप्रमायां व्यभिचार इति वाच्यं॥
जन्यत्वेन प्रमाविशेषणात्॥ ईश्वरज्ञानं प्रमाप्रमाबहिर्भूतमिति मतेनेत्याह॥ विशेष्याह चाक्षुषानेति॥ स्वविरोधीति॥
अत्रानुमतवगहणे स्वविरोधिस्मृतिप्रतिबंधकानुमतसामग्रीजन्यत्वेन सिद्धसाधनवारणाय॥ स्वपदं समर्थयत्याह
तत्परं॥ हेतावप्यनुमतपदं स्मृतावेव व्यभिचारवारणाय॥ निर्विकल्पकव्यभिचारवारणाय सप्रकारकत्वं हेतुविशेष
णमिति केचित्तु॥ वस्तुतोऽनुमतत्वं जातिरिति न वैयर्थ्यशंका॥ बाधं निराकरोति दूरादिति॥ दृष्टान्ते साध्यवैक
ल्यं निराकरोति अप्रमायामिति॥ नन्वेवमनुगतहेत्वनुमात्वावच्छेदकत्वस्य स्वरसादाकांक्षेति॥ यत्र तत्संतवस्तत्र बाध
काभावादस्तु तथा अत्रानुमतसंतवरहितभावः॥ नवेति॥ नाहमित्यनुमतत्वे दोषत्वं जात्यवच्छेदेन तद्रुपनयहेतुत्वेन इत्य
वादित्यर्थः॥ जातिसंकरादिति भावः॥ ननु नाहत्वं जात्यवच्छि[illegible]प्रधिनयप्रमाजनकत्वादिना तद्धेतुत्वमस्त्वि
त्यत आह अपमतेति॥ अनियतसत्त्वेऽपि आत्मादिर्विशेषः॥ एतच्चोपलक्षणं आत्माश्रयात्तद्ग्रहणे तज्ज्ञानकत्वाव
च्छेदकमित्यपि बोध्यं॥ तन्मात्रेति॥ स्वध्वंसादिकं प्रत्यपि जनकत्वादिति भावः॥ ननु प्रमामात्रे अनुगततद्गुणत्वावे
च्छिन्नयथार्थपरामर्शत्वादिकमनुमित्यादावनुगतमस्ति तावतापि गुणसिद्धिरित्यत आह॥ यथेति प्रमामात्रेऽनुगतगु॥५६॥

प्रामाण्यं विपिनाकस्मिकत्वं तथाङ्कुरस्थलेपीत्याशयात्॥ प्रतिबन्दिमुखेन समाधातुं भूमिमारचयति॥ एवमिति॥ यद्यपि प्रथ
म्यादिवादिनं न तदस्मत्प्रतिनायमनुयोगस्तथापि दोषपक्षेप्यत्तत्ववादिनं मीमांसकं प्रत्येवेदमिति ध्येयं॥ पित्रादिरन्वयाद्यनुविधा
नान्नहेतुरूपेण तथामीमांसकेषाञ्च न तस्य हेतुत्वं साध्यमेकस्मात् तदस्य मीमांसकोपसत्यवचोत्तरमित्यन्वय॥ नहीति॥ न तावदन्व
यव्यतिरेकादिप्रमाणापदर्शनेन प्रादिबीजादिरनुवर्तत इत्यादिनिरस्तं बोध्यं॥ पित्राद्यतायदिनश्यते॥ ननु न्यायनये गुणहे
तुत्वस्यावश्यकत्वात्तेनैवान्यथासिद्धा पित्राद्यन्वयस्य हेतुत्वमानाभावइति वाच्यं॥ न्यायावयवादिद्वयसन्निकर्षस्य त्वेपि
नादिस्तत्वस्य स्वप्रमाने न वर्तिकितु पीनर्थीरिति तस्याप्यपसीयात्॥ नच तत्सामग्र्येव नेत्रान्तिवद्धिके निवार्या धर्मि
ज्ञानकाले तत्सामग्र्यभावेपि भ्रमस्य प्रमात्वसत्वेन॥ ननु व्यक्तिविशेषस्यैव हेतुत्वात् तत आह अपिचेति॥ नव्यक्तेरेव
ति हेतुहेतुमद्भावदर्शनदोषः॥ व्यभिचारादिति॥ तत्र बीजव्यक्तेस्तत्र बीजव्यक्तित्वेन तत्तदङ्कुरं प्रति प्रयोजकत्वेऽङ्कु
रजातीयं प्रति बीजजातीयस्य बीजत्वेनाप्रयोजकतया बीजत्वस्यापुरस्करणीयत्वात् बीजेति॥ पिकुतश्चिदिति
विशेषादङ्कुरव्यक्तिविशेषस्यासादृश्यप्रसंगेन व्यभिचारप्रसंगात् इत्यर्थः॥ अतिप्रसंगादिति॥ बीजसत्त्वेपि बीजव्यक्ते

५७ वत्व अबीजयक्तेरपि तद्धेतुत्वापत्तेस्तद्व्यक्तित्वमात्रस्य तत्राप्यविशेषादित्यर्थः॥ अनुगतमिति॥ यथा चैतत्तथाग्रेव
क्ष्यते। घटज्ञानजातीयमिति॥ अत्र यद्यपि घटज्ञाने घटेंद्रियसन्निकर्षो न तत्त्वेन हेतुः किंतु विशेष्येंद्रियसन्निकर्षत्वे
नैव तथापि तद्विजातीयपटज्ञानजनकपटेंद्रियसन्निकर्षः विजातीयो नवत्येवेति न दोषइति तावत्॥ स्वविरोध्यनुत्वे
ति॥ अत्र जातीयपदमर्थांतरनिरासाय॥ अप्रमाप्रतिबंधकस्य यक्तिविशेषस्यानुकूलत्वेपि यत्तः प्रतिबंधकजातीया
वो भावे ऽज्ञानान सिद्धसाधनत्वमित्याहुः॥ घटादौ स्वविरोध्यनुत्पत्तिसिद्धेर्व्याप्यत्वासिद्धिः॥ स्यादेतत आह अनुत्वे
ति॥ अनित्यधर्मत्वमिति॥ ननु त्वत्र पक्षे साध्यप्रसिद्धिं विना बाधकं विनेत्यसिद्धं न सिद्ध्यत्येव तावन्मात्रस्यैव गमकत्वे विशेष
वैयर्थ्यादिति चेत्॥ अत्राहुः॥ अवच्छेदकांतरोपपन्नकार्यत्वाधिकरणत्वरूपबाधकस्यावच्छिन्नकार्यत्वप्रतियोगिक
कारणासत्त्वरूपबाधकाभावस्य नित्यकार्यमात्रवृत्तित्वादित्यर्थः॥ तथा च सत्यं तेन विशेषणद्वयेन नीलघटत्वपटत्वनि
त्यज्ञानत्वादौ व्यभिचारनिरस्तेज्ञानत्वादौ व्यभिचारवारणाय भिन्नपदं॥ एवमपि बाधकांतरेणकस्यचित्कार्यतानव
च्छेदकतया यदि व्यभिचारशंका तदा तद्वत्त्वेनापि न हेतुविशेष्यः॥ न तु बाधकसामान्याभावो हेतुविशेषणीयेन
विशेषणवैयर्थ्यं स्यादिति ध्येयं॥ नन्वेवमपि ज्ञानत्वादौ नित्यवृत्तितया स्वावच्छिन्नकार्यत्वप्रतियोगिककारणासत्त्वा ॥५७॥

त् सर्वप्रतिकेनैव व्यभिचारवारणात्तेषवैयर्थ्यं ध्वंसत्वस्यैवेति चेन्न॥ स्वावच्छिन्नकार्यमात्रवृत्तिकार्यताप्रतियोगिककार
णासंभवस्याविवक्षितत्वात्॥ ज्ञानत्वावच्छिन्नयावत्कार्यमस्मादादिज्ञानं न घटितकार्यताप्रतियोगिककारणासंभवेना
स्ति आत्ममनोयोगादेरस्मदादिज्ञानकारणस्य संभवादिति॥ ननु तथाप्यत्र बाधः॥ अनित्यप्रमात्वं हि ज्ञानकार्यतावच्छेदकं
स्यात् यदि ज्ञानत्वव्याप्यकार्यताप्रतियोगिककारणतावच्छेदकं किंचिदेकं स्यात् न चैतदस्ति तत्र गुणेषु गुणत्वस्येव स्यात्
थात्वेन तस्याभावात्॥ न चावहेतो विशेषणासिद्धिरपि॥ एवं च दोषत्वस्यापि तथात्वेन तस्याभावात् अप्रमात्वमपि न कार्यताव
च्छेदकमिति दृष्टान्तेऽपि साध्यविकलश्च रनिवत्॥ अत्र वदन्ति॥ एकमनुगतं नास्त्येव तथापीदमनुमानं॥ अनित्यप्रमात्वं॥ स्वा
धिकरणमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्ति॥ स्वाधिकरणमात्रवृत्तिधर्मावच्छिन्नकार्यताप्रतियोगिककारणता
श्रयमात्रानुत्पाद्यकार्यमात्रवृत्तिधर्मत्वात्॥ अप्रमावदित्यत्र तात्पर्यमिति॥ तन्न॥ संदिग्धासिद्धेः॥ नन्वत्र त्वयार्थनिराशे
त्वात् गुरुः॥ यत्तु विशेष्यवृत्तिविशेषणज्ञानत्वमनुगतं तद्धेतुतावच्छेदकं न चात्र मानाभावः॥ जन्यविशिष्टज्ञानसामान्ये विशेष
ज्ञानत्वेन हेतुतया विशेष॰योरपि हेतुहेतुमद्भावावश्यंभावात्॥ यत्सामान्ययोः सामान्यमिति न्यायात्॥ न चाभावत्वस्यापि
वैनुपस्थितस्यैव प्रकारत्वाभ्युपगमेन तद्विशिष्टज्ञानावच्छेदत्वप्रसङ्गे व्यभिचार इति वाच्यं॥ सामान्ययोरप्येवं हेतुहेतुमद्भावो नाप

58

त्रेरितियथाश्रुतएवग्रंथस्वरसाधुरितितन्न।।लोहितस्फटिकइत्यत्रलौहित्यसाक्षात्संबन्धविषयकत्वमेवव्यभिचारात्।।लौहित्य
रूपविशेषणस्यपरंपरासंबंधेनविशेष्यवृत्तित्वात्।।नचतत्संबंधविषयकप्रमायांतत्संबंधेनविशेष्यवृत्तित्वेयद्विशेषणंतद्वन्
त्वेनहेतुर्नतिवाच्यं।।एवंहितत्संबंधविषयकतद्विशेषणविशेष्यप्रमात्वकार्यतावच्छेदकंतत्संबंधेनतद्विशेषणज्ञानत्वंका
रणतावच्छेदकमितिअननुगमेनयथाश्रुतबाधएव।किंचप्रतिबंधाद्यननुगतत्वादभाववद्विशिष्टप्रत्यक्षेव्यभिचारएवेति।।अ
न्येतुज्ञानाद्यप्रमायांभाव्यविशेषस्यवाव्याप्यस्यप्रमाहेतुरितिप्रमासामान्यगतयप्रमासामान्यमीश्वरस्येवगुणः।।तद्विशेष
योःकार्यकारणभावकल्पनेन्यायादित्याहुः।।तच्चिंत्यंभ्रमापप्रमाभावस्यातिप्रसक्तत्वात्।यत्रयत्रसंवृत्तत्रतत्प्रमाहेतुर्वाच्यात
थाचतत्तद्यप्रमायांविहितत्वप्रमाहेतुरित्यननुगमात्।प्रमाभावेनानुगतोगुणस्त्वत्यभिमतग्रंथविरोधात्।।अप्रमात्वंहेतुनेसाध्येव्येक
त्यस्यतथाप्यनुद्धारात्।।नचाप्रमात्वपदंतत्तद्यप्रमापरमितिवाच्यं।।एवंचप्रमात्वपदमपितत्तत्प्रमात्वपरमेवास्त्विति किमनु
गतगुणाग्रहेण।।नचैवमप्यनुगतस्यप्रमाहेतुत्वमितिपूर्वग्रंथविरोधइतिवाच्यं।।प्रत्यक्षादिप्रमायांभूयोवयवेन्द्रियस
न्निकर्षादिप्रत्येकमननुगतस्यैवहेतुत्वमित्यस्यपरत्वेनाप्युपपत्तेः।।तस्मादनित्यप्रमात्वपदेनानित्यसाक्षात्कारिप्रमात्वा
दिकमेवविवक्षितमित्येवतत्त्वमिति।।केचित्तुयथागुणत्वमननुगतंतथाप्रमात्वमपितथाचघटानित्यप्रमात्वंकार्यता ।।५८।।

वच्छेदकमिति साध्यं तत्त्वा हृष्टरूपेणानुमतौ गुणइत्याकुः॥ अस्येकेति॥ तथा चावच्छेदकान्तरोपपन्नकार्यत्वाधिकरणावृ
पबाधकसत्वान्नात्र व्यभिचार इति भावः॥ घटज्ञानत्व[illegible]विति॥ यदनित्यज्ञानत्वादेस्तावच्छिन्नकार्यतानिरूपितक
कारणतावच्छेदकरूपबाधकसत्वान्न व्यभिचार इत्यर्थः॥ अस्येकेति॥ तथा च यदनित्यज्ञानत्वादेः कार्यतावच्छेदकत्वरूप
साध्यस्यापि सत्वान्न व्यभिचार इत्यर्थः॥ एतच्चास्यरूपेत्योक्केवलस्यैतादृशस्य कार्यमात्रहेतुत्वेपि घटानित्यज्ञानत्वादेस्त
न्निरूपितकार्यतावच्छेदकत्वाभावात् भावः॥ अन्यथा घटत्वानुमानेपि नैवार्थान्तरं स्यादिति॥ न च पक्षतानुमाने दोषाभा
वेनार्थान्तरं गौरवात् अननुगतस्य तस्यापि तावाच्छेद्यस्यादुः॥ अनित्यज्ञानत्वव्याप्येति॥ अनित्यज्ञानत्वनिष्ठकार्यतावच्छे
दकधर्मत्वादित्यर्थः॥ चाक्षुषत्व माहत्वेति॥ अत्र चाक्षुषपदं सौपानायोनी॥ एवं रजनत्वमात्र नीत्येषामपि रजनपदं
तथैवेति निश्चयः॥ चाक्षुषमात्रस्यानीलघटत्ववत्पदार्थसमाजमहिम्नैवोपपन्नत्वात् दवच्छेदकत्वे साधकं चिन्त्यमिति के
चिदाहुः॥ नन्विति॥ नैयायिकस्येत्यर्थः॥ तत्र जन्यशब्दमात्रस्य पक्षत्वादीश्वरे प्रमाणाभावात् अपि व्याप्यत्वेत्यन पक्षमात्रव्या
वर्त्तकत्वात्तावन्न पक्षेतरसाध्याभावादिति तावत्॥ भ मत्य सपक्षस्येति॥ नन्वत्र मते तस्य पक्षेतरत्वपर्यवसानादनुपाधित्वं॥ भ मते
नस्य न त्वेपि बाधोन्नीतत्वेनोपाधित्वादिति तावत्॥ भगवदिति॥ नन्वत्र मते सपक्षता [illegible] वः बाधोन्नीतपक्षस्यैव सपक्षता
दिति तावत्॥ उक्तानुमानेषु दोषाभावेनार्थान्तरमित्याशङ्कते नन्विति॥ एवं च न स्वतन्त्रे [illegible] किरित्याह आगन्तुकेति॥ अ

59

साधारणेत्यर्थः॥ मुरारिमतमाशंक्य निराकरोति यद्यपीति॥ प्रतिबंधापरिहरतीत्येनेति॥ वेदान्त्यमात्रीकेन ज्ञायेति॥ ननु ज्ञाने
सदर्थविषयता नियमः स्त्येव नास्तितथा चासदर्थमात्रविषयकज्ञाने सदर्थविषयकत्वं तावत्प्रयोजकः सत्त्वत्वेव स्वतस्त्व
ग्रमाणमितिभावः॥ असत्ख्यातिनिरासादन्यथाख्यातावप्यर्थादेः सत एव नानात्वसम्भवाद्विषयकं ज्ञानमप्रसिद्धमिति तावत्॥ दोष
त्वावादिति॥ असदर्थविषयकारणतावच्छेदकत्वं तावत् तावत्सदर्थविषयत्वेन तत्र न स्यादिति दोषाभावोव्यभिचारी
त्विति तावत्॥ व्यभिचारमुद्धरति सदर्थमात्रेति॥ प्रतिबंदीमाह नहीति॥ सविदिति॥ धर्मग्रंथोयादोषश्च सत्धर्मग्रं दोषाभा
वासत्त्वेपिधर्मग्रंदोषाभावात्सत्त्वं स्यादेवेति तावत्॥ नाविति॥ गुणत्वेदभावादित्यर्थः॥ व्यभिचारान्तरायपिनादेहं प्रमा
प्रतिदोषाभावत्वं साधयितुमाह अपेक्ष्यादिकश्चिद्दोषइत्यंतं॥ असंत्वाद्येति॥ प्रमामायामपि हेतुत्वावाद्भ्रमभावहेतु
त्वासंत्वादिति तावत्॥ अन्यान्यथेति॥ दोषत्वज्ञानदोषाभावेन प्रमाहेतुरेव हेतुत्वं वत्ताद्धादे दोषत्व प्रमाहेतुस्याः
न्याम्यइत्यर्थः॥ व्यवस्थिति॥ धारावाहिकपरामर्षान्तररूपप्रत्यक्षप्रतिबंधकस्येत्यर्थः॥ नामादिति॥ अनन्यगतिकत
याऽननुगमेनेवकश्चिद्दोषः कश्चिदप्रमायाः कश्चिद्दोषाभावः कश्चित्प्रमायां हेतुर्वाच्यइतिभावः॥ स्यादेतदिति॥ अप्र
मामितिस्वरूपनिर्देशमात्रं भ्रमजनकत्वमात्रस्य वस्तुप्रमाणान्वयव्यतिरेकप्रयोजकत्वादिस्याकुक्षः॥ प्रमामकुर्वतीज्ञा
नहेतुस्तोमेमइकवर्साजनरूपदोषादद्भोरगच्छमः भ्रममेवाप्रकुर्वतीज्ञानहेतुस्तोमेमइकेवमांजनरूपदोषाभावेवंज्ञाप ॥५९॥

मतित्वतेनान्वयव्यतिरेकप्रदर्शनाय नहुक्तमित्यन्ये। ननु मंडूकवसांजनकृपदोषसत्वेपि तेनावंशेष्वासत्वेन दोषाभाव इ। प्रमाते
तुल्यत्वेनैव व्यभिचारादित्यत आह मंडूकवसेति। प्रमांशेति दोषाभावस्य व्यभिचारशंकने गौरवमिति। न हि सत्वशतेति विशेषादर्शे
नासत्वे गौरवमिति निरुक्तमासिद्धेरित्यर्थः। प्रमात्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितयोगिककारणताश्रयत्वं गुणत्वं अस्य च न्यूनम
साधारणतावच्छेदकावच्छिन्नकेशसाक्षात्कारत्वावच्छिन्ने हेतुत्वान्न तथात्वमित्याह तावच्छेदकेति। व्यभिचारवारणाय तावच्छेदकव
र्त्तीति विशेषणं तच्चाप्यावश्यकमित्याह तद्धेति। तचापीति। यद्यपि तावच्छेदकप्रमात्वस्यापि प्रमात्वव्याप्यत्वान्न द्रव्यवच्छिन्नकार्य
तानिरूपितयोगिककारणताश्रयत्वादस्य गुणत्वं न च त्वं च तथापि नावच्छेदकसाक्षात्कारमात्रं प्रत्येवान्वयव्यतिरेकानुविधायि
त्वाल्लाघवाच्च नावच्छेदसाक्षात्कारत्वमेव तन्निरूपकतावच्छेदकमिति भावः। ननु तावच्छेदकवर्त्तिस्थूलकृष्णत्वरूपविशेषके
ज्ञानमिति न प्रसंगवारणाय विचारेतिवाच्यं। तावच्छेदकवर्त्तिकेशसमानस्थूलविषयकेशकेसाक्षात्कारे सजातीयसंयो
गस्य हेतुत्वमित्यर्थात्। यद्वा एतदस्वरसादाह तन्मापीति।। मावत्वेनेति। यद्यपि तावत्त्व मति प्रसक्तेन तथापि भावत्वं भाव
धर्मो विशेषदर्शनत्वमिति भावः।। ननु विशेषादर्शनाभावो विशेषदर्शनत्वेनैव हेतुः ननु तद्ज्ञानाभावत्वेन गौरवादाह
तथा च सिद्धेनस्य गुणत्वमित्यरुचेराह किंवेति। नवा विशेषादर्शनस्य तत्र दोषत्वमिति मदीयग्रंथविरोध इति वाच्यं।।
मतानां यत्रिप्रायेण कल्पनात्। एतन्मते दृष्टविशेषस्थले दृष्टान्तिकस्य तत्र दोषत्वं संस्कारविशेषस्यैव स्यात् ॥ अन्यथा

नि॥ पित्राद्युत्कर्षेण तमोत्कर्षदर्शनात्तेषामवच्छेदकत्वमिति भावः॥ यत्तु अन्यथासिद्धिमिति न तु विशेषरवत्वादिविशेषदर्शनस्यापि
60 प्रबलपित्तवशात्तदर्शनेः शंखश्वेत्यप्रमानस्यादित्यर्थ इति तन्न॥ तत्रापि विशेषादर्शनस्य सत्वात्॥ मण्यादेरिति॥ न केवलं विशे
दत्तावच्छे षनत्वैकुटस्य हेतुत्वमिति भावः॥ अन्यथापित्तादिनदृत्यस्य पत्तासर्वमलुधाशंकनेसावदेवेति॥ नासर्वस्फुटत्वमिति पित्तादीति
किं चेति॥ तथा च पित्ताद्यभाव एव न च हेतुरिति भावः॥ नचेति॥ विशेषदर्शनेपि विशेषादर्शनहेतुत्वापत्तेरनवस्थानादित्या
शः॥ अदोषत्वेति॥ अत्र भ्रमासाधारणकारणस्य दोषत्वादित्यर्थः॥ यद्यपि भ्रमांशोपरेणापि दोषजन्यत्वानंगीकारादाशंकेयम
नुपपन्ना तथापि भ्रमासाधारणदोषजन्यत्वात्प्रमायां न परं तत्स्वभिन्नत्वमनिनःशंकेयमिति बोध्यं॥ न चैवं साक्षात्वप्रयोज
कसन्निकर्षजन्यत्वाद्भ्रमसाक्षात्वं न स्यादित्यत आह साक्षात्कारित्वं चेति॥ यावदीन्द्रियसन्निकर्षस्य तत्प्रयोजकत्वे गौरव
मिति भावः॥ ननु विषयस्य तदजन्यत्वेपि तन्निष्ठविषयकत्वावच्छेदेन तज्जन्यत्वं स्यादित्यत आह भ्रमांशे चेति॥ नन्वेवं प्रक
र्षांशे विहाय यदंशे इन्द्रियसन्निकर्षजन्यत्वं तदंश एव साक्षात्वमत एव प्रत्यभिज्ञायामेकत्र साक्षात्वमपरांशे स्मरणत्वं ख५
यानरोचत्व भ्रमस्य विशेषणांशे स्मरणरूपसन्निकर्षजन्यत्वात्प्रमा [illegible] त्वं स्यादिति दूषणं बोध्यं॥ न च तु च इति॥ दोषस्य
साक्षात्वहेतुत्वे प्रमानुमितेरपि साक्षात्वापत्तेरित्यर्थः॥ न तु दोषस्य तथात्वे ननु गत इति भावः॥ किं तु न तत्प्रमायामिति
ननु तथाप्यनेनानुगम एव नूनावयवेन्द्रियसन्निकर्षस्य धन्यस्य प्रमामात्रहेतुत्वात्तेन विनापि शाखात्मादिप्रत्यक्षेन्द्रियनाह॥

नापियथार्थलिंगपरामर्षोनुमितिप्रमामात्रेगंधप्रागभावावच्छिन्नपक्षकगंधानुमितेबाधानवतारदशायांसंनायांप्रमात्वापत्तेः
सादृश्यधीश्चवैधर्म्योपमितावेवनास्तिशुकबालादिवाक्यजप्रमायांवाक्यार्थज्ञानेनव्यभिचारि नचेश्वरीयंतेनतत्रासंपन्न
वयवेतिवाच्यं। अन्योन्याश्रयात्। प्रमायागुणजन्यत्वेसिद्धेवैदिकप्रमाहेतुवाक्यार्थप्रमारूपगुणाश्रयत्वेनेश्वरसिद्धिस्तत्सि
द्धौचतदीयवाक्यार्थज्ञानजन्यतयाशुकबालादिवाक्यस्थलेनिवारात्तावनेनप्रमायागुणजन्यत्वसिद्धिरिति। अत्राहुः। यथाप्र
मामात्रेनानुगतोगुणस्तथाप्रत्यक्षादिप्रमामात्रेपिकिंतुस्वस्वकालावयविनहेत्वादिप्रत्यक्षप्रमामात्रसहेतुकेनानापिगुणहेतु
त्वसिद्धिः। नतत्प्रत्यक्षेचनत्वक्योवयवेंद्रियसन्निकर्षोविशेषसामग्री तेनातिप्रसंगः। ननुकुमत्यादोषाभावएवहेतुर
स्तुगुणसत्वेपितस्यावश्यकत्वात्। अतएवत्वगवयवेंद्रियसन्निकर्षसत्वेपिरखनभ्रेत्यप्रत्यक्षमितिचेन्न। नतदुत्कर्षेणप्रमो
त्कर्षात्तदुत्कर्षेप्रत्यक्षप्रमाविशेषेनु[illegible]गतत्वाद्वित्याहुः। एवंचात्मादिधर्मिकप्रमायामन्यथायथार्थगुणत्वेनबोध्यं। यथार्थलिंग
ज्ञानपदेनचपक्षतावच्छेदकावच्छेदेनव्याप्यवतिपक्षेलिंगज्ञानंविवक्षितं। नस्यगंधप्रागभावावच्छिन्नपक्षकगंधानुमि
तावभावान्नोक्तदोषः। वस्तुतःस्वबाधितत्वप्रमातत्रगुणइतिबाधग्रंथेवक्ष्यामः। पक्षतावच्छेदकविरोधिसाध्यकप्रमायां
यथार्थपरामर्षोगुणइत्यप्याहुः। सादृश्यपदेनसप्रतियोगिकधर्मपरेसादृश्यमस्तीतिदशायांवाक्यजन्योपमितिप्रमायांसादृश्य
यथार्थज्ञानंगुणइत्यप्याहुः। शुकादिवाक्यजप्रमायामीश्वरीयप्रमाप्रमादीयेवाक्यविनिवारः। नचैवमन्योन्याश्रयइति। एवंलिंगत्वादृ

व्यभिचारात्कर्तृकार्ययोरपि हेतुहेतुमद्भावेन गृहीयेतदभिप्रायमादाय व्यभिचारोद्धारे अन्योन्याश्रयप्रसंगात् । यदि च कर्तृवि
शेषकार्यविशेषयोरन्वयव्यतिरेकाभ्यां कर्तृकार्यसामान्ययोः कार्यकारणभावावधारणात् । तन्न क्लेशः । तदा विशेष
प्रमाविशेषवाक्यार्थप्रमाविशेषयोरन्वयव्यतिरेकाभ्यां तत्सामान्ययोः कार्यकारणभावग्रहान्नोक्तदोषः इति तुल्यं ॥ वस्तु
तो यथार्थयोग्यताज्ञानमेव तत्र गुणः अन्यमग्रे ग्रन्थकार एव वक्ष्यति ॥ केचित्तु प्रमात्वं प्रत्यक्षत्वे प्रमात्वेन कमनुगतं यत्र घ
टितत्वेनानुगतत्वात् । तथा च तत्त्वानुगतगुणाधीनतापि नास्ति किंतु घटत्वव्याप्यघटत्वप्रकारकत्वादिरूपं प्रत्येक
मननुगतं न च तत्राहष्टस्वरूपं ॥ अन्यथा यथार्थगुणत्वेन बोध्यमित्याहुः ॥ विशेषेति ॥ व्याप्यदर्शनमित्यर्थः ॥ तन्तुत्वेना
रवेति न्यायेन विशेषदर्शने हेतुरेव तद्धेतुरिति व्यापकप्रत्यक्षमेव व्याप्यमपि विषयीकरोति ननु प्रत्यक्ष [illegible] व्याप्य विष
यज्ञानेरव्याशंकतनवीनेति ॥ तद्व्यतिरेकादिति ॥ विशेषदर्शनहेतुव्यतिरेकादेव प्रत्यक्षाभावोपपत्तेरित्यर्थः ॥ अन्य
थेति ॥ विशेषदर्शनहेतुसत्त्व इत्यर्थः ॥ ननु विशेषदर्शनहेतुरपि विशेषदर्शनान्तरमेव तथा चाविशेषदर्शनहेतु
हेतुत्वान्न रूपगमेणिविशेषदर्शनहेतुत्वे वा रूपगतत्वेन आह न चापीति ॥ अनवस्थानिया विशेषदर्शनानां तरं न
हेतुरिति नोक्तन्यायेन विशेषदर्शने हेतुत्वमित्यर्थः ॥ एवमिति ॥ व्याप्यदर्शनसामग्रीजन्यत्वे ज्ञानस्यव्याप्याविष ॥ ६१॥

यत्ता नियमेनानुव्यवसायेन प्रामाण्यव्याप्यधर्मोपिनये नप्रामाण्यसंशयो न स्यादित्यर्थः॥ यद्यपि व्याप्यवद्विषयकज्ञानत्वमात्रम
नुव्यवसायेन शक्योपनयं तत्र न प्रामाण्यव्याप्ययत्र प्रामाण्यव्याप्यं व्याप्यवद्विशेष्यकत्वेनानुव्यवसायेन शक्योपनयं सत्रऽप्र
माण्यमप्रापत्तेः॥ किंच विशेषदर्शनस्यापि प्रत्यक्षहेतुत्वे उक्तदोषतादवस्थ्य॥ अनुमितौ विरोधकाभावेन व्याप्यदर्शनोपनीत
स्य व्याप्यस्य व्यापकप्रत्यक्षविषयत्वनियमात्॥ तथापि अननुमेये न विशेषदर्शनं न हेतुः नौ न हेतुत्वमित्यनुपदं वक्ष्यमाणदूषण
तात्पर्यं बोध्यं॥ ननु तथापि विशेषदर्शनं व्यापके प्रत्यक्षमात्रे कारणं वाच्यं॥ तथा च व्यभिचारान्न तस्य हेतुत्वमित्याशंक्य नेत्याह ति॥
प्रत्यक्षविशेषणतस्य हेतुत्वे प्रमाणं प्रत्यक्षमात्र इति न व्यभिचार इत्याह संशयेति॥ यद्यपि संशयोत्तरप्रत्यक्षमात्रेपि विशेषदर्श
नं न हेतुः अंधकारे घटसंशयोत्तरप्रत्यक्षस्य तद्विनापि आलोकसमवधानमात्रेणैवोपपत्तेः॥ तथापि यत्र विशेषदर्शनादिदोषाधी
नः संशयस्तदुत्तरप्रत्यक्षं तस्य हेतुत्वं उक्तस्थले च व्यंजकाभावाधीनस्स इत्यर्थः॥ ननु संशये सति विशेषदर्शनविरहदशायां संश
यानुत्तरप्रत्यक्षत्वे स्थले यावत्सामग्रीसत्त्वान्न तथा॥ न च तत्रापि विरहाद्वेव न तत्प्रत्यक्षानुत्पादोपपत्तौ विशेषदर्शनाविरहात् इति नुत नं४
च न तस्य हेतुत्वं॥ आद्यप्रत्यक्षे सन्निप्रसंगो दुर्वार एव॥ अथ तत्सामग्र्यां सत्यामपि संशयेन प्रतिबंधान्न तदुत्पादप्रसंग इति चे
त्॥ न॥ ग्राह्यसंशयस्य प्रमाणापरिपंथित्वात्॥ न स प्रतिपंथित्वं च तस्मिन्नसति विशेषदर्शनादपि प्रत्यक्षं न जायेतेति चेत्॥ अत्र
वर्त्तीति॥ यत्र संशयस्तत्र विशेष्येंद्रियसंनिकर्षादितोपि विशेषदर्शनं विना प्रत्यक्षं न जायते तस्मिन्नसति तु जायत एव॥ यत्र तु

यत्र

न संशयस्तथा तेन विनैव तज्जायते । प्रत्यक्षे विशेषदर्शनविरहविशिष्टस्य संशयस्य प्रतिबंधकत्वेन तदभावविशिष्टस्य च तस्य
तत्राप्रतिबंधकत्वमिति कल्पनीयते ॥ तादृशस्य च प्रतिबंधकीभूतस्य संशयस्य विरहः प्रत्यक्षे सर्वत्र कारणं । एवं विशेषदर्शन-
सहकृतेन संशयसत्ताविशेषदर्शनविरहस्य विशेषणस्य विरहात्संशयविरहविशेषदर्शनवसति विशेष्यविरहात्तु संशय-
विरहविशेषदर्शनवसत्प्रत्ययविरहात्सर्वथा विशिष्टः ॥ ननु च विशेषदर्शनस्य प्रत्यक्षे कारणत्वं न स्यात् । विशिष्टतावत्संपा-
दकत्वेनान्यथासिद्धत्वादिति चेत् ॥ नानेन रूपेण तस्य तथात्वेऽपि विशेषणज्ञानत्वेन तदनुगतत्वात् । एवं विपर्ययापि विशेषदर्शन-
विरहविशिष्ट एव प्रत्यक्षप्रतिबंधकः इति तस्मिन्सत्यपि विशेषदर्शनात्प्रत्यक्षं जायत एव तस्य च सर्वत्र विशेषणज्ञानत्वेनान्य-
थासिद्धत्वात्कारणत्वं ॥ नन्वेवमपि विशेषदर्शनस्य संशयाद्युत्तरप्रत्यक्षे तत्त्वेन न हेतुत्वं किंतु विशेषणज्ञानत्वेन तथा च तस्य प्र-
मायामसाधारण्येन कारणत्वाभावात् न गुणत्वमिति चेत् न ॥ संशयाद्युत्तरप्रमायां प्रमारूपविशेषदर्शनस्य विशेषप्रमात्वेन
रूपेण कारणतया तस्य च गुणत्वात् । अप्रमारूपविशेषदर्शनस्य तु गुणत्वात् ॥ न च तत्रापि तस्य विशेषणप्रमात्वेन च कारणत्वं । वि-
शिष्टप्रमायां विशेषणज्ञानस्य तथैव कारणत्वादिति वाच्यं ॥ विशेषणज्ञानस्य प्रमात्वेऽपि विशिष्टज्ञानप्रमात्वानियमादिति ॥
अत्र दीधितिः ॥ संशयस्तु केवलं यदि विशेषदर्शनविरहसहकृतसंशयेन प्रतिबंधात् प्रत्यक्षोदयस्तदा संशयोत्पत्तिकाले प्र-
त्यक्षापत्तिः ॥ न च संशयसामग्र्या प्रतिबंधान्न तथा ॥ यज्ज्ञाने यत्प्रतिबंधकमिति न्यायेन प्रतिबंधकाभावस्य कार्ये सन्नन्तस्य ॥ ६२॥

वहेतुत्वाद्वेतिवाच्यं। एवमपि धर्मिज्ञानकाले देवासुरूपत्वादिज्ञानवत्तत्पुरुषत्वादिनिश्चयापत्तेः॥ संशयस्य न सामग्र्यावानदा
नीमभावात्॥ ननु दोषस्य प्रतिबंधकत्वान्न तदा प्रत्यक्षमिति चेन्न। ह्येवमावश्यकत्वात्संशयकालेपि न तत एव दोषात्स्थाणुत्वस्यानुपप
त्तिरस्तु किं संशयस्य प्रतिबंधकत्वाभ्युपगमेन। विशेषदर्शनवत्सति विशेषादर्शने रूपदोषविरहान्निश्चयोत्पत्तेर्न तु निरुक्त
विशिष्टाभावस्य प्रत्यक्षहेतुत्वे मानाभावात्॥ न चैवं विशेषादर्शनरूपदोषसत्वे संशयोत्तरपुरुषप्रत्यक्षमपि न स्यादिति चेत् प।४
न फलबलेन तस्य विशेषित्वकल्पनात्। ननु केषु व्याप्यव्यभिचारसंशयस्यापि व्याप्तिग्रह प्रतिबंधकता न स्यात्तस्याप्यस्तु
यत्वादिति चेन्न॥ व्यभिचारसंशयाहितसति विशेषदर्शने विना न व्याप्तिग्रह इति हेतुत्वात्तस्य प्रतिबंधकतोक्तेः॥ पारिभाषिकीन
तुकारणीभूताभावप्रतियोगित्वेन त्वादुः॥ ननु केरूपप्रत्यक्षे विशेषदर्शनं व्याप्यवत्तादर्शनमेव वाच्यं॥ तथा चानत्वात्स्याद्धेतुराव
त्तिनिस्थाणुत्वाभाववत्तानां संशयनिवृत्तेपि विशेषदर्शनं विना पुरुषप्रत्यक्षं न स्यात्। तर्करूपविशेषदर्शनात्तत्तन्निवृत्तेरत
न स्यादिति चेन्न। संशयविरोधिदर्शनत्वेन तस्य हेतुत्वात्॥ नत्व दर्शनमनुवर्तति। यद्यप्येवं व्याप्यदर्शनहेतुत्वेन तत्कृतसामप्य
नुगमः तथापि लाघवाद्व्याप्यदर्शनत्वेन हेतुत्वं न तु व्याप्यदर्शनहेतुत्वेन गौरवादिति भावः॥ अन्यत्रेति। विषयतो दरस्यार्थः
अनुभवति॥ समानविषयविपर्ययानुमित्साविरहसहकृततत्प्रत्यक्षसामग्री प्रतिबंधिकेति भावः॥ यत्तु पक्षताविरहादनानु
मितिरिति न तद्बाधकमनुमितिलक्षणव्याख्यानावसरे वक्ष्यामः॥ अत एवेति। कश्चिज्ज्ञाने विशेषदर्शनस्य जनकत्वादे

63

वेत्यर्थः ॥ ज्ञानं बाधकमिति ॥ विशेषदर्शनजन्यत्वेन यतो न यद्भवति तद्वस्तुस्वरूपसद्बाधकं न भवतीत्यर्थः ॥ अत्र विशेषदर्शनजन्यं
बाधकमित्येव वक्तव्यं न त्वेन ज्ञानं न तथेत्यभिधानं न तु दृष्टान्तस्य बाधकत्वे स्तुत्वमवक्ष्यमाणमिति दर्शितं न तु नत्वेनैव ज्ञानस्य त
स्य तथात्वं बाधकत्वं हि ज्ञानस्य बाध्यज्ञानोपदर्शितार्थविपरीतार्थालम्बनतया साद्नन्तस्य वर्तनीयव्यवहारविपरीतव्यवहारप्र
वर्तनसामर्थ्यमेव तच्च विशेषदर्शनजन्यत्वेनाज्ञानस्य स्वरूपसत एव भवति ॥ ननु नत्वेन तस्य ज्ञानमपेक्ष्यत इत्यमानाज्ञावात् ॥ गौ
रवात् नत्वनाज्ञानस्य तस्य कर्ते विबाधकत्वापाताच्चेत्याहुः ॥ विशेषदर्शनेपीति ॥ अचेत्यव्याप्यत्वेन गौरवत्वदर्शनेपीत्यर्थः ॥
यद्विशेषणेति ॥ भ्रमविरोधिविशेषदर्शनत्वेन हेतुत्वं गौरवत्वदर्शनं वनतर्थातिनतत्रभेत्यप्रत्यक्षानुरोधेप्यन्यथाप्यतिचारइति भावः ॥
यद्विशेषणेति ॥ भ्रमविरोधिविशेषदर्शनत्वेन हेतुत्वं गौरवत्वदर्शनं वन तथा ... प्रत्यक्षेति ॥ प्रत्यक्षविपरीतदर्शनमित्यर्थः ॥ तेन गौरवत्वव्याप्य
न तु शंखत्वदर्शने कुतो न भ्रमविरोधीत्यत आह तत्वेहभ्रमकत्वेति ॥ कल्पितेत्यारोप्यकोटिसमाधिकरणत्वेनानि
शंखत्वप्रत्यक्षसत्त्वादपीनत्वानुमितिसत्त्वाद्यनाकदोषतादवस्थ्यमितिध्येयं ॥ कल्पितेत्यारोप्यकोटिसमाधिकरणत्वेनानि ना० ५
शंखत्वप्रत्यक्षसत्त्वादपीनत्वानुमितिसत्त्वाद्य ... विरोधीत्यर्थः ॥ दृष्टान्तः ४
श्चिमानस्य विशेषस्य दर्शनं विरोधिशंखत्वं वारोप्यपीतत्वकोटिसमानाधिकरणत्वेनैव निश्चीयत इति न तद्दर्शनं नो हि विरोधीत्यर्थः ॥
अन्यतु यद्विशेषदर्शनजन्यो यो भ्रमस्तद्विशेषदर्शनं तद्भ्रमानरवत्वस्य हेतुस्तथैवान्वयव्यतिरेकदर्शनात् ॥ पीतश्शंख इति भ्रम
स्तु न शंखत्वविशेषादर्शनजन्यः किं तु पित्तादिजन्य एव ॥ तथा च न तत्र शंखत्वदर्शनादपि तत्प्रत्यक्षावकाश इति तत्र तस्याहे
तुत्वादिति वदन्ति ॥ नानुमित्या हिरिति ॥ नानुमित्यादि हि भ्रम इत्यर्थः ॥ यद्यपि परामर्शादिरूपसामान्यसामग्रीविरहादेव न तत्रानु ॥ ६३ ॥

मित्यादि रत्नथापि सामान्यकारणतायाविशेषकारणत्वविरोधित्वाघसामान्यपसामान्यैप्रयोजकेन विशेषनद्विशेषस्य प्रयोजकत्वमि
त्यायेन प्रमानुमित्यादि विशेषस्यापरामर्शादिविशेषस्य हेतुत्वमिति तावत् ॥ वरत्विति ॥ तथा च नश्वरसिद्धिरिति तावत् ॥ लाघ
वादिति ॥ यथा महत्त्वस्य लाघवेन प्रत्यक्षहेतुतया नेकद्रव्यत्वमन्यथासिद्धमिति तावत् ॥ अस्तु वत्यन्तपगममवाद ॥ वस्तुतो न्यां
तप्रतारकादिवाक्यजप्रमायाम्न्याधत्तावानो व्याभिचारादहेतुत्वमवेतिध्येयं ॥ प्रमाणायतनश्रुति ॥ वदार्थप्रमा वक्तृगुणजन्या शाब्द
प्रमात्वादिति प्रमाणमत्र तिध्येयं ॥ ननु वास्य प्रमाणस्य गौरवपरिपंथिस्यादित्यत आह फलमुखस्येति ॥ गौरवं कल्पनाकाले
पस्थितेपरिपंथिफलमुखं च गौरवमनुपस्थितनिमित्तनपरिपंथितदुक्तं च न [illegible] प्रमाणसिद्धत्वात्तन्न दोषायेति तावत् ॥
स्वर्गादाविवेति ॥ सुखत्वावच्छिन्ने शरीरस्य जनकत्वकल्पने स्वर्गसुखेपि शरीरकल्पनम् दुर्वारं ॥ यथा स्वर्गोपपादकमप्रवेते
सा कार्यतरं च प्रमाणसिद्धत्वात्कल्प्यते तथेदमपि यथाहुः ॥ प्रमाणवंत्य दृष्टानि कल्प्यानि सुबहून्यपि इति केचित्तु आहुः ॥
नेव नित्यनिर्दोषत्वविशिष्टं शाब्दप्रमाप्रयोजकं तथा ऽदर्शनादित्यात फलोक श्रुति ॥ वर्णस्यानित्यत्वेप्यानुपूर्व्या घटितं लौकि
कवाक्यमनित्यं वेदतन्मते आनुपूर्व्या नित्यत्वमिति लोक इत्यर्थः ॥ ननु लौकिकवेदयोर्निर्दोषत्वमेव प्रामाण्यप्रयोजकं न तु
नित्यत्वमपि त्वाशंकत अथेति ॥ नन्वेव प्रमाणाभावान्निर्दोषत्वमेव नास्ति कुतस्तस्य प्रामाण्यप्रयोजकत्वमित्यत आह
वदवेति ॥ केचित्तु शाब्दप्रमाप्रयोजकज्ञानमुपपक्ष्यन्नजाति कलाविधारणमस्या केमित्याहुः ॥ अन्वयव्यतिरेकाभ्यामाह किंचेति

64

दैवेति॥ वाक्यार्थज्ञानं विनापि तावत्सद्भावादेवोद्बुद्धिरित्यर्थः॥ प्रमाणेति॥ वक्तृवाक्यार्थज्ञानानपेक्षत्वेनेत्यर्थः॥
वक्तृज्ञानेति॥ अत्र वाक्यार्थनिष्ठकृतवाक्यार्थः किंतु संसर्गमात्रं घटाभावसंसर्गभ्यत्वमविषयस्तद्बाधादयोग्यएवार्थ
ग्राह्ये न प्रमाणमिति न तत्र गुणापेक्षेति भावः॥ नन्वेवं यत्किंचिद्वाक्यार्थबाधायोग्यतानवाच्या गतिप्रसंगात् तथा च प्रत्य
प्रयोगकारणी तु न वक्तृज्ञानविषयवाक्यार्थाबाधो वा शक्यते वाक्यार्थाबाधो वा सा वाच्या तत्राद्य आह घटवदिति॥ न तावद
समानविषयत्वेनाहार्यं घटसंसर्गधीरवतत्वहेतुरिति निरुक्तयोग्यतासत्वात्तत्प्रमाणमेवेति भावः॥ अंत्यत्वाह कि
श्चेति॥ तथा च प्रामाण्यमेव स्यात्स्फुलमभवेति भावः॥ ग्रा[illegible]मायां गुणस्य व्यभिचारमुक्त्वानुमितिप्रमायामाह एवमिति॥ नन्वे
ति॥ न च कश्चित्पक्षवृत्तिगोत्वभिन्नधर्मगोत्वादिना तादात्म्यारोपो नानुपक्षएव गोत्वज्ञानेति रित्यर्थः॥ संसर्गारोपादिति॥
गोत्वादिज्ञाने न च पक्षे संसर्गारोपादित्यर्थः॥ अनुमितिसामग्र्याः पक्षएव साध्यसंसर्गोपनयोनानुपक्षवृत्तिधर्मतादात्म्या
रोपज्ञानभावः॥ यत्र पक्षे व्याप्यता तादारोपो न तत्र वफ किंकार्थः॥ साध्यव्याप्यलिंगवत्त्वेन ज्ञानं तादात्म्यानुमितौ नाह शालि
गमसर्पज्ञाने च साध्यसंसर्गानुमितौ हेतुस्तथा च यत्र स्वहेतुबलात्संसर्गारोपएव जातस्तत्र दोषः स्यादेव त्यत्र रफकि
कार्थः॥ ज्ञानेति॥ अत्राहार्यारोपं विना प्रतारणायाप्रमावात्सएव च विषयाबाधात्प्रमारूप इति तमादाय पिगुणजन्यत्वमप्र ॥६४॥

शी० न्फलमिति चेत्॥ नन्वेवं शुकादिवाक्यं वेदतुल्यं स्यादित्यत आह शुकादाविति॥ त्रयीत्वेति॥ आशाकरमनमाश्रित्येति न्ना पृ०॥
एवं च न्यायनयप्रमायां गुणजन्यत्वेन नश्वरः साधयितुं शक्यते किंतु प्रकारान्तरेणैव साधनीय इति भाव०॥ अत्र नैया
यिकैकदेशीत्वमवलंब्येति त्राणानगुरु० तथापि सत्यं वेदं सर्वं च नादेत्राध्यापकेनैव घाघिन्नमर्थस्य स्यसर्गप्रक्रयाणन्नूप
गमानुसारिणाऽसंगतत्वापातात्॥ अदृष्टप्रमायामिति॥ प्रमायाः गुणजन्यत्वेऽपीति भाव०॥ आदिपदेनाकांक्षासत्याश्च सं
ग्रहः॥ प्रमाणशब्दे तयो रूपसंगतिः स्वेन तत्वान्निश्चायमात्रेणानुगुणत्वेन च योग्यतैव विवक्षिता योग्यतासत्तिराकांक्षादिना
प्याकांक्षात्वम प्रमायाएवासत्वादिति ध्येयं॥ योग्यता स्वरूप सती न हेतुरतो न गुणइत्यत आह यथार्थेति॥ यथार्थयोग्यताज्ञा
नेत्यर्थः॥ योग्यतायोग्यतासंशयायोग्यतांशे यथार्थेति ताव०॥ लाघवादिति॥ ज्ञानत्वावच्छिन्नयोग्यताज्ञानस्य का
रणतायाः आवश्यकत्वेन लाघवात् दिश्रोषस्य यथार्थे न ज्ञानस्यैव हेतुतास्तु ननु कल्प्यकारणतावस्य यथार्थवाक्यार्थज्ञा
नस्येत्यर्थः॥ इत्यादिति॥ यथार्थवाक्यार्थज्ञानगुणवत्त्वादिनापि स्वरवाक्यार्थप्रमामादाय नसामान्यस्यावश्यंसमर्थ
नीयत्वादिति ताव०॥ न प्रमाणमिति॥ व्यवच्छिद्यतनतेत्राष०॥ एवं च दूषयति॥ एतत्रोपलक्षणं लिंगाज्ञानसजन्यप्रमा
यामपि पक्षतावच्छेदकावच्छेदेनैतदृशाप्रवत्तिपक्षे लिंगज्ञानमबाधितविषयत्वं प्रमायां अस्मदादेर्गुण इति तस्याः अपि

गुणजन्यत्वेनेनेश्वरासिद्धिरित्यपि द्रष्टव्यं॥ प्रमाणग्राह्यं प्रतीति॥ यद्यपि प्रमाणत्वग्राह्यं प्रति हेतुत्वसिद्धावपि शाब्दप्रमां प्र
ति हेतुत्वं न सिध्यति तथापि तादृशशाब्दकारणत्वेनापीश्वरः सिध्यत्येवेति न प्रकृतानुपयोग इति ध्येयं॥ विशेषणत्वे
६५ श्री१ संभवतीति नापलक्षणत्वमिति प्रमाणं प्रति हेतुत्वे प्रमीयत्वं अपि हेतुत्वमित्यर्थ॥ इत्याह॥ नन्विति॥ मीमांसकस्यत्य
र्थः॥ एवं चेति नादृशाध्यापकेन सिद्धसाधनतावारणाय सर्वेत्यत्रेति॥ शुकादिप्रमाणग्राह्यस्य पक्षसमत्वान्न व्यभिचार इ
ननु तादृशेति॥ तथा च वक्तृवाक्यार्थज्ञानस्य वाक्यप्रयोगे एवं न हेतुत्वं कुतस्तदुत्तरकालीनस्य तु वाक्यार्थज्ञानस्य तु त
वश्च॥ यद्यपि यथार्थवाक्यतां ज्ञानगुणत्वेन निरुक्तं तथापि तद्दृव वक्तृतात्पर्यमपि शाब्दप्रमाप्रयोजकमिति तदायमे
श्वरसिद्धिरित्याशंकते अथेति॥ यद्यपि पूर्वोक्तन्यायेनावक्तृ[illegible]यथार्थज्ञानादेव शाब्दप्रमासंभवाक्तृयथार्थ
ज्ञानवक्तृकेनासंभवसिद्धमेवमतस्तु कोदिवाक्यादिवदन्यथोपपन्नं च तथाप्यस्फुटतया सम्भावनीमीमांसकेति॥ अ
नादिरिति॥ तथा च ज्ञानेनीयत्वं तथा वेदस्य तन्मते नित्यत्वमेवेति भावः॥ आकाशास्वेति॥ अथ वादिनेति अनं
पौनरुक्तमित्याहुः॥ व्यभिचारान्नावादिति॥ ज्ञानसामग्रीसत्वेपि यादृशार्थानस्यान्ने [illegible] व्यभिचारेणाधिक
मपक्षेतनचैवं दोषेपि रजतमिति ज्ञानवृत्त्युपपत्तेर्यथार्थता इति भावः॥ अप्रामाण्ये चेति॥ न स्यात्तथापि पर
नस्वान्यकपगमात्॥ तथा च सर्वधीयथार्थवान्यकपगमेनवापसिद्धान्तरितिभावः॥ विपरीतव्यवहारजनकत्वरूपस्या ॥६४

प्रामाण्यस्यास्तत्वं परतस्त्वं साधयति ॥ मैवमिति ॥ उक्तप्रकारजनकत्वेन ज्ञानकतावच्छेदकरूपवत्त्वेन ज्ञानासंसर्गाग्रहरू
पत्वं दोषादिरित्यर्थः ॥ विपरीतव्यवहारजनकज्ञाना सन्निकालीने धर्मधर्मिणोरसंसर्गाग्रहे दोषस्योपयोगाभावे भेदे न
यारसंसर्गाग्रहस्यैव ज्ञाने एकत्वात् संसर्गाग्रहे उपयोगस्त्यक्त इत्याह ज्ञानसामग्र्यामिति । तादृशज्ञानसामग्रीसमानकाली
न एव धर्मधर्मिणोरसंसर्गाग्रहे दोषस्योपयोगोऽस्ति चेत् तयोरसंसर्गाग्रहस्यैवेत्यभिप्रेत्याह दोषहेतुकेति । तादृशज्ञानोत्पत्त्यनन्त
रं धर्मधर्मिणोरसंसर्गाग्रहे तादृशज्ञानद्वय एकत्वात् संसर्गाग्रहे च दोषस्यैवोपयोग मा भूदित्याह उत्पन्नज्ञान इतीत्याहुः ॥ उक्तप्रा
माण्यस्य ज्ञप्तौ परतस्त्वं साधयति अतीतानन्तरेति व्यभिचाराद् इति प्रमास्थले दोषं विना ज्ञानस्वरूपस्यासत्त्वे अप्रमास्थले दो अ
षाभावं विना तस्यासत्त्वे व्यभिचार इत्यर्थः ज्ञानायथार्थत्वस्य प्रागभावेऽपि न स्वतस्त्वहानिरित्याह ज्ञानमयथार्थमपीति । धर्म्यंशे सति
तत्र गुणदोषाभावेन तस्यान्यथा धर्मोऽपि प्रामाण्यापत्तेरित्याशयः विरोधादिति एकत्र ज्ञाने प्रामाण्याप्रामाण्ययोरवच्छेदेन ज्ञानसा
मग्र्या दोषापेक्षा न पक्षे सम्भवतीति न तु अवच्छेदकत्वेनापि दोषजतदभावापेक्षा प्रतियोगितदभावयोः कत्रापि जनकत्वेनेत्याहुरिति भावः ।
क्वचित्कश्चिद्दोषात्यन्ताभावप्रागभावमिदमुक्तं इति ध्येयम् । यद्यपि दोषजन्यत्वं दोषाभावजन्यत्ववद् दोषजन्यत्वदोषाजन्यत्वेऽपि विरुद्ध एव
अवच्छेदकत्वेन विरोधस्तु उभयत्रापि तुल्यस्तथापि ज्ञानस्य सर्वांशे दोषजन्यत्वेऽपि असदर्थविषयत्वं तज्जन्यतावच्छेदकमिति

66

तदन्नो दोषसापेक्षासामग्रीत्युच्यते सदर्थविषयत्वं तु न तज्जन्यतावच्छेदकमिति तदन्नो तन्निरपेक्षेत्युच्यत इति भावः। इदं च दो
षसापेक्षत्वं अस्त्वपेत्योक्तं सर्वधीयथार्थत्वपक्षे तु तावदपि दोषितदज्ञावावर्जनीयसन्निधी। ननु ज्ञानजनकाविशिष्टपूर्वोक्तं स्मरति
यथार्थविशति सर्वधीयथार्थत्वपक्ष इत्यर्थः। अत्र दोषस्याप्यसंसर्गाग्रहएवोपयोगस्य दर्शितत्वादिति भावः ४ प्रामाण्यस्यापि ज्ञा
स्वतस्त्वं समर्थयितुमाशङ्क्य समर्थयति यथार्थत्वं चेति। यद्यपि नायं ज्ञानधर्मस्तथापि ज्ञानोल्लेखितप्रकारवदर्थकज्ञानत्वमितिध्ये
यं। ननु विज्ञोध्यावृत्यप्रकारकमपि प्रामाण्यं अत आह अस्त्वेवेति। अर्थोनिश्चित्येति वस्तुगतिमनुरुध्यानेन मया निरुक्तप्रा
माण्यस्य स्वतस्त्वमुक्तं न तु तन्निश्चयः अद्यत्वं गौरवादाह आवश्यकार्थनिश्चयेऽसति तद्विलंबेऽसह्यत्वविलंबाद्वेत्यर्थः। अप
रेति तथा च प्रामाण्यनिश्चयस्य परंपराकारणमित्यर्थः। परे॰ति प्रामाण्यनिश्चयरूपपराशीत्यर्थः तथा च तस्य परंपराहे
तुत्वमपि नेति भावः। अत एवेति यत एव सर्वज्ञानं स्वार्थनिश्चयरूपमेवोत्पद्यत इति अर्थज्ञोषः। किं चेति ननु पौनरुक्त्य
मिति चेत्तू न स्वतः प्रामाण्यमादायैव अत्र तु तदनास्कन्दनेऽपि तात्सिध्यतीत्यपौनरुक्त्यमिति केचित्। अन्ये तु अधर्मफलसुखीका
नान्वयव्यतिरेकप्रतियोगिरूपमन्यथासिद्धमितिस्फुटत्वंतदन्तिविशेषात्स्वगृहीतेतिपुरस्तुर्स्वगृहीतेत्यर्थः
उत्तयोरपातितथावच्छसाधनस्यमुक्तिविषयत्वमावश्यकं स्याविषयेतस्याप्रवर्तकत्वादित्यन्वयाख्याति
सिद्धिरितिभावःपूर्वोक्तयुक्तिमेवस्मारयतिकिंचेतिव्यवहारहेतुत्वादितिउपपत्तानैपियोग्यतास्तीति
भावःअतएवेत्याद्यन्वयाख्यातिसाधनंनसंभवतीतिपञ्जनानेवामितिअन्यथाख्यातिसाधनत्वेनोक्तना
मित्यर्थःव्याप्तिबाधकत्वेहेतुमाहकृतेतिविपरीतज्ञानत्वेप्ययथार्थंस्यादित्यर्थःवस्तुतोज्ञानमानेस्व
मेवेतिवह्निविषयतयानयंव्याप्तिबाधिकेतिभावःसदेतातिनचेदंरजतं [illegible] तदजतमितिस्पष्टिमा

४६ नस्य यद्वृत्तिरजतप्रतिबंधकत्वापत्तिरितियावद्रजतत्वेन प्रकारेण तद्ग्रहस्य प्रतिबंधकत्वं तच्च तज्जनकत्वं प्रका
रत्वाभावात् स्मरणमनुत्तवलिअम्हष्टनताकसमस्त्वेनतात्रा संस्काररूपप्रत्यासत्तिसत्वेपि पादोषात्स्मृतिप्रति
बंधः यथा वा रजतत्वमहत्वाद्यायसिंयुक्तसमवायप्रत्यासत्तावपि रजतत्वानवअभिबंधस्तथात्रापि लिंगवत्न
नुसंस्कारस्यैव सामान्यप्रत्यासत्तिरुक्तेत्यत आह नन्वतस्येति संस्कारस्य स्वयः रजतत्वासंसर्गेति अन्य
हृत्तितयोपस्थितस्यापि विशेषणीभूतस्य ग्रहरूपमिति अदूरविप्रकर्षेण ज्ञानेनाभिधानमित्यर्थः असं
सर्गेनिरूप्यातीति वक्तव्यात् असंसर्गाग्रहो ज्ञाने पि बोध्यमित्यन्ये निवृत्तिप्रसंगादिति विशेषणावप्रसंगादित्य २६
र्थः रजतधातिरजतत्वेऽस्याविवृत्तिरसंसर्गो रजतत्वेदसंसर्गासंसर्गः सिद्ध्यतितस्याग्रहाननकार्यार्थः एसेव
वरजतेऽप्यवृत्तिप्रतिबंधकत्वातिरेकार्थः ननु रजतवृत्तितयापाद्यमानाहितभेदरूपापत्तिर्वस्तुतस्तस्य रजतत्वेदन
सह विद्यमानोपि भेदोषोस्मिन्नासत्त्वरतिरजतत्वेदग्रहकार्यकारितया स एव रजतवृत्तिप्रतिबंधकत्व
तिशंकते रजत वृत्तितयेति पुरोवर्तिनि भिन्नत्वपेति भवन्मते स्वरूपाद्वत्तिविशेषणतया बोध्यं एवं वा
न्यथाख्यातिरित्याह ज्ञानत्वलक्षणैः एवं निर्धचावितिनियन्तकमप्यनिषज्ञानमेवन्याहिमवदित्यर्थः ॥छ॥

अन्ये त्विति इष्टमिष्टाविषयीकृतसत्यस्थले रजतत्वमस्तु रंगादिस्थ एवमिति अनिष्टेति तदारोप्यमाणारष्टस्येति
तया आरोप्यमाणो धर्मः स्वाश्रया... निवर्त्तयति स्वधर्मविगेरंगादि रजते रंगसादृश्यमित्यर्थः रजतवृत्तिधर्म
स्येति रजतसादृश्यस्य वाकाविस्य स्येत्यर्थः रंगवृत्तिधर्मस्य रंगसादृश्यस्येत्यर्थः रजतवृत्तित्वेन पतिवस्कतो
पटुजनतिहृतिनयेत्यर्थः ननु ... ज्ञानद्वयमेव ... आह तस्येति पूर्वोक्तदोषानिर
स्यतिनवतिनामेति स्वमता वेष्टनेन दंते दायहस्यैकफलस्य पादपस्य ...त्यापि दृष्टव्यं तज्जोतितत्त्वोपष्टं त्यर्थः
तद्ज्ञानेति संस्कारद्वारा तेना सविकल्पकजन्यत्वात् सविकल्पकाजन्यस्यैव परमते साक्षात्वादित्यर्थः ननु
वं स्मृतित्वसाक्षात्वयोः संकरः स्यात् आह स्मृतित्वमिति अव्याप्येति एकावच्छेदेनैव विरुद्धजातिसंकरस्य
दोषत्वमित्यर्थः भ्रमत्वमिति इंद्रियत्वेनेंद्रियजन्यस्यैव साक्षात्कारित्वनियामकत्वात् सर्वांशेपि साक्षा
त्कारित्वमित्यर्थः जातीति गुणगतजातेरपि अस्मन्मते व्यवस्थापितत्वात् न व्याप्यव्यापकत्वं जातिव्याप्यत्व
नित्वनियमात् विरुद्धजात्योरेकाधिकरण्यमात्रेणैव संकरस्यैव दोषतात्र साक्षात्वस्य सकलज्ञानवृ

४१

नित्यत्वनिराकरणमयुक्तमिति भावः स्वमतावष्टंभेनाह यद्वेति ज्ञायमानइति ननु प्रत्यभिज्ञादौ संस्कारः स्मृतिवद्व्यासज्यसि
द्धावहेतोरपि तथा स्वितस्तत आह संस्कारस्येति न च पक्षधर्म गतत्वेन विशिष्यपद्ज्ञानं न त्वेवलज्ञानजन्यसंस्का
२म रादेः प्रत्यासत्तित्वमिति सिद्धान्तादिदमुक्तमिति वाच्यं एवमपीदानींरूपामिः स्वापघटत्वधारणात्स्वगमनात् तत्त
त्वज्ञानस्याप्रयोजकत्वाच्च वस्तुतस्तु असन्निकृष्टमपि द्वाभ्यां ते संसर्गे वक्ष्यमाणेनान्यथा तस्याहेतु
त्वाहिति एतच्चैकामतेन वस्तुतः विशेषणासन्निकर्षस्यापि हेतुत्वमेव सामान्यतो न तु विशेषरूपेण अत एव
नवहेर सन्निकर्षात्तद्विशिष्टप्रत्यक्षमित्यनुमानखंडे वक्ष्यति अत्र चक्षुरादिरेव सन्निकर्षः यथार्थविशिष्टप्र
त्यक्षे ज्ञानस्य हेतुत्वमिति भावः ननु सत्यस्थले रजतसाक्षात्कारे रजतेन्द्रियसन्निकर्षो हेतुः दृष्टः स्यात आह
रजतसाक्षात्कारे इति सत्यस्थले इति शेषः भ्रमकरजतसाक्षात्कारे रजतविशेषणामिति न तदीन्द्रिय
संयोगापेक्षणीयः शुक्त्यादिकं तु यत्तत्वाविशेष्यं तत्संयोगापेक्षः न चैवमरजतसन्निकर्षादपि रजतप्रत्य
क्षस्याहविशेष्यसन्निकर्षत्वावच्छिन्नस्य सत्त्वादिति तत्र रजतसंयोगत्वेनाविशेषसामर्थ्यं तर्कं कल्प्यामि ॥८५॥

यत्तआह यत्सामान्यग्रहेति तथा च तद्विशेष्यकप्रत्यक्षे तद्विशेष्यसन्निकर्षो हेतुरावश्यकस्तेन नोक्तातिप्र
संगः अन्यथाऽन्यरजतसंयोगेनान्यरजतप्रत्यक्षं स्यात् इति भावः एतावतैवोपपन्नो रजतसंयोगत्वेनापि
विशेषसामग्र्यंतरं न कल्प्यं गौरवादित्याह संयोगस्येति गौरवमेव स्पष्टयति प्रत्यक्षेति अपि चेति नन्वि
दंतोरर्थानिश्चानं यथाधिकरणमिति चेत् रजतसाक्षात्कारे तत्संयोगस्य विशेषसन्निकर्षत्वेन हेतुत्वं कल्प्य
यित्वाऽप्रवृत्तौ विशिष्टज्ञानं कारणं कल्प्यं तामूल तत्संयोगत्वेन कारणतां कल्प्यमित्वा च तद्दोषग्रहस्य कारणा
ताकल्पनं आद्ये लाघवमन्त्ये गौरवमित्यर्थादित्याह कुः। उत्पत्यतीति न च दोषाः ग्रहेतत्कार्यप्रतिबंधकाः ननु
विपरीतकार्यकरा इत्यनेन विरोधः प्रतिवाच्यः तस्य विशिष्टज्ञानं न दोषः इत्यर्थं परत्वादित्येकमतौ रैत पोव ९४
तदुक्तमित्यन्य इत्यत्र रूपयामीति एवं चैतन्मते विशेषणासन्निकर्षस्य यथार्थप्रत्ययसंपत्ति हेतुत्वमिति निष्कर्ष
ननु दोषानर्थमस्वरूपहेतुः किंतु तज्जन्यविसंवादि भ्रमहेतुः इत्यत आह यावच्चेति यद्यपि न्यायमते पक्षस्थाने
दोषस्य हेतुत्वं तथापि परैरपीत्युक्तं ननु तत्त्वस्येति सत्यस्थले च प्रतिमा चेत् प्रतिरूप्य हेतुर्वाच्यत्वे विशिष्टज्ञा

९० नस्य हेतुत्वकल्पनादित्यर्थः नचेति नत्वित्यर्थः नेकमिति तथा बहुदृष्टबीजाद्विपरीतकार्यस्तुदयेपि ताद्रूप्योदया
त्तस्यादेव बीजादिपदोष्पादेत्यादित्यर्थः एकमिति अन्यथाख्यातिसत्वे दर्शिते नत्वित्यदृष्टकारणस्य सत्वाकार
णबाधाभावाहेत्यर्थः इदं रजतमित्यनेन चैतादृशाद्व्यवसायस्वीकारस्य नः प्रामाण्यापत्ति रितिवाच्यं नैयायि
कस्य स्वातंत्र्येणोपादानादिकमकेनापि नवपदनिरुक्तेदं ग्रहणा याथिमित्यर्थः तथाचमुक्तो रजतत्वासंसर्गा
ग्रह वत्तत्र रजतज्ञान विषयत्वासंसर्गाग्रहः प्रवृत्ताव्यवहार इति भावः अथ विचारेति सतिविचारे ताद्रूप्या
नुव्यवसायासिद्धे रितिभावः इदमिति रजतत्वासंसर्गाग्रहणादुक्तोर जतव्यवहारं वदुक्तज्ञानासंसर्गाग्रहादि
आत्मनि तथा व्यवहारो भावीत स्य वता द्रूप्यज्ञानाप्रसिद्ध्याप्रसिद्धे स्वत सिद्धोपपत्ति सिद्धं विवादेनेतिभा
वः नन्वे तद्विशिष्टज्ञानासंसर्गाग्रहेणात्मनि किंतु इदं विषयकग्रहणस्य रजत विषयकस्मरणस्य वासंसर्गा
ग्रहस्तदेविशिष्टज्ञानमेव बाध विच्छेदत्यस आह नचेति तथासत्वे तदाकारानुव्यवसायः स्यादित्यर्थः प्रकारि
१ कमे णाइति पुरोवर्ति विशेष्यकमेव ज्ञानं प्रकारितं इदं रजतं प्रकारोन तथा च प्रकारितज्ञानमिदं तया रजतत्वय ॥ ९० ॥

तिप्रकारत्वानमसंगतं अतोऽग्रस्यैवतज्ज्ञानं रजतत्वेनानुव्यवसीयते (त्य) अस्य चेदपि स्वयं स्वविद्विरोधं परिहरति
विशिष्टेति साकारवादं परिहरति ज्ञानइति सौगतमतेज्ञानीयमेव रजतत्वविषयो नानुवाय्यमत्रतु नतथेति
नावः अविशेषादिति परस्परविरुद्धत्वाविशेषादित्यर्थः अनन्यथासिद्धतयेति अप्रामाण्यशंकानुदयादि
त्यर्थः यथाप्रत्यक्षादीति अनोपाय्यज्ञानेस्य औपायज्ञानापेक्षत्वाद्धानौपाय्यप्रत्यक्षानंतरं यथानोपाय
नुमितिनिरूपितेत्यर्थः पिजप्यैवं रजतज्ञानानंतरं नेदं रजतमितिबाधकज्ञानमपि नोत्पद्यते तस्यापिन
सापेक्षत्वात् तथाप्यप्रामाण्यशंकारकं दिवर्ष बाध्यत्व प्रयोजकं तद्दनारकं इति विरुद्धज्ञानस्य च बाध
कत्वं अतएव शंखपीतप्रत्यक्षविरुद्धाप्यपीतत्वानुमितिरुत्पद्यते अतएव चदुष्टेंद्रियजन्यरजतज्ञानादवि
शेषदर्शनादिनोऽप्रामाण्यशंकानंतरमेव बाधकज्ञानोदयोनान्यथेति ध्येयं। नमत्वन्कृतिरितिच्चमतानिरू
पस्तार्थः किंचनवतिममबाधकानवतारादेव ज्ञानोविश्वासः तदकृज्ञाने दृष्टेन तोत्साहिकसाद्विषयत्वज्ञा
नाद्विश्वासइत्यभ्युपगमे नसद्विषयत्वज्ञानेतत्ततादृशज्ञानांतरं विनानविश्वासइति तत्रापितत्स्पष्टायां

७१

मनवस्थापत्तिरितितात्पर्यार्थः॥ इत्याहुः॥ विशेषदर्शनादिति विशेषदर्शनजन्यज्ञाने संदिग्धत्वज्ञानं वि
नैव समाश्वासइति यद्दितवमतं तदान्यथाख्यातिवादिनो ममापि तादृशज्ञानानां नैवरविनैव समाश्वास
इति तुल्यमित्यर्थः उक्तमिति कोटिस्मरणाभावादुक्तदशायामप्रतिरप्रतिबंधाद्येत्यर्थः स्वतोग्राह्यत्वव
निरजतादौ रजतादिविशेषधर्म्मस्य रंगत्वादेरभावग्रहाद्वरजतं ज्ञानेसमाश्वासइत्यनुतवसिद्धांतजत द्वेषम्या तथ
भावश्च रजतादिस्वरूपमेव वाज्ञानं वा तज्ज्ञाप्यपरूपं तद्धर्म्मस्मर्यमाणे तद्धर्म्माभाव वेतत्त
त्पदात एवगृह्यत इति युक्तो विश्वासः यत्तु नेदं कवैधर्म्यं तद्धर्म्माधिकरणतायोग्यतत्रु तदभावस्यप्र
त्यक्षेणा निश्चयादूरसंशयेसतिसंदिग्धयुक्तरूपविशेषदर्शनाद्विश्वासइत्यर्थः तन्नेति रजतादि
ज्ञानजातपुरोवर्त्तिनि स्मृतयोग्यवैधर्म्याभावजस्य वाधिकशेषदर्शनाद्विश्वासस्तवमतेमतांतरेज्ञा
भावग्रहाद्विश्वासइत्यत्र यत्रापि ज्ञानांतराद्विश्वासस्तुल्यएवेत्यर्थः केचित्तु स्वमतएवात्र यत्रापि ज्ञाना
तराद्विश्वासः अयोग्यवैधर्म्यप्रतिसंधानपक्षएवज्ञानानां वराद्विश्वासइतिअभिधानाद्विश्वंरनमित्य॥८१॥

थइत्यादुः अयोग्यनेदकस्थले सद्विषयत्वरूपविशेषदर्शाद्विभ्रमासत्वत्रदोषमाहवक्कतास्त्वति अन्येतु
औत्सर्गिकिसद्विषयत्वग्रहाद्विभ्रमासम्भातिपस्परेरुक्तं तत्सद्विषयत्वाप्रसिद्ध्यादूषयतिवरक्तवास्त्वितीत्या
न३ दुःकृंड्यिपदार्थस्यवीनदोषाङ्गिनत्वमप्रमाणार्थविपरीतकार्यजनकत्वसिद्धातीत्यतःपुनराशंक्यसाधयति
फलातिनमरूपकार्यान्यथानुपपत्तिरेवदोषहेतुत्वमानमित्यर्थः तपामिति तदु स्वयेनाहास्यस्यनेप्य रु४
थः नचानियतात्स्यमखंडमसदेवेतिवाच्यं रजततादात्म्यं हि तत्रनासत् तत्रासदेवाखंडता नेनात्मरूप
न घडेतिभावः असत्वेतिएवमन्यतमस्यासत्वेएवमिति रजतत्वादिसंसर्गोपिसन्नेवनासन्नित्यर्थः वि
शिष्टज्ञानेति नतएवासद्विशिष्टस्यज्ञानं नत्वतिरिक्तं तज्ज्ञानसामग्रीतिनकारणानुपपत्तिः स्फुल्ये वत्यर्थः
तन्निरालंबनस्यैव वि वरणं असदालंबनमिति अत्रकूर्मसनेवोपपत्तोअकृहसद्विषयत्वेगौरवंभ्रमा
२७ तानावश्यत्वस्वरसाबाधुर्थ्यः नआरक्तत्वाद्विषयत्वेतिविशेष्यतत्प्रकारकत्वमेवत्वमस्यायथार्थत्वमितिस
त्यं नेदंवस्तुतस्यासाद्विशिष्ट्यविषयत्वं विनानसंभवतितत्प्रकारविशेष्याहिनदेवयदाधारं तत्प्रकारकज्ञा
पत्प्रकारवैशिष्ट्यं

९२ नेष्प्रकाशाते नवघ्रुक्तोरजतत्वसंसर्गविभ्रमेरजतताद्रात्म्यत्वमेवारजतत्वसंसर्गरूपंतासात्म्यरूपंवाबोध्य
त्वांशुक्त्याधारं प्रकाशनेतस्य इत्यसतोस्तयोः शुक्त्यानाधारत्वात् किंतु असदेवतदुभयमकामेनापि
स्वीकरणीयंनचसदेवरजतत्वसंसर्गादिकंशुक्तिनिष्ठीभूयभासतइत्येतावतैवतस्यास्तत्प्रकारकावि
शेष्यतेतिवाच्यंशुक्तिनिष्ठीभूयभासतइत्यत्रहिशुक्तिनिष्ठत्वेनप्रकारेणभासतइत्यर्थोवाच्यःवैशि
ष्ट्यांशेविशेष्यनिष्ठत्वस्यप्रकारत्वानुपपत्तेः तत्त्वेनाङ्गीकारेवा तच्छुक्त्याधारंभासतइत्यर्थोवाच्यःअतस्तयो
वैशिष्ट्यगत्यातदनाधारत्वाहानिप्रसक्तेपरिशेषादेवार्थंकल्प्यइत्याह ॥ छ ॥ ॥इत्यन्यथाख्यातिवादः॥
॥॥चतुर्विधमितियद्यपिनारीरादेःपितृशरीरमनःसंयोगद्वाराकारणत्वेनधाष्पिअसाधारणांचतुर्वि
धमित्याहुःनन्वर्थस्यतत्र ज्ञानार्थ्यमानोविवक्षितोर्थ्यमानत्वमात्रं विवक्षित आद्येआह आत्मे दा३
नियंत्येतत्तोहज्ञानमात्रेतिरस्कारेतियद्यपिकरणलक्षणप्रस्तावेतद्व्यानिर्देशस्तथापिशरीरस्यापि
प्रत्यक्ष प्रमाणत्वमित्यभिप्रायेणेदमुक्तमित्यन्ये प्रत्यक्षलक्षणाभिप्रायेणेदमुक्तमित्येके ननु ॥९८॥

संयोगाद्यन्यान्यत्वविशेषणायानिलक्षणानन्नुगमानवान्तरत्तेदसाधनेनागासिद्धिरित्यत आह तत्तरीतिसन्नि
कर्षजन्यत्वस्यैवव्याप्यत्वादिति भावः तदेवेति नियतव्यंजकमेवेत्यर्थः तयोरिति अनुगतबुद्धिविषयस्येत्यर्थः अन्या
य्येति इंद्रियत्वस्य साक्षात्प्रतीतिसाधनत्वघटितं गादिति तिन्नावच्छेद्यस्वेनान्यथेंद्रियनिर्वचने तदादोषमाहेंद्रिय
स्येति अतींद्रियेंद्रियघटितत्वरूपोपाधेः प्रत्यक्षानुगतबुद्धेर्न विषयत्वमर्थः गोत्वादि नव सास्नावत्त्व अनुगततया
व्यंजकांतरस्यापि सत्वेपि निगमकाभावादिति तज्ञावस्तु नु इति न च वसुकरणविमतौ द्वितीयं कथं व्यंजकाभावमिति
वाच्यं तेन वा नुगतत्वजातेरुपलक्षणात् अस्तु वा व्यभावहृति जातौ तद्रूपसाधनपापि गुणजातौ नानुगतव्यंज
काधेयसत्वान्न जातित्वमेतत्तियद्यपि व्यंजकमुपाधितयागुरुजातिस्तु लघुस्तथापि कृमत्वानुपाधिरेव तथा स
किं जातिरिति तावच्छ्राधानलौकिकप्रत्यक्षलक्षणं स्यैलेतावच्छेदकेनादायतस्य लक्षणादित्याह योगजेत्य
जन्येत्यादिना स्वविषयकज्ञानलक्षणाप्रत्यासत्यजन्यत्वविशेषितं प्रत्यासत्तिलेला पवस्य विकल्पकपदं
जन्यपदं चोपादानीयं निर्विकल्पकस्याजन्यज्ञानस्य प्रत्यासत्तितासाधारणं स्वविषयकेतिवाच्यं × व्यर्थमिति × ज्ञान
योगि। विशिष्टज्ञानावप्रत्यासत्तियोगिज्ञानस्य जातिया गरुपविशेषणप्रत्यासत्तेनाप्युपयोगितयात्दूपा नु.

९३

दानेतत्रात्माधिष्ठसंयोगात्‌ सत्वविशिष्टुज्ञत्वस्य मात्रविशेषणसन्निकर्षस्य हेतुत्वेन तत्रान्यसंसर्गाभावेन तस्यैव कथंचात्मा
पगमात्‌ नचैवं वाङ्ज्ञानरूपप्रत्यासत्त्यापर्वतेवह्निप्रत्यक्षापादप्रसंगइतिवाच्यं लौकिकप्रत्यक्षसामग्रीतिप्रत्यभिज्ञा
मप्याबलवत्वात्‌ एवं स्वविषयकस्यस्यापादानेयदंशेसाक्षात्कारः स्वविषयप्रत्यासत्तिजन्यतज्ज्ञानाजन्यस्तदंशेज्ञानेलौ
किकत्वप्रमितिस्यनेतथाचात्रावसासाक्षात्कारःप्रतियोग्यंशेननतथात्माद्यंशेतुतथैव एवंच परमाणुमहं जानामीत्य
नुव्यवसायेपिपरमाण्वंशेनतथात्मानांशेतुतथेत्यहनीयं दंडिप्रत्यक्षादौवदंडादिसंयोगादिरूपप्रत्यासत्तिस
त्वेदंडादिज्ञानस्यविशेषणज्ञानमात्रजन्यापरपश्यद्विदंडांशेनालौकिकत्वापत्तिरित्याहु ॥ अन्यवदंति॥ एवमप्य
शांविवसायाआवश्यकत्वात्परंत्रा प्रत्यासत्तिजन्यतज्ज्ञानाजन्यत्वेनचलौकिकत्वमिति तेनातलेवापत्तेःस्वविषयक
तिव्यर्थंमेव भिन्नविषयकस्यप्रत्यासत्तितामाबाहाः जन्याद्विपरवेनालाभोपेतत्तदुपादानेइदंरजतमित्यादिभ्रमे
तिजसंसर्गःतस्यसत्वप्रत्यक्षासत्त्वाभावेन तज्ज्ञानरूपाविशिष्टकपजन्यत्वात्‌ घटत्वावादौप्रतियोगित्वशेतिवाभेदः आत्मानं
जानामीयत्रासांशेप्रत्यासत्त्यान्तरपरमाणुमहंजानामीत्यत्रापरमाण्वंशेरवात्मांशेप्यलौकिकत्वमवतिवाच्यंसंयोग
रूपसन्निकर्षस्यापितत्वात्तज्जन्यत्वेनलौकिकस्यावश्यकत्वात्‌ एवंचघटस्यापिज्ञानेपुरोवर्त्तिघटत्वादि ॥ ९३ ॥

=समानाधिक
रणेति=

रूपसामान्यप्रत्यासत्तेरपि हेतुत्वान्नाप्यव्याप्तिः एतेन जन्यस्वविषयकसविकल्पकत्वेन यस्य ज्ञानस्य जनकत्वं
तदजन्यत्वं विवक्षितं तेन स्वरूपेण ज्ञानरूपप्रत्यासत्तेरेव जनकत्वमतो घटज्ञानस्य प्रत्यासत्तित्वाभावादेवं च सविक
ल्पकादिमात्रेणातिप्रसक्तेन जनकत्वस्याप्रसिद्धतया जन्यादिपदं अ[illegible] प्रसिद्धिवारकत्वेन सार्थकं घटादेश्चैतादृशि
अतिप्रसक्तस्यासद्विशेषणांतरमपि प्रवेश्यमिति परास्तं उक्तातिव्याप्तिदोषत्वादिति ॥ अत्र भ्रमः ॥
यदंशे प्रत्यासत्तिस्तज्ज्ञानाजन्यत्वं तत्त्वं लौकिकमित्यत्र जन्येत्यादिना विवक्षितं न च रजतत्वमेघटाभाव इत्यादौ अतिव्या
प्तिर्वांशे वातिव्याप्तिरिति वाच्यं तस्य लौकिकत्वेनेष्टत्वात् न च लौकिकप्रत्यासत्त्यजन्यत्वान्न तथा नहि लौकिकप्रत्या
सत्तिजन्यत्वं लौकिकत्वं येन न तथा स्यात् किं त्वेकरूपमेव तत् तत्राप्यक्षतमेव न च तत्त्वेन लौकिकत्वं किं न स्यात् तथा च नत्वा
लौकिकत्वमेवास्येति वाच्यं स्वतंत्रपरिभाषायामपर्यनुयोज्यत्वात् एवमात्मानं जानामीत्यादावात्मसंयोगरूपसन्निक
र्षजन्यत्वेपि अलौकिकत्वमेव घट इत्यादिज्ञानेषु तावन्नशिष्यते तथैवेति तदव्याप्तिर्न दोष इति मंतव्यं केचित्तु जन्यविशे
ष्यप्रत्यक्षे एव विशेषणसन्निकर्षोपि हेतुरिति रजतांशे ज्ञानप्रत्यासत्तिजन्यत्वमेवेति नोक्तदोष इत्याहुः अत एव जन्यस्व
विषयकसविकल्पकत्वेन यस्य ज्ञानस्य जनकत्वं तदन्यत्वं विवक्षितमित्यादिकमपि निरवद्यं बोध्यं अनागतत्वेन तादृशज्ञा

९५ त्यासत्तिज्ञानीयजन्यत्वाविवादितत्वेनानागतगोचरत्ववर्त्तमानत्वादिलक्षणसामान्यप्रत्यासत्तिजन्यप्रत्यक्षेणातिव्याप्तिः अ
न्यत्वविनितथा च तन्मते योगजधर्मजन्यप्रत्यक्षत्वं लौकिकप्रत्यक्षलक्षणं बोध्यमिति वदंति॰ तच्चिंत्यं॰ लक्ष्यताव
च्छेदकलक्षणयोरभेदापत्तेः तस्यासामान्यज्ञानप्रत्यासत्तिनिष्ठानागतगोचरसाक्षात्कारहेतुप्रत्यासत्त्यजन्यज
न्यसाक्षात्कारत्वं तल्लक्षणं बोध्यं॰ न च ताहृशीप्रत्यासत्तिर्योगजधर्म एवेति वाच्यं उपाधिभेदेन भेदात्॰ अत्रानन्ति
मतिबीजं तु प्रत्यासत्तित्रयजन्ये लौ[illegible]कानामलौकिकत्वव्यवहारात् तदतिक्रमः इति॰ विशेष्यत्वेनेति॰ ननु जन्यप्र
त्यक्षमिति लक्ष्यनिर्देशाज्जन्यप्रत्यक्षमात्रस्य लक्षणमिदं लौकिकप्रत्यक्षस्यैव लक्षणांतरं था नोक्तः योगिप्रत्यक्षा
व्याप्तेः न च योगिज्ञानमपि विषयजन्यमेवेति वाच्यं अतीतमात्रविषयकज्ञाने सामान्यप्रत्यासत्तिजन्ये योगिप्र
त्यक्षांशे च तथाप्यबाधात्॰ विशेष्यस्य तत्रासत्वेनाहेतुत्वात्॰ नांत्यः विशिष्टप्रत्यक्षे विशेषणांशेऽव्याप्तेः तदंशे
विशेष्याजन्यत्वात्॰ न चांशभेदेन ज्ञानं चैकमेव तच्च तज्जन्यत्वमक्षतमेवेति नोक्तदोष इति वाच्यं॰ तथात्वे
परमाणुमहत्ज्ञानामेत्यादौ परमाण्वाद्यंशे अतिव्याप्तेः निर्विकल्पकाव्याप्तेश्च तत्र विशेष्याभावाज्ज्ञानेन विशेष्यजन्यत्वा
त् न च विशेष्यपदस्य तत्र विषयपरत्वं तथा च विशेषणाद्यंशेऽपि नाव्याप्तिरिति वाच्यं॰ ईश्वरजतमित्यादिभ्रमे रज ॥९४॥

ताघंत्रो ऽव्याप्तेस्तस्यापि लौकिकत्वात्फणगमादिति चेत् ॥ अत्र ब्रूमः ॥ जन्यप्रत्यक्षमात्रस्यैव लक्षणमिदं तज्जन्यजाती
यस्यैव विवक्षितत्वान्नोक्तदोषः तज्जातीयत्वं चानुगतत्वव्याप्यजात्या बोध्यं एवं सति जन्यत्वस्य तील्यपि विशेषणीयं
यद्वा ३ अतो नेश्वरज्ञाने तिव्याप्तिः विशेष्यपदं विषयपरमेव विशेष्यत्वस्याविषयविशेषतया लाघवेन विशेषणानां विकल्प
कसाधारणतया अनुगतत्वेन च विषयत्वस्यैव तद्धेतुतावच्छेदकत्वात् न तत एव फलसिद्धौ विशेषसामर्थ्यतया कल्पना
त् न च विषयत्वमपि ज्ञानसमानकालीनतया न ज्ञानपूर्ववृत्तितावच्छेदकं कार्यपूर्वकालीनस्यैव हेतुतावच्छेदकत्वादिति २५
वाच्यं हेतोस्तथात्वनियमेपि हेतुतावच्छेदकस्य तन्नियमाभावात् न च कार्यपूर्वकाले हेतुतावच्छेदकाभावात्स्वरूपत्वम्
पत्तेस्तथात्वमिति वाच्यं उपनीतधर्मावच्छेदेनापि तद्धेतुत्वसंभवात् न च विषयत्वस्याकाशादावतिप्रसक्तत्वया न त
द्धेतुतावच्छेदकं प्रत्यक्षविशेषे स्वविषयत्वस्य तथात्वात् अस्त्वेवा विशेष्यत्वेनेत्यस्य सामान्यादिप्रत्यासत्तिजन्य
जिन्नस्वजनकेन्द्रियप्रत्यासत्त्याश्रयत्वेनेत्यर्थः तथा च नोक्तदोषः केचित्तु लौकिकप्रत्यक्षलक्षणमेवेदं एतन्मते
ज्ञानत्वमाघंत्रो ऽसंग्राह्य एवेत्याहुः यद्वा सर्वस्य रसादाद्यकेति न चेन्द्रियत्वमनुपदमेव मनोगतं विद्यति मनःसिद्धि
सुखप्रतीतिरिन्द्रियकरणिकेत्यनेन तथा मनःसिद्धाविन्द्रियत्वसिद्धिः इन्द्रियत्वसिद्धौ च मनस्त्वसिद्धिरित्यन्योन्याश्रयः
८२

95

तथाचेंद्रियत्वेनेत्यस्यस्वजनकप्रत्यासत्तिप्रतियोगित्वेनेत्यर्थ इति वाच्यं॰ तथाच सति रिंद्रियत्वं वेत्यनेनेंद्रियस्य निरु
क्तेरसंगतत्वापातइति सुखप्रतीतिःसकरणिकेत्यत्रापि मनःसिद्धिर्न स्वेभ्योन्याश्रयानवकाशात्॰ चन्निंद्रियत्वस्यप्र
त्यक्षनिरूप्यत्वेनान्योन्याश्रयइत्यतआहइंद्रियत्वं वेति॰ इंद्रियलक्षणास्येतत्प्रत्यक्षघटितत्वेन्योन्याश्रय यत्रीकोपा
मिदंप्रथमोक्तनानिरूपलक्षणाघटितत्वेनदर्शितत्वादिति बोध्यं॰ स्मृत्यजनकत्वमत्रस्मृतिजननस्वरूपयोग्यत्वं वि
वक्षितं तेनाजनितस्मृतिज्ञानजनकयात्किंचिन्मनःसंयोगव्यक्त्याश्रयत्वेनादेर्नातिव्याप्तिः नचैवं मनस्यव्याप्तिः
आत्मादिमनःसंयोगत्वेनैव तत्स्वरूपयोग्यतया तस्य तदयोग्यज्ञानकरणचक्षुर्मनःसंयोगाश्रयत्वात्॰ स्मृत्यजनकेषु
नीस्य त्रतास्य र्थमित्यन्येव्यासादावतिव्याप्तिवारणाय ज्ञानजनकेति॰ तादृशचक्षुर्घटसंयोगादिकमादाय घटादावति
व्याप्तिवारणाय मनःपदं॰ नचैवमपि सामान्यप्रत्यासत्तिरूपमनःसंयोगवति घटेतिव्याप्तिरिति वाच्यं॰ लौकिक
त्वेनज्ञानविशेषणात्॰ नचस्वप्नज्ञानजनकमनःसंयोगवत्यात्मिचभावदनाद्यांमतिव्याप्तिः ज्ञानपदस्य प्रमापरत्वा
त्॰ पद्यलाघवेनात्माव यावविपरिहारेणशरीरत्वदवयवमनःसंयोगसाधारणेनैव रूपेणशरीरमनःसंयोगस्यज्ञानहे
तुतया तस्यापिस्मृतिस्वरूपयोग्यत्वात्॰ नचाजनितज्ञानेविनष्टचक्षुरिंद्रियेव्याप्तिरिति वाच्यं॰ तत्रमानाभावात्॰ ॥९५॥

जनन॰

त्वङ्मनःसंयोगाश्रयवृत्तिज्ञानजनकतावच्छेदकधर्मवत्त्वं तात्पर्यार्थ इत्यन्ये। प्राणेति। प्राणमनःसंयोगहेतुत्वमतो नेदम
तो नानुमानखण्डं अतो नैव विरोधः॥ ४॥ त्वगिन्द्रियेति। एतच्च श्रोत्राव्याप्तिवारणाय चक्षुराद्यव्याप्तिवारणाय चानुद्भूतत्वं जातिस्त
दन्तावदुद्भूतत्वं सर्वसामान्यगुणोपीति असम्भववारणाय विशेषेति। न चोद्भूतसामान्यगुणानामप्रत्यक्षत्वात् तद्व्यो
जकतयानुद्भूतत्वमेव तत्त्वोक्तिवाच्यं तेषामाश्रयग्राह्यतयैवाप्रत्यक्षतया विशेषगुणमात्र एव तत्कल्पनात् कोबोधूति
व्याप्तेराह ज्ञानकारणेति। विषयेन्द्रियस्य चतुर्धा सन्निकर्षः कारणमित्युपगमात् इन्द्रियावयवार्थसन्निकर्षस्या
पि प्रत्यक्षहेतुतया इन्द्रियावयवेतिव्याप्तिवारणाय न मनःपदं न च वायवीयशरीरेतिव्याप्तिः तस्योद्भूतस्पर्शवत्त्वात्।
अनुद्भूतत्वे मानाभावात्। ननु कालमनसोर्हेतुत्वे न तत्प्रत्यासत्तिरपि हेतुस्तथा च कालमनःसंयोगमादाय कालेऽ
तिव्याप्तिः न च शरीरकालसंयोग एव तथास्तु ननु कालमनःसंयोग इति वाच्यं विनिगमकाभावादिति चेत् न अ
साधारणत्वेन संयोगविशेषणात्। अत एव न वायवीयशरीरेतिव्याप्तिरित्याहुः। वस्तुतो मनःसंयोगत्वेन प्रयोजक
त्वमसिद्धमतः तस्य तु प्रत्यासत्तित्वेन बोध्यं। न च वनकर्कशरनयनरश्मिरश्मिदन्तिनाल्यनस्योद्भूतरूपवत्त्वात् तत्राव्याप्तिरि
न्द्रियत्वेन तस्यातीन्द्रियतया तद्भिन्नस्यैव तेजसस्तत्रोपलम्भादित्याहुः॥ ५॥ ननु शब्देतरे त्वव्याप्तिवारकं [illegible] तदेवर

96

त्वेदसाधने त्वागामिसिद्धिवारकतया व्यर्थमिति वेदयांकुः मादृशाविशेषणस्य विशिष्टाशासंपादकत्वेनैवाव्याप्ति
वारकत्वं अन्यथा विशेष्यस्यापि व्याप्तत्वे विशिष्टस्यानुत्तरांश अप्यापत्त्वादेवं चाखंडाभावे व्यर्थाभावादिति तच्चिंत्यं ·
विशेष्यस्य यत्राव्याप्तिवारकत्वं तत्रैवमप्यगतेः यथा गंधयोग्यत्वे पृथिवीलक्षणे · केचित्तु द्विविधमितरभेदसाध
नं लक्ष्यं पक्षीकृत्य लक्षणेनेतरसपक्षीकृत्य लक्षणाव्यतिरेकेण तथा चेतरे इंद्रियत्वावच्छिन्नानि पृथ्वीभेदप्रतियो
गिन एतल्लक्षणशून्यत्वादिति साध्यते यदि तदा प्राह्येतरपदं प्रागेवाव्याप्तिवारवारकतया सार्थकमेवेति वदंति॥
सिषा० तदपि चिंत्यं · एवमपि व्यभिचारज्ञानकरणपदादेर्भागासिद्धिवारकतया व्यर्थत्वापत्तेः अव्याप्तिवारावारकत्वात् · त
स्मादेतत्कल्पे सर्वत्राखंडाभावान्न व्यर्थमिति विभावनीयम्॥ अन्ये तु एकस्मिन् धर्मिणि विशेषणद्वयो
पस्थितौ एकेनैव तत्र व्याप्तिग्रहसंभवे परं वैयर्थ्यं यथा नीलधूमे एवं च घटकपदार्थभेदेन वोपाधिभेदाद्व्या
प्तिवारकविशेषणघटितविशिष्टोपाधौ न दूषिततद्वृत्तिधर्मग्रहे विना व्याप्यग्रहान्तरे व्यर्थत्वमिति अखंडाभा
ववत् तदविशिष्टोपाधिवृत्तिधर्मस्यावशिष्टे वृत्तेः अत एव प्रमेयत्वादिः शाब्दे हेतुत्वेनाभिधानं · न चैवमप्र
योजकानेकविशेषणघटितोपाधावपि न व्यर्थविशेषणत्वं स्यादिति वाच्यं · इष्टत्वात् · अन्यथाऽखंडाभावे ॥९६॥

कागतिस्तत्रापि प्रतियोगिकोटौ अनेकविशेषणप्रक्षेपे तिप्रसंगसंभवात् त्याहुः । नव्यास्तु । इंद्रियपदवाच्यत्वेतर त
स्तद्भिन्नत्वमात्रे नेरिक्त इत्याद्युक्तिरेतल्लक्षणस्य विनानतिरिक्त इत्याद्युक्तित्वादित्येवात्रेतरभेदानुमानमभिप्रेतं तत्र चतुराष्ट्
तरपदं व्यभिचारवारकमेव अन्यथा गंधवत्त्वेतरेंद्रियत्वादौ व्यभिचार[illegible]स्य ततो निवृत्तेः इंद्रियपदवाच्यत्वावच्छेदेन तद्भे
दसिद्धिरिंद्रियलक्षणप्रयोजनं साध्यधर्मिपक्षीकरणेन जायत बाधमपक्षीकरणे नेवं तिन काप्यधिकविशेषः यद्यपि साध्ये
तरपदं विनापि तदवच्छेदेन तरभेदसिद्धिस्तथापि तद्धर्मितद्भिन्नसाध्यस्य वह्न्यवच्छिन्नप्रयत्नासिद्धौ क्षान्तस्य व्यभिचारवार
क कत्वं तथापि यदि व्यापकेन व्यर्थविशेषणतानास्य कारकेति मिश्रोद्वैययानदायं कल्पयति ति मंतव्यं । इतरत्वमिंद्रियपद
वाच्यत्वसमनियतभेदप्रतियोगितावच्छेदकमेतल्लक्षणं [illegible] नियतमत्वादितीतरभेदानुमाने त्राद्यतरपद
विनाइतरभावणाघन्यतरत्वादौ व्यभिचारः स्यादिति तद्वारकत्वमेव सर्वज्ञाव्यभिचारकविशेषणस्येत्यपि वदंति ।
जन्याजन्यसाधारणप्रत्यक्षलक्षणमाह ज्ञानेति । अत्र निदिध्यासनादिद्वारा मननादिज्ञानकरणके योगिप्रत्यक्षे
व्याप्तिः नच मननादेर्न प्रत्यक्षहेतुत्वमिति वाच्यं । श्रोतव्यो मंतव्य इत्यादिश्रुत्या मननादेरपि मोक्षहेतुत्वावगमप्रत्य

वृसमम४

स्वव्यापारद्वारैव तथात्वात् ॥ न च मननं निदिध्यासनद्वारैव तद्धेतुरस्त्विति वाच्यं । निदिध्यासनस्यापि प्रत्यक्षमेव द्वारमिति
९७ २ न मननस्यावश्यं तद्द्वारत्वात् ॥ न चैकमनने निदिध्यासनेन वानुपपन्नं प्रत्यक्षमित्यनेकं तत्तथा आशुविनाशिनां कामिका
नां मेलकाभावादवश्यमदृष्टद्वारता ॥ तथा च तदृष्टद्वारैव मननादेर्मोक्षहेतुत्वमस्तु प्रत्यक्षं प्रत्यपि हेतुत्वे गौरवात् ॥ मा
नाभावाद्येति चेत् ॥ अनुसन्मननादेर्न प्रत्यक्षमित्यन्वयव्यतिरेकाभ्यां सर्वसर्वप्रतिपत्तेरुत्तरोत्तरप्रतिपादितहेतुत्वेनु
गौरवस्य प्रामाणिकत्वादिति वदंति तच्चिंत्यं ॥ अदृष्टद्वारकत्वविशेषणस्यावश्यकत्वेन तत्र खाव्याप्तिवारणात् ॥ तद्विशेषणा
नाविजन्यजन्यसमात्रएगाव्याप्तेः ज्ञानेच्छाकृतीनां अदृष्टद्वाराकार्यमात्रहेतुत्वा स्फुपगमात् जगन्नाथदर्शनादेरदृष्टद्वा
राज्जीवसा साक्षात्कारकारणतया तद्व्याप्तेः ॥ न चोक्तयुक्त्या द्वारास्फुपगमेपि संस्कार एव मननादेर्द्वारमस्त्विति वाच्यं
तज्जन्यत्वे स्मृतित्वापत्तेः ॥ एतेन ज्ञानत्वघटितधर्मावच्छिन्नकारणताकत्वाभावस्य विवक्षितत्वान्नोक्तदोषः ॥ अत्र वक्ता
न च व्याप्यजातिविशेषणगर्भनेत्यपास्तं ॥ आवश्यकोक्तविशेषणेनैव तद्दोषनिरासेन तद्विवक्षायां गौरवकरत्वात् ॥ अदृ
ष्टादिकारितकोटिस्मरणव्यापितद्धेतुत्वाद्धर्मिज्ञानस्य कोटिद्वारा संशयाद्यजनकत्वमिति मते नेदमतो न तत्राव्याप्तिः ॥

स्मरण १

नन्वीश्वरज्ञानकरणत्वात् तज्जन्यप्रत्यक्षमात्राव्याप्तिः न च व्यापाराभावान्न तस्य करणत्वं तज्जन्यत्वे सति तज्जन्यज
नकत्वस्य प्रत्यक्षहेतौ विशेषत्वादिति वाच्यं एवं अदृष्टस्यापि तद्द्वारत्वेन क्वचिद्विशेषणेनैव तद्वारणात् तस्य कार्यमा
त्रहेतुत्वात् परस्परव्यभिचारेण तद्द्वारकत्वाभावाच्च · असाधारण्यविवक्षायां नोक्तदोष इत्यन्ये · अत्र प्रतियोगि २२
ज्ञानजन्ये तज्जन्यारोपजन्ये चाभावप्रत्यक्षेऽव्याप्तिरिति वाच्यं · आरोपत्वेन प्रतियोगिज्ञानत्वेन वा यस्यैव त
द्धेतुत्वे तज्जनकप्रतियोगिज्ञानस्य तद्द्वारा प्रत्यक्षहेतुत्वे मानाभावात् विशेषणविशेषणधीवत् · अन्ये तु प्रतियो
गिज्ञानमभावज्ञान एव हेतुस्तथा च तस्य नारोपव्यापारकत्वं यज्जनयित्वैव यस्य य ज्जनकत्वं तस्यैव तद्व्यापार
कत्वात् · प्रकृते चारोपमजनयित्वापि विशिष्टाद्यभावज्ञानोत्पादकत्वमित्याहुः · तच्चिन्त्यं निषेधपदादिना प्रतियो
गि ज्ञानं विनाप्यभावज्ञानादभावप्रत्यक्षमात्र एवं तस्य हेतुत्वात् · यत्किंचिदभावप्रत्यक्षत्वावच्छिन्ने तत्प्र
२ व्यापार नुत्वान्न प्रतियोग्यारोपैककत्वं अन्योन्याभावप्रत्यक्षस्य तं विनापि तेनोत्पादादिति तत्त्वं · प्रत्यक्षज्ञापत्वेति · न
न्य च स्मृत्यंशे तु न वस्तुत एव न तत्तारूपविशेषणज्ञानत्वेन संस्कारद्वारा कारणापेक्ष लाघवान्न तु · तज्ज्ञानितास्मृति

९८

स्तथा॰ तत्सद्भयंकल्पने गौरवान्मानाभावाच्च॰ नचतस्याः संस्कारजन्यत्वे स्मृतित्वापत्तिरितिवाच्यं॰ इन्द्रियनिरपेक्ष
संस्कारजन्यत्वस्यतत्वेप्रयोजकत्वात्॰ नचैवंगौरवंदोषः प्रत्यभिज्ञायांलाघवमनुरोधेन पूर्वानुभवस्यैवविशे
षणज्ञानत्वेनकारणत्वेसिद्धेतस्यप्रामाणिकत्वात्॰ नचैतद्गौरवभयेनतत्रास्मृतिरेवतथाकारणत्वेनकल्प्यतिवा
च्यं॰ तत्रकारणीभूतविशेषणज्ञानकल्पनाद्यत्रापितद्गौरवानुपपत्तेः॰ नचप्रथमलाघवेनसंस्कारजन्यत्व
स्यैवस्मृतित्वप्रयोजकत्व कल्पनात्तदनुरोधेनैवगौरवस्यदोषत्वंप्रामाणिकत्वेनतिरस्कृत्यप्रत्यभिज्ञा
याः स्मृतिः कारणंकल्प्यतिवाच्यं॰ स्मृतित्वप्रयोजककल्पनस्यप्राथमिकत्वेमानाभावात्॰ अनुपजीव्यत्वे
नप्रत्यभिज्ञाकारणविशेषणज्ञानकल्पनेऽननुरोध्यत्वाच्च॰ नचैतत्कल्पनमपितस्यानुपजीव्यमेवतथाचैत
दनुरोधेनस्मृतित्वप्रयोजककल्पनेगौरवंकथमदोषः स्यादितिवाच्यं॰ प्रत्यभिज्ञादिज्ञानकारणत्वकावधा
रणंविनातद्व्यावृत्तस्यस्मृतित्वप्रयोजकस्यकल्पनस्यासंभवात्॰ नचप्रत्यभिज्ञाकारविशेषणज्ञानक
ल्पनस्योपजीव्यत्वात्॰ एतेनस्मृतित्वेसंस्कारजन्यत्वमेवतंत्रंतद्धेतुत्वेनैवसंस्कारस्यसिद्धेरित्यपास्तं ॥९८॥

क्रमेणाजत्यन्तिज्ञाहेतुत्वेनापितस्य सिद्धेरिति । मैवं । विशिष्टज्ञानं प्रत्यव्यवहितस्यैव विशेषणज्ञानस्य हेतुत्वेन स्यव
कुव्यवहितस्यापि संस्कारद्वारा कस्य । अन्यथा केवले दंडे ज्ञाते क्रमेण दंडवत्पुरुषे दंडेंद्रियसन्निकृष्टे तदानीं
दंडज्ञानं विनाप्ययं दंडीति बुद्ध्यापत्तेः । एवं च मादावपि स्मरणरूपविशेषणज्ञानं क्वापि न सिद्ध्येदित्याहदिकं वद
तितद्विंत्यं । अव्यवहितविशेषणज्ञानत्वेन तद्धेतुत्वे स्मरणरूपविशिष्टज्ञाने व्यभिचाराद्विशिष्टानुभवं प्रति
तथा हेतुत्वे गौरवात् । ननु कथं तर्हि व्यभिज्ञाने सर्वत्र तुल्यत्वान्न हेतुरिति चेदिवं [illegible] विशेषणज्ञानस्य न संस्का
रव्यापारकत्वमजनयित्वापि तेन विशिष्टज्ञानोत्पादनात् । यं जनयित्वैव यस्य यज्जनकत्वं तस्यैव तद्व्यापारत्वात् ।
अन्यथा प्रत्यक्षादिजनकत्वादिः सन्निकर्षादिव्यापारकत्वापत्तेः । यदि च कार्यतावच्छिन्नेतरस्य हेतुत्वान्नैव
च परस्परं सन्निकर्षादिव्यभिचारान्न तथा तदा विशिष्टानुभवत्वावच्छिन्नो विशेषणज्ञानस्य हेतुत्वात्तत्र च सं
स्कारस्य व्यभिचारान्न व्यापारत्वमिति तुल्यं । नन्वेवमुक्तन्यायेन स्मरणोपि संस्कारद्वारा अनुभवरूपविशे
षणज्ञानस्य जन्यत्वं न स्यादिति चेत् । सत्यं न च हि संस्कारो न विशेषणज्ञानस्य व्यापारत्वेन विशिष्ट[illegible]नु

स्त २

९९

नवश्यत्वजनकत्वात्‌ किंतु स्मृतित्वावच्छिन्ने स्वसमानविषयकसमानाधिकरणपूर्ववृत्तित्वेन हेतुत्वात्त
त्रव्यभिचारात्संस्कारव्यापारकत्वं न चैवमिहापि प्रत्यभिज्ञात्वावच्छेदेन पूर्ववृत्तित्वेन हेतुत्वात्तत्र व्यभि
चारात्संस्कारव्यापारकत्वमस्त्विति वाच्यं विशिष्टानुभवानुरोधेन तत्तास्मृतिरूपविशेषणज्ञानस्यावश्य
कत्वेन तदेव तद्धेतुत्वेन तथा कार्यकारणभावमानाभावात्‌ तत्तास्मृत्यैव तद्धेतुत्वस्यान्यथासिद्धेश्च अत
एव यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषे तद्विशेषस्य हेतुत्वात्‌ प्रत्यभिज्ञारूपविशिष्टज्ञानविशेषे तत्ता
रूपविशेषणज्ञानत्वेन पूर्ववृत्तित्वस्य हेतुत्वे तत्र च व्यभिचारात्संस्कारव्यापारकत्वमित्यपास्तं एवमप्याव
श्यकत्वे तत्तास्मृतेरेव तथा कारणतापत्तेः यस्यैव सामान्येन हेतुत्वं तस्यैव विशेषरूपत्वेन तथात्वाभ्युपगमा
त्‌ अत एव च प्रमादादव्यपारोप्यप्रस्मरणकल्पनं यदि चैनेवं तदा अनुमित्यादिकमपि संस्कारद्वारा विनष्टपराम
र्शोजिन्यति यदि चानुमित्यंतरे व्यभिचारात्‌ न तस्य संस्कारव्यापारकत्वं तदा प्रकृतेपि तुल्यं तस्माद्धेतु नवस्य
नष्टत्वात्संस्कारस्य व्यापार[illegible]त्वायोगात्‌ अननुगत्यात्तत्तास्मरणकल्पनं गौरवं च फलमुखमिति दिक्पंत्र्या॥९९॥

मः ६

ननु प्रत्यभिज्ञानस्य संस्काराजन्यत्वे ततः तत्तोल्लेखो न स्यात्। संस्कारजन्यत्वस्यैव तदुल्लेखाङ्गीकारादिति चेत्
न। कारणत्वेन कारणाकारणत्वादिना वा यज्ज्ञानं स्वोत्पत्तौ कथंचित् संस्कारमपेक्षते तस्यैव तदुल्लेखोपगमात्।
अन्यथा तन्महं जानामीत्यत्र प्रत्यभिज्ञानुव्यवसायात् तत्तोल्लेखो न स्यात्। तस्य त्वन्मतेऽपि संस्काराजन्यत्वा
त्। तस्याः प्रतिसंस्कारत्वेन संस्कारजन्यत्वस्येत्यर्थः॥ ६२ ॥ मूः ॥ जातिव्यक्तीति। यद्यपि तन्मते नि
र्विकल्पकमप्रसिद्धं तथापि धर्मविशेषणतयागाहि ज्ञानं निर्विकल्पकमभ्युपेत्यैवदुक्तं। साहचर्यादीति।
साहचर्यत्वादित्यर्थः। प्रतियोगं प्रति तज्ज्ञानजन्यत्वेऽपि प्रत्यभिज्ञायां तत्तांशस्य न प्रत्यक्षत्वं किन्तु परोक्षत्वमे
वात एवांशे विवक्षापक्षे प्रागुक्ताव्याप्तिः संगच्छत इति भावः। यद्वा प्रतियोगिसंस्कार एव तत्र जनक इति मते
नेदं। परंपरया तज्जनकानुबोधे पक्षे प्रागुक्ताव्याप्तेः। ननु दीर्घप्रत्यक्षव्यवहार एव प्रतियोगिज्ञानापे
क्षानसाहचर्यप्रत्यक्षस्थल इति चेन्न। तथा सति प्रागुक्ताव्याप्तेरलग्नकत्वापत्तेः। दीर्घेति। तस्य पारिभाषिकवि
शेषस्य दुर्ग्रहत्वात् प्रयोगपतां तद्भूतयोग्यताकत्वादित्यर्थः। किन्तु नत्तां तद्धायां सविकल्पकत्वेन सविकल्प

काजन्यत्वं तल्लक्षणं विवक्षितं । एवं च तत्रांशेऽपि प्रत्यक्षत्वेत्यर्थः । हेतुत्वेति । तथा चानुमेयांशेऽपि परोक्षत्वेन
स्यादिति भावः । ज्ञानेऽज्ञास्यतीति । यद्यप्येकत्र ज्ञाने गुणदोषजन्यत्वं यदि इदं संभवति तथापि इदमापादनं तत्र । वस्तु
३ आतिदे तः साक्षात्कारित्वस्य व्यवस्थापनाज्ज्ञाने व्याप्तिघटितनियामकं नियमाच्चानंशावच्छेदेन । हेत्वोरित्युच्यते । डिज्ञानोवि दा२
साधारणदूषणं चानास्थेयं । सर्वज्ञानेति । न च ज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणताजन्यत्वं तथेति अय ४
वाच्यं । अनुमेयांशेऽपि प्रत्यक्षतापत्तेः । ज्ञानजन्य एवेति । ज्ञानस्वरूपात्मकस्य तत्त्वाज्ज्ञानजन्यत्वादिति भा
वः । ज्ञानाजन्य एवेति क्वचित्पाठः । तत्र विषयत्वस्य विषयघटितधर्मस्य ज्ञानाजन्यत्वादित्यर्थः । तथा
यत्त्रांशेऽपि प्रत्यक्षत्वं स्यादिति भावः । स्वमतावष्टंभेनाह [illegible]ति । स्वमतेनैवाह अन्यजिज्ञासामिति । अत
एवेत्यस्यार्थमाह [illegible]ते । नन्विंद्रियजन्यत्वं प्रत्यक्षलक्षणमसिद्धं असान्निकृष्टस्येंद्रियस्याहेतुत्वात्तत्सं
न्निकर्षाणां चाननुगतत्वादित्यत आह अन्यस्येति । [illegible]मेति । न चैवं षोडशपरिगणनमसंगतमिति वा
च्यं । विशेषणतात्वेनैकीकृत्य विभजनात्संबंधविशेषणता च संयुक्तविशेषणतासंयुक्तसमवे ॥१००॥

तचित्रेण पतेत्येवं निवार्यः न चैवं विभागोत्पत्ताय समवायत्वेन चतुर्णामेवाव्यापकः स्वतंत्रस्य नियोगपर्यनुयोगान
र्हत्वात् तस्येति स्वस्मावयवावच्छेदेन ग्राह्यसंयोगेपि प्रत्यक्षानुत्पादादिति भावः यद्यपि स्वस्वावयवावच्छेदेनावयवसं
योगोप्यतिप्रसक्त एव स्थूलावयवावच्छेदेन तत्संयोगस्य हेतुत्वे ग्राह्यसंयोगेपि तथैव हेतुरस्त्विति तथाप्यापाततस्तदं मा२
शेनेति स्वमवच्छेदकान्तर्गतावयवानुगतेति भेदः नापि चावच्छेदकेति न च परमाणावच्छेदकान्तराभावात्तत्संयोगस्य हे
तुः स्यादिति वाच्यं तस्य तत्त्वेतिप्रसंगतादवस्थ्यात् तथा च ग्राह्यसंयोग एव हेतुर्वाच्य इति भावः अन्यथेति स्थूला
तरभागावच्छेदेन ग्राह्यसंयोगस्य हेतुत्वे तिप्रसंगस्योक्तत्वात् न्याहावयवावच्छेदेन संस्थाया व्याप्यः तथा च महदवयवसं
योग एव हेतुरस्त्वित्यत आह एवं चेति भावः इत्यत आहेति इत्यमात्रग्रहणस्य पक्षः एवं चेति सामान्यत एव उदभूतलौकिकद्र
व्यस्य स्थूलावच्छेदेन न हेतुकल्पनादिति भावः तत्संयोगेपीति ग्राह्यादेनावच्छेदकायामवच्छेदकत्वस्य स्वस्मावयवावच्छेदेना
वयवसंयोगेपि नतु ग्राह्यमिति स्थूलावयवस्यावच्छेदकत्वे ग्राह्यसंयोगेन तदवयवसंयोगान्यथासिद्ध एवेति
बोध्यं ननु स्वस्वावच्छेदेन यद्यपि संयोगेपि कथं न प्रत्यक्षं न वयवावच्छेदेनावयववृत्तित्व तदवच्छेदेनावयविसं

101 योगोयादृकोत्तवतिद्वावच्छेदेनवुमावगच्छतीतिवाच्यं॰ द्रव्यस्याव्याप्यवृत्तितापत्तेरितिचेन्न॰ यथाग्राह्यसंयोग
मात्रस्यातिप्रसक्ततयास्थूलावयवस्तदवच्छेदकोघटादिरतत्पाठस्याप्यतिप्रसक्तत्वाघटादिघटस्थूला
वयवविशेषस्यैवावच्छेदकत्वकल्पनात्॰ एतादृशस्थूले द्रव्यमव्याप्यवृत्त्येवेत्यन्ये॰ आत्मावयवविधानसंकेत
नान्येति॰ आत्मायमुद्घाटयति आत्मात्मप्रसरेति॰ लाघवेनेति॰ एतच्च संयुक्तसमवायनिरूपितकार्यतावच्छेदक
गुणादिप्रत्यक्षत्वतत्सत्त्वस्य सत्वमेवचानुगतस्यापिजन्यतावच्छेदकता इत्यभ्युपगमेनबोध्यं॰ वस्तुतस्तु संयु
क्तसमवेतलौकिकप्रत्यक्षत्वमनुगतत्वात्॰ तदवच्छेदकं॰ द्रव्यभिन्नत्वविशेषणेवगौरवं॰ एवंच यथाचाक्षु
षप्रत्यक्षत्वात्संयोगाद्धेतुस्तथागुणादिप्रत्यक्षत्वात्संयुक्तसमवायोपि॰ नचैवंसंयुक्तसमवेतसमवायोपिहे
तुःस्यादितिवाच्यं॰ इष्टापत्तेरितिवदंति॥ वयंतुब्रूमः॥ विपरीतंलाघवंसंजनयत्यात्मग्रहमनोयोगत्वेनैवहेतु
त्वकल्पनात्॰ इंद्रियसंयोगत्वापेक्षयामनस्त्वस्यजातित्वेनतस्यलघुत्वात्॰ नचव्यभिचारात्तन्नथा॰ आत्मप्रत्य
क्षत्वावच्छेदेनैवतदनुत्वात्तथाचाक्षुषप्रत्यक्षत्वात्संयोगोनहेतुः॰ किंतुगुणादिप्रत्यक्षत्वात्संयुक्तसमवायएवनचोद्ये ॥१०१॥

यतद्धेतुत्वकल्पनं मानाभावात् लघुत्वेनैवोपपत्तेः । मनोइंद्रियसंयोगत्वं सामान्यमिति गुरुत्वेपि तत्रैव तत्कल्पनं । का
रणताग्राहकेण सामान्यविशेषेण लघुनि तद्धेतुत्वस्य नाख्यातत्वाद्व्यापारः किंतु यत्न एव । न चातिप्रसंगा
त्स्थूलावयवावच्छिन्नसंयुक्तसमवाय एव हेतुर्वाच्यस्तस्य च त्रसरेणावभावात् न च संयोगोपि क्लृप्त इति वाच्यं ।
घटादिग्रहमात्र एव स्थूलावयवस्यावच्छेदकत्वात् । अन्यथा संयोगहेतुत्वे का गतिः । तस्माद्घटादिसंयुक्तसम
वायनिरूपितकार्यतावच्छेदकमवयविज्ञत्वस्य स्वव्यापकत्वेन तदा संयोगमात्रं नावच्छिन्नसंयुक्तसमवायमात्रं हेतुरित्यु
त्तयहेतुत्वमयुक्तमेवेति चिंतनीयं सूरिभिरिति । स्वाश्रयसंयोगस्य हेतुत्वे स्वस्यापलक्षणत्वमपि अत्यत्र किं तेन
वेद्यामिति । ननु गंधप्रत्यक्षहेतुर्गंधेंद्रियसन्निकर्षाश्रयत्वमत आह गंधेंद्रियेति । यद्यपि स्वप्रत्यक्षजनकेंद्रिय
सन्निकर्षाश्रयत्वे साध्ये न दोषस्तथापि स्वत्वेनानुगतमित्याशयेन तथोक्तं उपलक्षणत्वेनेति । ननु तस्य स्वा
श्रयद्रव्यविशेषणोपलक्षणयोर्न तु संयुक्तद्रव्यमात्रं तथा च नोक्तातिप्रसंगः । यथा लिंगज्ञानो हेतुत्वे लिंगादेः स्वविष दि
यकज्ञानविशेषणोपलक्षणयोर्न तु ज्ञानमात्रमिति चेत् । एवमपि लिंगवत् समवायस्यावच्छेदकत्वपर्यवसानाद्धेत

स्यचानुपदमेवदूष्यत्वात्‌ । नहीति । नचद्रव्यग्रहे संयोगः कुसुमसमवायोऽकुसुम इति विनिगमकमिति वाच्यं ।
ग्राह्यग्रहे तस्यापि कुसुमत्वात्‌ तस्यापि विनिगमनाविरहात्‌ परंपरासंबंधत्वेनोत्तमतेष्फलप्रहेतुत्वमिति अविरो
धइत्याह तदनादिति । वस्तुतो गंधादेरिंद्रियसन्निकर्षाश्रयत्वमस्मृतपरमन्यथाविन्नोच्छेंद्रियसन्निकर्षाज्जाता
नुभवस्य सत्तेन स्यादत एवायत्र ग्राह्यस्य प्रत्यक्षत्वेन प्रत्यासत्ति साधनमिति तावत्‌ । तदनभ्युपगमेणीति । रूप
त्वादेर्जातित्वानभ्युपगमेपि रूपादिवृत्तिसाक्षात्त्वस्यातिरिक्तपदार्थत्वेन तन्मतेसमवेतत्वात्तद्ग्राहकत्वेनैवत
त्सिद्धिरस्त्वित्यर्थः । नचाश्रयसाक्षात्त्वयोर्लाघवमाश्रितानामनेकत्वादित्यस्वरसादाहाश्रयतिं । ननु गंधसाक्षात्त्वधी
रूपमानादेवनप्रत्यक्षादित्यस्वरसादाहरसत्वेति । तथाचतद्ग्राहकत्वेनैवतत्सिद्धिः स्यादिति तावत्‌ । रूपत्वेति । य
द्यपिरूपत्ववर्णत्वयोरभेदादिदमयुक्तं तथाप्यनुगताख्यपदेतद्भिलापपरं तथाचानुगतत्वपञ्चाह्यनुगमोनानुगत
धर्मविनेत्यनुगतज्ञानसिद्धिरिति तावत्‌ । चक्षुरिति । चक्षुर्मात्रग्राह्येंद्रियग्राह्यगुणत्वादिकमित्यर्थः । तेन मनोग्राह्य
तयानासंभवो नवारूपादावव्याप्तिः । आद्यत्वं च ग्रहणविन्नोच्छत्वे अतो गोपनीतिता न मादायासंभवश्रत्याहुः ॥ १०२ ॥

न च स्नेहसंयोगव्यक्तिविशेषे तिव्याप्तिः योग्यतागर्भत्वात् · अतीन्द्रियेति · तदुक्तरूपस्य तत्र बाधादिति वि
क्तस्यान्यतमस्य गमात्वं अनुगतव्यापकतावच्छेदकान्तावादिति तावत् · ननु योग्यतागर्भं तन्न बाधितमित्यत
आह योग्यतायाइति · तथापीति · चक्षुरादिघटितेन्द्रियसन्निकर्षेण तत्र त्यस्य सत्त्वप्रसंगः इत्यर्थः · विरोधादि
ति · यद्यपि नोद्भूतत्वादिकं जातिरस्ति तथापि तत्त्वावच्छेदकत्वे दन्हून्नो न विरोधस्तथापि वक्ष्यमाणयुक्त्या तज्जातित्व
प्रवृत्तिस्वभावतावच्छेदकत्वेन न तथा क्रमितिध्येयं · ननु नीलाद्युपलब्धिकरणत्वेन तत्सिद्धौ तत्करणग्राह्यत्वे रूपत्वम
तो नान्योन्याश्रय इत्यत आह नीलेति · गंधरसेति · न च पार्थिवत्रसरेणौ व्यभिचारः परकीयत्वेन नीलादिविशे
षणात् · स्वत्वेतं मनसि व्यभिचारवारणाय · विशिष्टाभाव तथा च न व्यर्थविशेषणतं · अन्ये तु प्रत्येकगर्भनाना
हेतुतात्पर्यं · न चैवं गंधाव्यंजकपरकीयनीलव्यंजकत्वहेतौ लुप्ताक्षरनीकव्यंजके त्वले व्यभिचार इति वाच्यं
तस्य न च त्वरा गंधव्यंजकत्वात् · व्यंजकत्वस्य योग्यगर्भत्वस्योक्तत्वात् · न चैवमपि गंधाव्यंजकपीतव्यंजकत्व
हेतौ कषोपले व्यभिचारस्तस्य सुवर्णपीतव्यंजकत्वात् · तत्र मनपीतत्वावांतरजातेर्व्यंजनादित्यादृ · सन्निकर्ष
व्यभिचारवारणाय द्रव्यपदमपि देयं · आलोकवत् · दीपिर्चेद्रालोकवदित्यर्थः · अन्यथा स्पर्शाव्यंजकत्वमास

103

कस्यात्। ननु त्वक्तुनीलादिगतैव हेतुस्तथापि नीलत्वजात्यनुकूलत्वाङ्कुराद् अपि साध्यत्वासन्निरित्याह नीलेति। च
क्षुर्ग्राह्यत्वी निरुक्तं बोध्यं अन्यथा किं स्वन्तवाह। जातित्वेति। जातिपदाभिधेयत्वापत्तिरित्यर्थः। अन्यथा तेद्रापत्तेः।
स्वमते नोह जातेरिति। तथा च त्वदुक्तेन जातिपदप्रवृत्तिनिमित्तमिति भावः। अवयवेति। गोत्वलत्वादिकं तन्मते
पि जातिरिति व्यभिचारवारणार्थं अवयवावि पदमित्याहुः। अन्तयमवसाधारणदोषमाह गोत्वेति। पाकेनेति। तथा
चात्याद्यादिध्वनीत्यनंतरं जायमानाया प्रत्यभिज्ञायास्तज्जातीयत्वं विषयः। स्पष्टप्रत्यभिज्ञोदि वादिति भावः। तदि
ति। ध्वंसप्रतियोगित्वेन रूपादेर्बोध्यं स्यात्। ननु समवायस्येत्यर्थः। समवायस्य समवायिकारणत्वेनोत्पादा
दीनि वक्तुं व्यपि बोध्यं। यद्यपि तन्मते समवायो न प्रत्यक्षस्तथापि वैदिकदेशीयमतेन समाधेयमित्यपि बोध्यं। प्र
वाह्ययुक्तिमवाहतयामिति। एकत्व इति। तदन्यासंभेदात्खलीत्युपपादनेपि वास्तवमधुरतरत्वादिकं नो
पपद्येतेत्यर्थः। न च तदा सिद्धमेव। बाधकाभावेनोत्कर्षत्वेन प्रतीतेः प्रमात्वात्। एवं च सति घटादीनामपि नित्य
त्वे सत्कार्यवादापत्तिरित्यत्र तात्पर्यं। समवायेन ग्राह्यस्येत्यत्र तत्रकत्वेनान्वेति। यः सप्रतियोगिकजातीनांविं ॥१०३॥

तेन दत्रनास्तीत्याह सप्रतियोगिकत्वं हीति॥ शब्दग्रहे पुरुषविशेषन्नाह ग्रहे॥ न च पुरुषद्वय गृहीतकत्रशब्दजाति
द्वयसंकरापत्तिः स्वस्वकर्णावच्छिन्नोस्यत्वस्यैव तेन ग्रहे इत्यभिप्रायमाह॥ अत्यासत्तीति॥ तथा च समवायस्यैव शब्द
ग्राहकत्वं न त्वेकजातेरिति भावः॥ न च प्रत्यासत्तित्वस्यानुगतस्य व्यापकतावच्छेदकस्याभावादनुमानाभावः प्रत्य
क्षजनकेन्द्रियनिरूपितधर्मस्यैव तत्वेनात्र विवक्षितत्वादिः व्याप्तिश्च पक्षस्य सर्वत्वप्रत्यक्षजनकेन्द्रियनिरूपित
धर्मविशिष्टत्वसामान्ये मुखत्वादिनुभयकर्णेति॥ न च कर्णसंयोगावच्छिन्नत्वं च कर्णसंयोगस्य विशेषणतायां बाधः
उपलक्षणतायां स एवातिप्रसंग इति वाच्यं कपिसंयोगस्याव्याप्याद्वावच्छेदकत्वेन स्वरूपसंबंधविशेषे या सम
वाये तस्य विशेषणत्वात्॥ ननु समवायस्यैव कथं समवाये न तस्य विशेषणत्वमत आह कर्णसंयोगाद्धीति॥
परिचायक उपलक्षकः॥ ननु विशेषणत्वेप्येवं तस्य तथात्वाभावादितिभावः॥ ननु सर्वशब्दाधारता सर्वत्रास्ति त
था च स एवातिप्रसंग इत्यत आह एवं चेति॥ यथा संयोगस्येति॥ शरीरसंयोगस्येत्यर्थः॥ सर्वत्रेति॥ चरणावच्छे
देनापि शरीरसंयोगस्योपलंभादित्यर्थः॥ ननु शब्दाधारतायाः शब्दनिष्ठत्वे शब्दसमवायो व्याप्यवृत्तिरन्यथा

104

साध्यतिप्रसक्तःस्यादिति अत आह नवैवमिति समवायेनेति स्वसमानाधिकरणात्यंताभावप्रतियोगित्वम
व्याप्यवृत्तित्वं तच्चोभयधर्मसिद्धं समवायस्य तत्रावृत्तेः तदभावस्य चाव्याप्यवृत्तित्वादित्युभयपर्यवसितो
र्थः विशेषणतया तत्र वर्त्तमानेपि व्याप्यैव वर्त्तत इति न समवाये न नवा स्वरूपसंबंधेन समवायस्याव्याप्यवृ
त्तित्वं ननु यदि विशेषणतया समवायोप्यव्याप्यवृत्तिस्तदा सर्वत्र समवायाभावोपि व्याप्यवृत्तिरिति व्याहतं
त्विति चेन्न समवायसंबंधावच्छिन्नप्रतियोगिकसमवायाभावस्य व्याप्यवृत्तित्वोपगमात् तस्य च स्वरूपसंबं
धावच्छिन्नसमवायसामानाधिकरण्याविरोधात् अत एव समवायावच्छिन्नतदभावस्य संयोगसंबंधावच्छि
न्नोकात्रासामानाधिकरण्यं ननु विशेषणतया यदि समवायस्तदभावश्च तत्र वर्त्तेत तदा निरुक्तमव्याप्यवृ
त्त्वमिति चेन्न येन संबंधेन यत्र यद्वर्त्तते तत्संबंधावच्छिन्नतदभावसमानाधिकरणस्याव्याप्यवृत्तित्वा
दित्याहुः एवमिति यदि शब्दसमवायो विशेषणतयाव्याप्यवृत्तिस्तदा सर्वशब्दसमवायः कर्णसंयोगावच्छि
न्नस्तथा च सर्वत्र शब्दोपलब्धिः स्यादित्यर्थः शब्देति वायो रूपसमवायसत्वेपि रूपाभावावच्छेदसमवायोपि ॥१०४॥

पकर्णसंयोगावच्छेदेनशब्दाभावस्तत्रतत्समवायसत्वेपिनशब्दप्रत्यक्षं तथाचकर्णसंयोगावच्छिन्नस्य
शब्दस्यसमवायः प्रत्यासत्तिः यद्वाशब्दसमवायएवप्रत्यासत्तिः कर्णसंयोगावच्छिन्नशब्दत्वेनैवयोग्यतया
तदन्यस्यायोग्यस्यैवानुपलंभात् नचैवंगोत्वेनवापिप्रत्यासत्तिर्नावच्छेदकेतथात्वेनतुल्यत्वादिति यत्तुसमवा
यमात्रस्यप्रत्यासत्तित्वेतत्सत्वेपिकर्णावच्छेदेनाविषयाभावादेवनप्रत्यक्षं योवा कूपाद्यप्रत्यक्षवदिति तन्नइंद्रि
यत्वेवास्तितत्रैवप्रक्षेप्स्यैतदप्रसंगात् विषयप्रत्यासत्योर्वैकल्यात् निमित्तवायुसंयोगेति व्यवहितकर्णेनि
मित्तवायुसंयोगाभावादित्यर्थः तथाचयच्छब्दनिमित्तवायुर्यत्कर्णगामी सतच्छब्दग्राहक इतिभावः तस्येति इंद्रियस
न्निधेश्चात्रसत्वादित्यर्थः साक्षादिति इंद्रियांतरेतथादर्शनादितिभावः ननुनभोमात्रमेवश्रोत्रमस्तुनतुक
र्णावच्छिन्नमपिनचातिप्रसंगः निमित्तवायुसंयोगाभावादुक्तयुक्त्याचातन्निरासस्संभवादितिचेत्तन्न बधिर
स्यांद्रियवैकल्येननशब्दग्रह इतिसर्वसिद्धं नभोमात्रस्यहिश्रोत्रत्वेतन्नस्यात् नचादृष्टवैकल्यंतस्यदृष्टकारण
विघटकत्वसंभवेतत्कल्पनेनानवकाशात् अन्यथातिप्रसंगात् तथाचादृष्टविशेषजन्यकर्णशष्कुल्यवच्छिन्नत्वे
नैवतस्यांद्रियत्वं तथाचविशेषणाभाववैकल्यार्थं रियमिति वदंति परंप[illegible]येरेति तथाचपरंपरासंबंध[illegible]विषय।

115 त्वाप्रतीतिः प्रमापीति तावत् । आत्मना भयेनेति । आत्मासमवायित्वेनेत्यर्थः । तथैवेति । यद्यपि वीणायामवच्छेद
कत्वसंसर्गसंबंध एवेति विशेषः तथापि समवायाप्रतीयमानेन साधनत्वमिति तावत् । वीचीतरंगवदिति । ननु
दण्डादिजन्यतावच्छेदकत्वेन दण्डजातिः यस्त्वत्रस्यु तथा च जातिसंकर इति चेत् न । नानादिजन्यतानैकजा
त्यावच्छिन्ने लाघवात् दंडचक्रादिजन्यतावच्छेदकघटत्वादिवदित्याहुः । यद्वेति । तथा च पः आत्मत्वस्य यावत्सु तः स
म यापीति प्रतीतिबाधिकं विनाश्यमत्वैकल्प्यं न जातीयविषयत्वं चेत्य स्वरसः कल्पके । यत्कृतोऽध्यवसितो विकल्प्यो
यं । आगन्तावास्टे वीचीतरंगन्याय । आगन्तावच्छेदकं दण्डगोलकन्यायः एवं यद्वा रश्मिद्वयोर्वा आगन्तावच्छिन्नत्वादि
त्रः आत्मा जायते इति दृष्टान्ते कत्वनियम इति । कदम्बगोलकन्यायेनाधिकमात्राकतेनेति । ननु वायुस्पन्दनेन
भूते द प्रयोजकः आगन्तावायादिस्पन्देनानावायुनाप्येकस्यैव प्रात्स्पदंडद्वयजन्यैकघटवत्प्रादनात् तद्देह एकेनापि
अनेक२ वायुनात्मा स्पन्दनाद्भावत्रयकत्वात् आगन्तावच्छेद एवं तत्रोत्पत्त्यनुत्पादनात् प्रागभावावच्छेदादिति । अन्यथा समवायादि
ति । परम्परा कारणतावच्छेदसाति आगन्तावच्छेदेनान्यत्र कार्यतावच्छेदकनिमात्रात् प्रकृतेऽपि तद्देत्कार्यभेदः कल्प्यान्य
यदृष्टस्यैव कल्पनात् । न तु घटपटयोर्विजातीयसमवायिव्यक्तित्वेऽपि जातिर्न स्यात् घटव्यक्तिषु समवाय्या ॥ १०५ ॥

दिव्यक्तिभेदेन तस्यादर्शनादिति भावः पाकज इति । अत्र श्यामरूपादिध्वंसस्योपादानप्रसंगादिति ध्येयं । स्वप्रा
गभावेति । ननु स्वसमानाधिकरणप्रागभाववत्वेन हेतुत्वात् यत्र यावान् प्रागभावस्तत्र तावानेव हेतुरत एव नोक्त
व्यभिचारस्तथा च सम्भवे सर्वत्र प्रागभावानां हेतुत्वे यदा ... केनापरस्यान्यथासिद्धिरिति चेन्न लाघवे
न स्वप्रागभाववत्वेनैव हेतुत्वात् अन्यथा स्वसमानाधिकरणयावत्किंचित्प्रागभावमादायोक्तव्यभिचारस्या
दापत्तिः न गंधेन रूपप्रागभावानामन्यथासिद्धिमात्रं किंतु व्यभिचारापत्त्या हेयत्वेति । तुल्यत्वेपि । पूर्वोक्तवि
सदृशत्वेपि सर्वाभिन्नत्वेपीति यावत् । असोरभनाशानंतरं क्वचित्सोरभसोरभनाशानंतरं क्वचित्सोरभवे
त्यर्थः ननु पूर्वरूपनाशानंतरं रूपांतरं जातमेवेत्यत आह नचेति । उपामानेन तरक्रमित्यवपाकाद्द
त्यर्थः ननु पूर्वरूपनाशानंतरं रूपांतरं जातमेवेत्यत आह नचेति । उपामानेन तरक्रमित्यवपाकादि
ष्टं ननु विद्यमानसजातीयं तथा चाग्निसंयोगस्तादृशरूपेन कारणं किंतु न्याय्यादित्यर्थः एवं सति
व्यभिचा दन्वयव्यभिचारादित्यर्थः नहि सत्यपि पाकेन दृष्टसजातीयं रूपं कदापकरणं दृष्टं । क्वचिद्
रूपत इति चेन्न । तत्र भेदमानाभावात् प्रत्यभिज्ञानाच्च । तथा च तत्र रूपादिप्रागभावानां व्यभिचाराद्
प्रागभावस्यैव तद्धेतुत्वमिति भावः । प्रधानत्व निसंयोगनिरूपितकार्यतावच्छेदकं रूपादित्वमेव तथा च

106

तेन तत्र रूपादिकमुत्पादनीयमेवेत्यत आह नवेति॰ अग्निसंयोगादवयवरूपजन्यरूपादीनां निवर्त्त्येषु न
थात्वकाश्चिद् द्यग्निसंयोगं कश्चिद्दवरूपादौ कारणं तदिदमुक्तं अग्निसंयोगाविरोधादिति॰ तथा च तदभावा
त्तद्रूपान्तरमुत्पद्यत इति तत्प्रागभावानीत्यग्निसंयोगादिति भावः॰ ननु रूपादिस्थले स्वप्रागभावो हेतुर्न तु
सर्वत्र येन प्रागाद्यपि तत्ता तदः स्यादित्याह नचेति॰ तत्त्वं तत्रेति॰ तथा युक्तितौल्यात्सर्वत्र कार्येति हेतुत्वापि
ति भावः॰ एकमेवेति॰ एके देवत्यर्थः॰ कार्येति॰ ननु घटसम यानाद्वन्तसंबंधे रूपोत्पत्त्यभावप्राग
भावो हेतुत्वे तस्याप्यापाद्यत्वादिति भावः॰ ननु कारणाभावात्कार्याभाव इत्यत्र कारणस्याभावः तत्संसर्गा
भावो वा प्रागभावो वा॰ नचेद् प्रागभावस्य प्रागभावोऽत्यन्ताभावो वा किन्तु ध्वंसः इतिकर्थं हेतुताग्रहः इति
चेत्तत्र हेत्वभावोऽहितत्समवधानविरहः स च विविधाभावः तथा च दण्डसमवहितचक्राभाव इव प्रागभाव
सहितदण्डेतराभावः हेत्वपि तुल्य इत्याह॰ नचेति॰ यागादावपि व्यापारद्वारा तथात्वमिति भावः॰ तावतेति
एतदुपलक्षणं॰ असमवायिकारणाप्रतिबंधकाभावयोरपि तथात्वमवसेयं॰ ॥ ॥६॥ ॥ ननु समवाया
सिद्धिरित्यत उक्तं सिद्धा सिद्धिव्याघातादित्यत आह विप्रतिपत्तिश्चेति॰ अनियोग्यनुयोगिताव संबंधविधि ॥१०६॥

त॰

यत्तयासिद्धसाधनमेतच्चेद्विशेष्येति॰ नचप्रतियोगित्वादेरुत्तयनिरूप्यत्वं विशेषणप्रतियोगित्वस्य विशेष्या
नुयोगित्वस्य मानासंयोगादेरुक्तरूपनिरूप्यत्वमित्याहुः॰ वस्तुतो लाघवादेकस्यैव समवायस्य विषयत्वा
न्नासिद्धसाधनं॰ अन्यथासिद्धत्वेप्यगतेः नत्वविशेष्यपदानावात् स्वरूपसंबंधस्यात्तयनिरूप्यत्वेन तेनार्था
न्तरस्यैवमप्यवारणाद्धः॰ संबंधस्यात्तयनिरूप्यत्वनियमेन प्रतियोग्यनुयोगिनानासंबंधस्यापि तथात्वाद्धः॰
तस्मात्तादृश्यासिद्धयएतदुपादानमिति मंतव्यं॰ अत्यसत्त्वेकिंतद्धेति॰ अत्यसत्त्व एवापाद्यलकंतर्कमाह नहीति
यद्यपि स्वरूपयोः सत्त्ववैशिष्ट्यविषयतानुविशेषणत्वेनेत्यर्थोभिमतस्तथापि तथात्वे विषयतेति स्वात्म
पगमेनस्वेनैवरूपेणासमवायमात्रेत्वर्थे किंत्व्यधिकत्वाद्दूषयति॰ समवायमिति॰ अनुमानेनांकितेनचेति
स्वरूपसंबंधेनार्थान्तरशक्तिपातिरिक्तसंबंधविषयत्वमेवानादूषयति॰ अघटंदृति॰ संबंधेति॰ अतिरिक्त
संबंधेत्यर्थः॰ नचेति॰ विपक्षेबाधकत्वेकोहि तत्त्वतीतिमुपजीव्येति शंकार्थः तेननपौनरुक्त्यं॰ वस्तुतस्तु द्वि।३
उक्तव्याप्तिवारकतायासमवायविषयकप्रतीतित्वादितिलिंगस्यवानंक्ष्यानिषेधतिनचेति॰ एवं प्रतीतेरेव
तस्यसमवायविषयकप्रतीतिरेवेत्यर्थः॰ अत्रएववाह तस्याइति॰ उक्तयुक्त्यापरंपरातद्विषयत्वानंगीका

साध्यसिद्धौ हेतुसिद्धिः

107 रादन्यतरासिद्धेरित्यर्थः नन्वेतदनुमानादेव तद्विषयत्वासिद्धौ नासिद्धिरित्यत आह अन्यथेति तथा सति हे
तुसिद्धौ साध्यासिद्धौ इत्यन्योन्याश्रय इत्यर्थः अन्यपक्षे परस्परान्योन्याश्रयानवकाशात् अन्यथा क्वापि प्रत्यक्षमर्थं
साधकं न स्यात् अन्यत्र तु तद्विषयत्वासिद्धिरिति परस्य तथात्वासिद्धेः तं प्रति प्रमाणीकर्तुमक्षमत्वादित्यर्थः अ
न्यथेति अन्यतरासिद्धेः तद्विषयकतायाः प्रसाध्यांगिकारस्यास्यैवात्र मानत्वेनेत्यर्थः अन्योन्येति नस्याः
समवायविषयत्वसाधनसमवायप्रसिद्ध्यधीनं तत्साधनं च तस्यास्तद्विषयत्वे सिद्धे ततः समवायसिद्धौ सा
ध्यसिद्धिरित्यन्योन्याश्रय इत्यर्थः इति वदंतं संबंधाविषयेति अतिरिक्तविषयेत्यर्थः अतएवमांत्वमिति
भावः संबंधमात्रानंगीकर्तृमते नैयायिकस्य मितः संबंधमात्रमितिवत् स्वरूपमात्रमित्यर्थः घटस्य
नीलज्ञापकत्वेपि न तद्विषयत्वासिद्धेः यद्यपि न सिद्धसाधनं तथाप्यर्थांतरतापत्तिः नन्वतिरिक्तसंबंधा
विषयत्वे समूहालंबनाविशेषापत्तिरित्यत आह विशेषणेति संबंधाविषयत्वेप्यतिरिक्तसंबंधावि
षयत्वेपि न तमादायापि समूहालंबनसंभवात् तत्रैव विशेषणतयापि भानादित्यर्थः अतिरिक्तसंबं ॥१०७॥

धनिमित्तकत्वं साध्यं संबंधनिमित्तकत्वमात्रं वा आद्ये दोषमाह स्वेति अंत्ये त्वाह तथैवेति तथा चार्थांतरमित्य
र्थः अत एवेति यद्यपींद्रियसंबंधविशेषणताभाववदंशस्यैव तथापि तावतां विशेषणतासंबंधांतरगतेत्यस्य
पगमादतिरिक्तसंबंधाभावात्प्रत्यक्षमिति भावः अत एवातिरिक्तसंबंधमात्रं क्यानवस्थयापरिहरति नवेति
अत्र भावानामित्यादिनियमस्याप्रयोजकत्वात् घटज्ञानादिस्थले व्यभिचाराच्च नियमाभावे अभावविशेष
णतयैवोपपत्तेरनुमानेऽर्थांतरमित्याह समवायेति व्यभिचारस्थानमाह घटेति गुरुमतमाह पराविति
ननु समवाय एव तादृशविषयताख्य इत्यत आह समवायस्येति एतच्चोपलक्षणं समवायादिकं विनाभावस्यानुप
त्तेरित्यपि बोध्यं ननु नश्यतीति नचोपनीतं भानं तदुपनायकाभावात् ध्वंसविशेष्यकप्रतीतेश्चेति भावः न
नु तस्य अत्यक्षत्वेऽपि का गतिरित्यत आहान्यथेति यद्यपि रसनस्य जलग्राहकत्वात् ससमवायस्य तद्ग्रा
ह्यतया तत्रोत्पादेऽपि प्रतीतेर्न समवायविषयत्वेनान्यथासिद्धिस्तथापि तद्रूपनीतभानानभ्युपगमे न दृढबा
धः गुणक्रियेति नन्वेवमभावविशिष्टबुद्धेः पक्षीतत्त्वे लाघवेन न वापि समवायसिद्धिरसंगत इति वा

यं॰ तत्र बाधकस्य वक्ष्यमाणत्वात् विशिष्टबुद्धित्वं च न संबंधविषयकबुद्धित्वेन वा प्रकारकबुद्धित्वं तन्मयस्यापि संबंध
108 षयबुद्धित्वपर्यवसानेन साध्याविशेषात् किंतु विशेषणधीजन्यबुद्धित्वं अतद्व्यावृत्तिधीजनकबुद्धित्वं वा॰ न
व तज्जन्यत्वादिकमेव किमवच्छेदेन ग्राह्यमिति वाच्यं विशेषणत्वगोचरबुद्धित्वस्य तथात्वात् न चैवमुपजीव्यता
तस्यैव हेतुत्वमस्त्विति वाच्यं तद्व्याप्यजातिसंधानदशायां एतदवच्छेदेन गृहीतस्य तस्यापि हेतुत्वे विरोधाभावात्
न च तत्र विशेषणत्वगोचरत्वमसिद्धं प्रतियोगित्व लक्षणस्य तस्य समूहालंबनभेदाय तत्राविषयत्वात् उप
गमात् तृणादिवदवच्छेदकग्रहं विनापि तद्ग्रहसंभवाच्च वस्तुतो ऽतद्व्यावृत्तिधीजनकबुद्धित्वमेव हेतुः तत्रैव त
र्कसंभवेन व्याप्तिग्रहात् तथाहि अतद्व्यावृत्तिः संसर्गविशेषावच्छिन्नाविशेषणताव्यावृत्तिः सा च न तदा
विशिष्टज्ञानेन जन्यते यदि विशिष्टधीस्तासंसर्गविषया स्यात् यत्संसर्गविषया धीस्तत्संसर्गावच्छिन्नाविशे
षणताव्यावृत्तिबुद्धिं जनयतीत्येवानतिप्रसक्तस्य नियामकस्य स त्वादित्याहुः॥ अन्ये तु संबंधवि
षयकबुद्धित्वमेव तत्त्वं न च साध्याविशेषः स्वरूपसंबंधमादायापि तन्मते हेतोः स त्त्वाविनिगमाल्लाघवाच्च स ॥१०७॥

समवायसिद्धेर्न सिद्धसाधनमित्याहुः दंडीबुद्धिवदिति यद्यपि दंडेनेह विशेषणं किंतु मत्वर्थः संबंधः सदा
चसंसर्गे रूपस्तिताहृत्रोक्तार्थः पक्षसमानदृष्टांतः तथाप्येतच्छुद्धाभिलप्यमानदंडप्रकारिकाप्रत्यक्षप्रतीतिर्दृ
ष्टांतस्तस्याऽन्यथाऽप्रतिपादनासंभवेनोक्तवाक्येनैवप्रतिपादनात् लाघवेनेति ननु नियतकार्यवस्थैव प्रमा
णसहकारित्वे मत्वनुनतथा प्रत्येकबुद्धिमात्रपक्षत्वेपि समवायसिद्धेस्तत्र च लाघवानवतारादिति चेन्न अने
कस्य संबंधगौरवमेकस्य तथात्वे लाघवमिति तत्रापि तदवतारात् न चैवं स्वरूपसंबंधेनार्थांतरस्य निरासेपि
सिद्धसाधनस्य दुरपह्नवत्वं सिद्धेरुत्पादे लघुगुरुचिंतावकाशात् सिद्धसाधने च तद्धुत्पादस्यैव प्रयोजकत्वाद
त्यनेत्याह संबंधत्वेनेति अनुमानप्रयत्नेः एवं गुणादिस्वरूपाणां संबंधत्वेनाकल्पनात् अतः सिद्धसाधनत्व
मपीति तात्पर्यम् अत एवाभावादिस्थले स्वरूपसंबंधस्य क्लृप्तत्वात् विपरीतं लाघवमित्यपास्तं गुणगुण्यात्म
कस्वरूपस्यापि च वसंबंधत्वकल्पने तदवतारसंभवात् न च रूपरसाभावस्त्वादौ गुणापि तत्क्लृप्तमेवेति वाच्यं गु
णगुण्यात्मकस्वरूपेतत्राप्यकल्पनात् नहि प्रत्येकस्य स्वरूपसंबंधत्वं किंतु मिलितस्येति भावः ननु यथा मि

कल्पनातद्धर्मिव्याघातश्च लाघवाद्गुणादिस्वरूपाणां संबंधत्वमाच कल्पने लाघवं समवायकल्पने च तस्य संबंध
त्वमपि कल्प्यमित्यकल्पने गौरवं किंच प्रतीतिविषयनियमः सामग्र्यधीनो न लाघवादन्यथा विशेषणविशे
ष्यमात्रविषयत्वे लाघवात् सविषयतानुमानात् संबंधाविषयत्वमेव तच्च स्यादिति ध्वस्तिरसादाहापचेति· अ
थ पक्षहेतुदृष्टान्तबुद्धिपदलौकिकप्रत्यक्षपरं तेन तु मित्यादिकमादाय न बाधव्यभिचारादिकमिति बोध्यं·
सत्यत्वमिति· तथाचन्नमेन व्यभिचारप्रतिज्ञाबहु· लाघवादिति· अतएव क्षित्यादिवेककर्तृसिद्धिरिति न्यायः·
ननु धर्मिकल्पनातद्धर्मिव्याघातश्च लाघवाद्गुणादिस्वरूपाणां हेतुत्वमस्त्वित्यत आह अनुगतकार्यस्येति
गुणादिस्वरूपत्वमननुगतमिति भावः· न च श्राभावादिविशिष्टबुद्धिव्यावृत्तमनुगतं तत्कार्यतावच्छेदकमस्तीय
द्वाच्छिन्ने समवायोऽनुगतो हेतुसिद्धेत्तद्विशिष्टप्रत्यक्ष[illegible]त्वं भाति उक्तसंगात्· नापि समवायसंबंधविषयक
विशिष्टद्रव्यदत्वं तस्यानुमानेप्रवृत्तिपूर्वमसिद्धत्वेन तत्प्रतिसंधानाधीनतया अनुगतकारणत्वेन समवा
यसिद्धेरसंभवात्· नापि गुणादिविशिष्टप्रत्यक्षत्वमेव अननुगतत्वात्· न चाननुगतस्यापि जन्यतावच्छे ॥१०९॥

तीर

दकत्वाद्गुणादिविशिष्टप्रत्ययस्य चमेवतथास्कः तथासतिगुणत्वादिनानुगतेनतेषांकुत्रनामेवहेतुत्वसंभवेतदसि
द्धिप्रसंगात्. ॥अत्रवदंति॥ अस्तिहियुतसिद्धसंबंधिद्वयविषयाणांदंडयादिबुद्धीनामयुतसिद्धसंबंधिद्वयगो
चराणांश्चघटःगुणःक्रियाजातिरितिविशिष्टबुद्धीनामन्योन्यंसाजात्यं. अन्यविशिष्टबुद्धितोवैलक्षण्यंकिमप्यनुगतमसा
धिकंतच्चप्रकारांतरेणदुर्वचमपिस्फुटतरविवेकप्रकाराराहित्यसंबंधिद्वयगोचरविशिष्टबुद्धिस्वरूपतयासुव
चमेव. एवंचदंडयादिप्रत्ययस्यातिसंयोगस्यैवतदवच्छिन्नगुणादिविशिष्टप्रत्ययसलक्षणमनुगतकार्यं ज्ञानवि
षयतयानुगतकारणतयासमवायःसिध्यति. गुणादीनामननुगतत्वान्नतेरन्यथासिद्धिरिति. नचैवं. तद्धिवैल
क्षण्यंविषयकृतंजातिरूपंवा. नाद्यः समवायासिद्धिंविनातस्यैवकुत्राप्यसत्वात्. नाप्ययुतसिद्धसंबंधिद्वयरूपवि
षयकृतमेवतदुक्तं अयुतसिद्धत्वंहिननित्यसंबंधित्वं नित्यसंबंधस्यैवसमवायत्वेनाप्यनतस्तदसिद्धेः नापि
स्फुटतरविवेकप्रकाराराहित्यं घटसत्तावन्नलादेरपितथात्वेनव्याप्तियोरापत्तेः क्वचित्संयोगिनोरपितथा
२४ त्वाच्च. नांत्यः स्फटितत्वानुमितित्वादिनासंकरापत्तेः नैयत्यंचेद्व्याप्यमेवतदितिवाच्यं. तादृशजातौमानाभावात्

110 विनिगमकाभावाच्च· युतायुतसंबंधिविषयकसमूहालंबनवृत्तितया ऽव्याप्यवृत्तित्वापत्तेः· तत्रापि चाक्षुषत्वादिना
संकरापत्तेश्च· अस्तु वा तथा तथापि ताद्रशबुद्धित्वेन कार्यतावच्छेदकं अतिप्रसंगात्· इति ताद्रशविशिष्टप्रत्यक्ष
त्वं तथा वाच्यं न च न कार्यतावच्छेदकं ताद्रशप्रमितित्वादिव कार्यतावच्छेदकत्वे मानाभावात्· नापि वा ऽयुतसिद्धविशे
षत्वेन ताद्रशसंबंधित्वेनैव चानुगतीकृतानां गुणादीनामेव हेतुत्वमस्तु किं समवायेन· यदि चायुतसिद्धत्वं समवायव
हित्वं विना वक्तुमशक्यं तदा तवापि तुल्यं· किंच ताद्रशयापि कार्यं तस्य हेतुत्वं विषयत्वेन समवायेन वा· आद्ये गुणादि
स्वरूपाणामेव तथा कारणत्वमस्तु· अंत्येपि समवायत्वं नित्यसंबंधत्वं तथा च लाघवात् संबंधत्वे न व्यवहारोऽस्तु त
च्च स्वरूपसाधारणमिति तेनानुगतीकृतानां गुणादीनामेव हेतुत्वमस्तु· अवच्छेदकलाघवे व्यक्तिगौरवस्यादोष
त्वात्· न च ताद्रशसंबंधित्वमेव दुर्वचं तवापि तुल्यत्वात्· अत एव कव्यत्वाद्य· अन्यथानुगतव्यापकतावच्छेदका
नुपपत्तेः· न चातिप्रसंगः· अयुतसिद्धसंबंधिरूपविशेषसामग्रीविरहादेव कार्याभावोपपत्तेः· वस्तुतस्तु ला
घवात् सत्यलौकिकविशिष्टप्रत्यक्षत्वमेव कार्यतावच्छेदकं विशेषणसंबंधित्वं· संबंधत्वमेव वा हेतुतावच्छेदकं॥ ॥११०॥

तत्कार्यकारणभावादेव यत्र नाप्रयोजकत्वमित्यनुपदमेव स्फुटं ॥ येन यत्सामान्येन यत्सामान्यमिति न्यायात् विशेषयो
रपि तथात्वं नहि तद्विशिष्टज्ञत्वस्य तद्विशेषणसंबंधत्वेन हेतुतास्फ न तु तेन तेन रूपेणानंतकार्यसामग्रीकल्पना
पत्तेः कार्यस्यान्यथोपपत्तेश्च ॥ एतेन संयोगसंबंधविषयकज्ञानमात्रविषयकलौकिकविशिष्टज्ञत्वस्य मनुगतका
रणनियम्यमिति निरस्तसिद्धिरित्यपास्तं ॥ अन्ये तु गुणादिविशिष्टबुद्धौ विशेषणविशेष्यसंबंधविषयास्त्वाधे
यसाध्यं विशिष्टबुद्धित्वादित्याद्यवच्छेदकं नव स्वरूपसंबंधेनार्थांतरं ॥ इदानीं स्वरूपसंबंधस्याक्लृप्तत्वात् ॥ अना
वच्छिन्नादिसाधारणसमवायसिद्धौ हि क्रमेणबाधात् ॥ न द्वेषसमवायबाधोत्तरं तत्कल्पनात् ॥ नचैवं तत्र व्यभि
चारादेव नानुमितिरस्तिवव्यभिचारस्यासत्वात् ॥ न ह्यस्ति संधानस्यप्यानतः समवायसंदेहपक्षे वदसंतवादि
तिसमवायसाधनं निःप्रत्यूहमेवेति वदंति ॥ तदपि चिंत्यं ॥ अक्लृप्ततया सिद्धसाधनतानवकाशेऽप्यर्थांतरस्य दुरप
ह्नवत्वात् ॥ समवायसंबंधत्वमप्यक्लृप्तमेवात्र कल्पनीयं ॥ एवं च पूर्वोक्तबाधवेन गुणादिस्वरूपाणामेव संबंधत्व
मोत्र कल्पनात् ॥ अन्यथाऽन्याबादिस्थलेस्वरूपसंबंधस्य क्लृप्ततेऽप्यर्थांतरानवकाशाद्गुणादिस्वरूपाणां च तत्त्वस्या

कृमत्वात्‌ एवंचोक्तन्यायेनाभावादिस्थलेसंयोगमात्रबाधेऽगत्यापिस्वरूपसंबंधकल्पनसंभवात्‌ समवायसंबंधान्त
रमेवतत्कल्पनमित्यप्ययुक्तं अतएवापरितोषात्पथानार्थांतरत्वेकां नाहन्नाममतांतरमवता रयति नव्या
स्त्विति यद्यप्यक्तलाघवावतारेदृष्टा विशेषणोपादानप्रयासस्वदनवतारे तत्प्रयोजकत्वं तथापि निरुपाधिक
त्वमेवविपक्षेबाधकं इत्ययमस्फुटं अपितुसमवायिकारणमात्रस्यकार्यनाशेहेतुत्वेतत्रपदिस्वरूपसंबंधेनान्य नाश४
थासिद्धिस्तदा आश्रयनाशाद्विशेषात्‌ ध्वंसोपिनश्येत्‌ समवायिकारणादिनाशव्यवस्थाचैवंनस्यात्‌ अत
एवपदिसंबंधित्वेन तद्विशेषणात्‌ समवायसिद्धिः तदुत्तरं तेनैवहेतुनातद्भिन्नत्वविशेषणात्‌ अन्यान्यसंबंध
सिद्ध्यापत्तिरितिपरास्तं तच्चविपक्षबाधकाभावादितिदिक्‌ ॥ निर्विषयेति ननुभूतलेघटाभावइत्यभावावि
शेष्यकेघटेज्ञानमित्यादौज्ञानविशेष्यकेचज्ञानेव्यभिचारः नचनिर्विषयभावमात्रविषयकाविशिष्टबुद्धित्वा
दित्यर्थोविवक्षितइतिवाच्यं इदानीमाकाशेविषाणायांशह्वेइत्यादौव्यभिचारादितिचेत्‌ न तन्मात्रविषयकलौ
किकविशिष्टप्रत्यक्षत्वस्यविवक्षितत्वात्‌ पक्षसंकोचाद्वानभावांशासिद्धिः नचैवंनिर्विषयेतिव्यर्थं विद्यमानप्रतीति ॥२११॥

भादायाभानात् इति ज्ञानेन यत्र दोषान्न समवायो भासते किंतु विषयविषयिभाव एव तत्र तत्र व्यभिचारवारणाय तथा
दित्याद्युक्तं॥ नन्वेवमपि समवायविशिष्टबुद्धावेव व्यभिचार इति वाच्यं॥ समवायासिद्धिदशायां तत्सत्ति संबंधनात्ता वाहन
व्यभिचारिलिंगजन्यत्वेनानुमितेर्भ्रांतित्वापत्तेः विषयाबाधेन यथार्थत्वात्॥ यत्र तत्र समवायत्वमादाय लौकिकवि
समवायत्वस्याभावघटितत्वाद्धेतोरेव तत्रागमनान्न व्यभिचारः॥ नचैवमसिद्धिः नच विशिष्टविषयास्वरूपेणैव तद्ध
ज्ञानात्॥ अत एव संबंधासिद्धः स्यात् कश्चिदपि यो विशेषणसंबंधो तत्र भवति तादृशविषयत्वं साध्यं तच्च समवायविशिष्टबुद्धाव
प्यवगुणादिस्थले संबंधासिद्धस्येव समवायस्य विशेषणसंबंधरूपत्वादृशात्त समाधानमनादेयं बोध्यं॥ इतरानिरू
पणेति॥ इतरानिरूपणानिरूप्यमात्र विशेष्य विशेषणाभिषयकलौकिकप्रत्यक्षत्वादित्यर्थः॥ समवायस्येतरनिरूपणनिरू
प्यत्वान्न तद्विशिष्टबुद्धौ व्यभिचारः॥ नचापत्सौनूनबुद्धौ समवायविषयत्वेपि हेत्वसिद्धिरिति भावः॥ ननु संयोगादौ संबंध
त्वस्यैकस्याभावात्पुरस्कारेण कथं व्याप्तिरित्यत आह संबंध[illegible] इति॥ नच संबंधपर्यायत्वाद्विशिष्टपदस्यासाफल्य इति
वाच्यं॥ व्याप्तिनिर्धारणा ज्ञानासाधारणविषयत्वसंबंधत्वमित्यस्याविवक्षितत्वादिति वदंति॥ तन्न्यूयं॥ उभयत्वादिसंबंधेऽव्या
प्तेः॥ न हि तादृशविषयताव्यतिरेकाद्धेतुः॥ अन्ये तु अविशिष्टपदं अविशिष्टपरं आविशिष्टपदस्य वै संबंधपरस्य यथा[illegible]तेन्यान्या

अथ प्रासादविशिष्टधियस्तद्विशेषणतागोचरबुद्धित्वेन सुनिर्वचनत्वादाह॰ तथा हि तत्त्वं च तदजनकत्वानियामकत्वं तु तज्ज्ञान
कत्वं तथा च विशिष्टबुद्ध्यजनकत्वे सति विशिष्टबुद्धिजनकत्वं संबंधत्वमित्याहुः॰ तदपि चिंत्यं॰ अतीन्द्रियसंयोगे स्वरूपसं
बंधेऽव्याप्तेः॰ तद्विषयकबुद्धेरनुमित्यात्मकतया विशेषणाजन्यत्वात्॰ कालादेरपि स्वरूपसंबंधतया तत्राऽव्याप्तेः॰ तस्य का
र्यमात्रजनकतया विशिष्टबुद्धेरपि जनकत्वात्॰ तस्माद्विशेषणाधीजन्यज्ञानासाधारणविषयत्वं तत्त्वमिति ध्येयं॰ उक्तलाघ
वसहकारेण वैशेषिकानुमानमपि सम्यगेवेति तदुपन्यस्यति॰ यद्वेति॰ उक्तरीत्या न तत्रापि स्वरूपसंबंधेनार्थांतरमिति चिंत्यं
संबंधिद्वयेति॰ एकेंद्रियप्रत्यक्षसंबंधिद्वयकत्वादित्यर्थः॰ तेन चैव व्यधिकरण्येन न वाय्वात्मसंयोगे व्यभिचारः॰ यद्यपि सु
खादिगुणत्वादेस्तद्वाचकशब्दस्य च श्रोत्रग्राह्यत्वेऽपि तद्वाच्यवाचकसंबंधस्याप्रत्यक्षत्वाद्व्यभिचारस्तथापि तदतिरिक्ते यो
नियमो बोद्धव्यः॰ न चैकस्यैव समवायस्य क्वचिद्योग्यत्वं क्वचिदयोग्यत्वं व्याहतमिति वाच्यं॰ अवच्छेदकभेदेनाविरोधादित्येके॰
सन्निकर्षयोग्यत्वेऽपि तदिंद्रियजन्यसंबंधिद्वयप्रत्यक्षरूपसहकारिविरहात् क्वचिदप्रत्यक्षत्वमित्यन्ये॰ प्रतिबंधादिति अत्यंत
निषेधे न न चेति॰ अत्यक्षेपीतिपरशब्दोक्तं तन्मते भावस्यानुपलब्धिगम्यत्वादाह॰ घटाभावाभावस्येति॰ अभावात्मन इ घटाभावाभा
वस्य वैशिष्ट्येन संबंधेन तत्र स्वीकारः॰ सोऽपि घटाभावाभावोऽपि तत्र तेन च संबंधेन तथा स्वीकार्यः॰ वैशिष्ट्यस्यैकत्वाभ्युपगमादित्यर्थः॰
यद्यपि घटाभाववतीत्यर्थ एकत्वात्तस्य त्वेनैव घटाभावस्यांगीकारयितुं शक्यते तथाप्यधिकमपि निर्वक्तव्यं दोषः॰ नन्वस ॥११२॥

मवायः परमतेनांगीक्रियत इत्यस्वरसादाह नैवेत्याद्य चेति॰ ननु समवायस्यैकत्वाद्धतवायोरूपसमवायसत्वेपि न रूपाधि
करणत्वं किंतु रूपात्यंताभावाधिकरणत्वमेवाधिकरणस्वभावाद्धतयामप्यापिपटाते न वेत्याद्य सत्वेपि न पटात्यंताभावाधिकर
णत्वं किंतु पटाभावात्यंताभावाधिकरणत्वमेवाधिकरणस्वभावादिति चेत्राहियोरूपप्रतीतिर्महाकदापि तत्र पटात्यंताभावप्रतीति
र्नस्यादाह अन्यथास्वभावरूपापत्तेः न च कालस्वरूपावच्छेदभेदेन घटश्यामरूपेकरूपाधिकरणस्वभावभेदे तत्स्यादिति वाच्यं॰
श्यामदशायामपि घटस्य रक्तरूपाधिकरणस्वरूपत्वास्वरूपगमात्‌ तर्हि तदापि तत्र प्रतीतिः स्यादिति चेन्न उपनीतज्ञानस्य इत्या
दलौकिकप्रत्यक्षविषयस्यापि हेतुत्वेन तदा तद्भागादेव तदभावोपपत्तेः न चैवं त्वयापि घटकुंभं यत्र पटोपनयाभ्युपगते तत्र वर्त
मानस्य पटाभावस्य पटसत्वकालेपि सत्वेन तत्प्रतीतिर्दुर्वारित्याह नहि तदा साम्य ज्ञानतः अनुभवविरोधादाह नापि नष्टो नित्यता
त् तस्मात्तदानीं संबंधाभावान्न प्रतीयत इत्यर्थं तर्कः अनन्यगतिकत्वादाह न च तन्मते न संबंधाति गेत्याद्य स्यैकत्वाह ममतु
तयास्तदानीं विशिष्टप्रत्ययजननयोग्यताभावान्न स्वरूपसंबंधत्वमिति संबंधाभावादेव न प्रतीयत इति॰ ननु सर्वदा न
ष्ट एव पटापसरणानंतरं अन्य एवास्यन्नागच्छतेन तथा चास्यादिनिनाशकाल एव तत्र पटाभाव इति नोक्तदोष इति चेन्न समा
नविशेषसंज्ञाग्नि पत्तदत्यंताभावादेव तत्प्रतीत्युपपत्तेः तुरीयताद्वरा संसर्गान्तरकल्पने मानाभावादाह किं च तन्नाशाः प
ट एव घटजन्योन्याभावान्नाघः पटश्च तदभावसत्वकालेपि स्थितत्वाह नाश्यसमानकालीनस्य नाशात्वायोगादाह नोत्यंः ए

113 वंसति गुणगतिविरोधिगुणांतरस्यैकपटस्य तद्विरोधित्वमात्रं पर्यवसन्नं न तु तद्विरहरूपत्वमिति तद्विरहरूपतया पटः पट
विरहरूपतया च सन प्रतीयते· तस्मात्क्वचित्तद्दर्शनादभावमेकदेशिमतेनोत्तमं तव्यामिति वदंति· तच्चेदं चिंत्यं यथा त्वन्मते स्व
रूपयोर्विशिष्टप्रत्ययजननयोग्यत्वात्तावदन्यायां न संबंधत्वं किंतु कदाचिदेव तथात्वं तथा वैशिष्ट्यप्रत्यक्षं तथा च पटसत्वका
ले वैशिष्ट्यसत्वेपि न संबंधत्वं तस्यातिसंबंधात्तावादेव न पटाभावधीः अतिरिक्तसंबंधेनैवं दृष्टमिति चेत्तत्किं वैशिष्ट्यमन्यत्र
दृष्टं अत्रानवच्छिन्नविशिष्टप्रत्ययस्यान्यथानुपपत्त्या अन्यत्रादृष्टमप्येव कल्प्यत इति तर्हि कादाचित्कतद्विशिष्टप्रत्ययस्यान्यथानुपपत्त्या
तस्य संबंधत्वमपि कादाचित्कमप्येव कल्प्यं· ननु क्लृप्तत्वात्स्वरूपयोरेव तथा संबंधत्वं कल्प्यते न तु क्लृप्तस्य वैशिष्ट्यस्येति चे
त्तर्हि पर्यंतिरादेव न वैशिष्ट्यासिद्धिरित्यवोच्यतां किं मतिप्रसंगापादनेन एवमास्त्विति चेत्तर्हि तत एव समवायोपि न स्या
त् लाघवादिति च तुल्यं· तस्माद्यथा एकस्य संबंधत्वकल्पने लाघवं तथा क्वाचित्कसंबंधत्वकल्पनेपीति न स्वरूपयोः कथा
कल्प्यते किंतु वैशिष्ट्यस्यैव· तथा च यादृशं किंकल्पनागौरवं दोषस्तादृशं समवायसिद्धिरपि· अन्यथा तु वैशिष्ट्यासिद्धिर
पीति दुर्वारा प्रतिबंदी· तस्माद्यदि विपक्षबाधकांतरावष्टंभेन न्यायमतेन समवायसाधनं न्याय्यते तदेव परं तदुद्धारो ना
न्यथेति· ननु वैशिष्ट्याभ्युपगमेप्यननुगतत्वानिवारणाल्लाघवमितिसिवस्य वैशिष्ट्यमिति· तन्न· समवायेपि तुल्यत्वात्· फलमुखत्वा
दप्येतत्कल्पनागौरवं यादृशं तत्र दोषस्तादृशं तत्रापि तुल्यं· अन्यत्तु यत एव नाभावसमवायस्यानभ्युपगमस्तत एव न वैशिष्ट्य ॥११३॥

स्यापीति अन्यथा ध्वंसनाशे घटोन्मज्जनप्रसंगः ननु समवायिनो नाशस्य समवेतनाशहेतुत्वात् तत्र समवायनाशस्य
पगमेत त्परिच्छेदविषयी न कुर्वे विशिष्टात्मकपगम इति वाच्यं लाघवेन नित्यसंबंधिकारणनाशत्वेनैव तद्धेतुत्वकल्पना
त्तन्न तु तद्विशेषसमवायिनाशत्वेन किंच समवायत्वं न जातिरिति वैशिष्ट्यान्यनित्यसंबंधत्वेन तन्निवेश्यैव तथा च
सुतरां तथा कारणत्वगौरवमिति नात्ताविवैशिष्ट्यसिद्धिरिति वदंति तच्चिंत्यं प्रामाणिकत्वेन फलमुखगौरवस्या
दोषत्वात् अन्यथा ध्वंसे कारणमपि न सिध्येत् लाघवेन कारणनाशस्यैव कार्यनाशकत्वाद्ध्वंसनाशे घटोन्मज्ज
नापत्तेरिति सुवचत्वात् एवमन्यत्रापि निमित्तकारणनाशस्यैव तन्नाशे तन्नाशापत्तेः यदि च निमित्तकारणनाशः का
र्यस्य ध्वंसघटादेरनाशान्निर्णयात् कारणसमवायित्वविशेषणं प्रामाणिकं तदा नित्यसंबंधिकारणनाशे घटोन्मज्ज
नापत्त्या ध्वंसनाशानिर्णयात् वैशिष्ट्यान्यत्वविशेषणमपि प्रामाणिकमिति तुल्यं नवेदेवं यदि वैशिष्ट्यं प्रामाणिकं
नवेदिति चेन्न इति तत्र प्रमाणाभावात् ध्वंसे योग्यतां किमनया कुसृष्ट्या अन्यसंबंधविशिष्टबुद्धित्वस्यैव मानत्वात्त
द्गौरवस्य तदानीमनुपस्थितत्वात् तद्रूपाविषयित्वात् किंच द्रव्यत्वावच्छिन्नगुणत्वावच्छिन्नो नयमिरूपितसंबंधत्वं गङ्
गौरिति बुद्धिविषयसंबंधत्वमित्यादिरीत्या इदं समवायत्वानिर्वचने समवायिनाशस्य नत्वतद्धेतुत्वं तदा कथमुक्तदो
१ली षायकाशः न च गौरवं नित्यध्वंसादतिप्रसंगे ध्वंसत्वं जन्याभाववृत्तिनानानिर्वचनेपि तुल्यत्वात् एवमत्यंताभा

११५

वादौ तद्यथा दिकालावाच्यं॰ अत एव समवायबाधकमप्येतन्नो निरस्यते॰ रूपसंबंधरूपत्वमित्यत्र विशेषणतापक्षे दो
षमाह॰ रूपेति॰ उपलक्षणत्वेपि स एवातिप्रसंग इत्याह अन्यथेतीत्यमकुः॰ कश्चित्तु तस्य रूपमात्रसंबंधे [illegible] त्वं रू२
रूपत्व वा रूपारूपसंबंधत्वं वा॰ आद्ये रूपेति॰ अंत्ये अन्यथेति॰ तथा च यातिप्रसंग एवेति भाव इत्याहुः॰ अतीतेति तथा च लिं ती३
गत्वमादेव तच्च ज्ञानमनुमानमिति भावः॰ गौरत्वादिति॰ विशेषणसंबंधो हि स्वरूपसन्नेव विशिष्टधीहेतुरित्य
न्यच्च तथादृष्टानादिति भावः॰ यद्यपि तत्र तत्कालीनंवित्यत्र न दमुचरं तथापि तस्याः त्रभत्वे अतीतादौ ज्ञानत्वाज्ञा
यः स्यात्तथा च व्यवहारविरोधः॰ बाधानंतरं न ज्ञात इति व्यवहारापत्तिश्चाल एवं स्वरूपसंबंधवि [illegible] शेषेन तस्याः य६
प्रमात्वे प्रवोपदर्शयति अतीता [illegible] क्षावेति॰ दंडकुरुषयोरिवेति भेदमुपचर्य द्वंद्वसमासः॰ वस्तुतः पदार्थतावच्छेदक
तेसादित्यपे वक्ष्यामः॰ तादात्म्यधियं प्रमाणमुक्त्वा नीलत्वघटत्वयोः सामानाधिकरण्यधियं प्रमाणमाह अथ
वेति॰ आत्मयमुक्त्वाह भ्रमपि सामानाधिकरण्यमानमाह एवमिति॰ नन्वेवं गतस्तु उपचारे कोत्य वक्त आह मुख्य इति॰ स्या
तामिति॰ न चेष्टापत्तिः प्रत्यभिज्ञानादिति भावः॰ अथेति॰ तथा च अग्रिमनिवृत्तिवेदादर्थस्य सह प्रयोग इति भावः॰
नन्वेवं शुक्लत्वादिगुणार्थमेव समवायः सिद्ध इत्यत आह शुक्लत्वादीति॰ योग्येति॰ एतच्चोपलक्षणं तथा सति॥१२४॥

घटेरूपमित्यादिप्रत्ययापत्त्यादित्यपि बोध्यं॥ उक्तमिति॥ घटस्य शुक्लरूपं शुक्लः पट इति द्वयमित्यर्थः॥ तथा
मया चानित्यो घटः एकेनैवोक्तयस्यानुकृत्याह॥ यद्वा एतदस्वरसादाहाथवेति॥ ननु प्रत्यक्षपरिभ्रान्तिनोपन्यासायोग्या
ईश्वरत्यतोऽर्थापत्तेः प्रमाणान्तरत्वमित्यत आह॥ नचेदमसाधारणमतियोऽसौ ज्ञापकमन्यथानुपपत्त्यादिकमपि ज्ञा
पकेनैवानित्यतां साधयेदविशेषादित्यनुमानेनाहान्योन्याभाववत्वमिति॥ अव्याप्येति॥ स्वकालावच्छिन्न
स्वात्यन्ताभावसमानाधिकरणवृत्तीत्यर्थः॥ तेन नाकाशस्यैकमादाय सिद्धसाधनं॥ नित्याभावेति॥ नित्याभाव
वृत्त्यभावविशेषणकोपाधित्वादित्यर्थः॥ वनवृत्तित्वविवक्षणात्॥ अन्यथा यद्भावकृतेत्यव्याप्यनित्याभाव
त्वादेरमव्याप्यत्वेनाभावत्वसाधाव्याप्यत्वाभावात्पक्षे सिद्धिदृष्टांतेत्य साधनवैकल्यं वस्यादिति भावः॥
नित्यत्वं च ध्वंसप्रतियोगित्वे सति प्रागभावाप्रतियोगित्वमिति ध्वंसत्वेन व्यभिचारश्च नित्येतिबोधेति॥ नित्या
ताववृत्तीति विवक्षितार्थः॥ तदभावादिति॥ घटत्वमनित्याव्याप्यं वेदस्य तवद्वृत्तेर्न तदवृत्तिरितिभावः॥ किंत्वन
एवेति॥ स न तत्त्वविरोधीत्यवच्छेदकत्वं विनासमानाधिकरणस्यादित्यर्थः॥ तस्मादिति॥ तथा चानुमाने

115

बाधितमितिभावः अथोक्तिविधायकपदोपादानं चाप्रयोगनिरस्तमितिभावः अत्रेदोपसारोहितिः यद्यप्येव
मपि तस्य वाचकत्वान्नावाच्यत्वापत्तिरयुक्ता तथापि विधायकपदं प्रतिपादकमात्रपरतां वतैवमक्तत्वासिद्धेरि
ति भावः अस्तु वा समवायस्तथापि सं न प्रत्यासत्तिरित्याह नान्वेति नन्वेतदेव कथमित्यत आह तादृशेना
पीति विशेषणतासत्वादिति विशेषणताप्रत्यासत्तिसत्वादित्यर्थः शब्दादीनामिति यद्यपि समवाया
देः प्रथमोपस्थितत्वादपि विशेषणतायाः सूक्ष्मत्वाल्लाघवप्रतिसंधाने सैव चरमोपस्थितापि तत्र विषयः
स्यात्तत्प्रतिसंधाने सा विषयीभूतापि प्रत्यासत्तिस्तथापि विशेषणतायाः प्रतिस्वरूपं नानात्वेन समवायादिवि
शेषणतायाः प्रत्यासत्तित्वकल्पनेप्यतादृशविशेषणतायास्तत्राकल्पनात् अक्लृप्तत्वाद्विशेषाच्च प्रथमोपस्थि
तः समवायादिरेव विषयस्तत्र वदेति अत्रेदं चिंत्यं नतु विशेषणतात्वेनाभावादौ प्रत्यासत्तित्वकल्पने गौ
रवाद्विशेषणतात्वेनैव तत्कल्प्यते तादृशविशेषणतायामपि सामान्यलक्षणागत्या तत्कल्प्यतां अन्यथासमग्रद
संयोगस्य रूपत्वकल्पनादेवधाविशदेपि सहत्वहेतुरित्यपि प्रागुक्तमयुक्तं स्यात् तत्रापि संयोगत्वेनेति ॥११५॥

दात् यदि चेन्द्रियसंबद्धत्वे नैव तथात्वकल्पनात् तत्र तयास्तदातुल्यं प्रकृतेपि न तुल्यत्वेदेवयदि विशेषणतात्वमनुग
२११ तस्यादिति चेन्न विशेषणत्वं हि स्वरूपसंबंधत्वं तच्च संबंधांतरमंतरेण विशिष्टप्रत्ययजननयोग्यत्वमनुगतमेव
अन्यथा तस्यानेकत्वेषोढापरिगणनमयुक्तं स्यात् तदिदमयुक्तं आस्तां न तु प्रत्यासत्तिः किं तु विशेषणतेव कुत
यात् इति चेत् तस्मात्समवायाभ्युपगमे गुणादीनां यदि विशेषणतेव नाभ्युपगम्यते तदा समवायादेः प्रत्यासत्तिसंयु
क्तं च तथा अतिरिक्तसंबंधाभावएव तदभ्युपगमात् न चैवं वायुः रूपवानिति धीप्रसंगः स्यात् तत्र यत्संबंधसत्वे
तत्र तज्ज्ञानस्य तथात्वात् तथा च विशेषणतावच्छिन्नसमवायस्य संबंधत्वमिति वाच्यं तदभावानवच्छिन्नसम
वायस्य तत्संबंधरूपतया योग्यपौरूपसंबंधाभावादन्यथा समवायएव न स्यात् संबंधानुमितेरावश्यकविशेष
णतैव सिद्धसाधनात् न च तत्र वानीयः साक्षात्कारः सोतिरिक्तसंबंधजन्य इत्यादिनियमात् समवायांतरमेवा
गत कल्पनमिति निरुक्तदोष इति वाच्यं समवायस्यापि तत्कल्पनसंबंधे तदुक्तनियमस्याप्रयोजकत्वाच्च
एवं च चाक्षुषवेत्यप्ययुक्तमिति ॥ इति समवायवादः ॥ ॥ नन्वेवं वायौ रूपाद्यभावाः स्वप्रत्यक्षचाक्षुषं रूपादि
नारूपाद्यभावधीः स्यादत आह भवतीति । अपीत्यति रूपाभावो वायुवृत्तिर्योग्यप्रतियोगिकत्वे सति वायुवृत्तित्वे

नानुपलभ्यमानप्रतियोगिकत्वात् इत्यनुमानं दुष्टं अन्यथा अनुमानेन वायोरूपाभावस्तिबुद्धेरसिद्धेरि
त्याहुः तदभावे प्रत्यासत्त्यंतराभावे लाघवादिति नवानुपलब्धौ तद्योग्यताविशेषणमप्रयोजकत्वं
त्या३ इति तुमिति वाच्यं तत्र तदा घटो परमाणुत्वाघटाभावग्रहप्रसंगेन तादृशयोग्यानुपलब्धेरावश्यकत्वात् स्वग्राहेत्यादि
नाववदति प्रसंगस्यावारणात् वस्तुतो वाघयादौ लिंगाप्रतिसंधाने पि रूपाघटाभावग्रहात् नचैवं अन्यथा
घटाभावस्यापि प्रत्यक्षत्वेकः समाश्वास इति यत्तदीति अधिकरणप्रतियोगिसत्त्वविरोध्यनुपलब्धिसह
कृतेनेंद्रियसन्निकर्षेणाभावो गृह्यत इत्यर्थः अत एवाधिकारस्थघटानुपलंभेपि न तदभावग्रहस्तत्र घट
सत्त्वस्य तत्सहचरत्वेन तद्विरोधात् नचैवमभावत्वमनुपपत्तिः तत्रापि प्रतियोगिसत्त्वस्य तत्सहचरत्वा
दिति वाच्यं इंद्रियसंबद्धविशेषणतासहकारिण्यांतकानुपलब्धेः प्रमाजनिकायाएवनिवेशनात् अभावत्व
मस्य यज्ञत्वमवृत्तत्वमसामग्र्या वा पपत्तेः यद्वा प्रतियोगिसत्त्वविरोधित्वमनुपलंभस्य तर्कप्रसंजितप्रति
योगिकत्वं तेन यत्रैव प्रतियोगिसत्त्वे तदुपलंभापादनं तत्र वस्तुतो वा तदभावो गृह्यते अत एव प्रतियोगिसत्त्वं
यत्र तर्कितमिति विवक्षितमिति वक्ष्यति एतच्चाभावत्वमस्त्वपालिनो कदाचिद्घटानुप्रतियोगिसमानाधि॥११६॥

करणान्योन्याभावः कथं प्रत्यक्षः तत्राधिकरणे प्रतियोग्यनुपलब्धेरभावात् । न च संसर्गाभावमात्रप्रत्यक्षमात्रे हेतुर्नि
रुक्तिरत्रेति वाच्यं । अत एवेत्याद्यग्रिमग्रन्थविरोधात् । न च तत्र तादात्म्येन या प्रतियोग्यनुपलब्धिग्राहिका सा च स्थ
लेति वाच्यं । संसर्गितया प्रतियोगिसत्त्वविरोधिनी संसर्गितया प्रतियोग्यनुपलब्धिः संसर्गाभावहेतुः तदात्मतया
×तथापि तस्याः प्रतियोगिसत्त्वाविरोधित्वाभावादिति चेन्न । तादात्म्येन प्रतियोगित्वस्य तद्विरोधित्वात् । एवं च × प्रतियोगित्व स
१८ जिसत्त्वविरोधिनी तादात्म्यतया प्रतियोग्यनुपलब्धिरन्योन्याभावग्रहहेतुः । न चैवमननुगमः संसर्गाभावप्रत्यक्षे
अन्योन्याभावप्रत्यक्षे च तयोः प्रत्येकमेव हेतुत्वात् । यत्राधिकरणे प्रतियोग्युपलम्भो वा अभावमात्रप्रत्यक्षे का त्र ६
रणं तत्र द्वयं चोक्तं प्रत्यक्षद्वये विशेष सामग्री सामान्ये सामान्यसामग्री निवेशे विशेषस्य
तु४ हेतोश्चेत्यादिति चेन्न । तथा सति सामान्यसामग्रीविरहादेव तत्रान्योन्याभावप्रत्यक्षानुपपत्तेः । ननु तादृ
शप्रतियोग्युपलम्भाभावः प्रत्यक्षरूपप्रतियोग्युपलम्भाभाव एव वाच्यो न तदुपलम्भसामान्याभावः । तथा सति
दोषश्चाह प्रत्यक्षेणापादितत्वेन घटघमाया ऽनुमानेन च प्रत्यक्षसंसर्गश्चेत्तादात्म्ये योग्यत्वमानश्चेत्संसर्गा
भाव. श्चेन्नदोषात्मभावश्च प्रत्यक्षेणानुपलभ्येन । एवं सति अपि तत्रान्ये दोषान्याभावः कथं प्रत्यक्षः स्यादाह क्वापि

117 पिन्नाभावात्तथाप्रत्यक्षस्योपपत्तेस्तस्याप्रसिद्ध्यापत्तेस्तदभावासिद्धेर्वा॥ न च सान्नमसामग्रीजन्यायांतूपपत्तेस्तसामान्यात्ता
वो हेतुः स चात्र संतत्वत्येवेति वाच्यं॰ गुंजापुंजेवह्निवन्नमादुष्णस्पर्शाप्रतिपत्तिमतो सत्यां विदुपपत्तेस्तसामान्याभावोपि तद् वा॰॥२
बाधभावरूपोष्णस्पर्शाभावग्रहेत्यादाह॰ न च प्रतियोग्यधिकरणसंसर्गप्रत्यक्षविषयत्वाभाव एव हेतुः स च संसर्गः
क्वचित्तादात्म्यं क्वचिदन्य एवेति वाच्यं॰ एवं च वायौ रूपाभावः प्रत्यक्षो न स्यात् अधिकरणसंसर्गप्रत्यक्षस्याप्रसिद्धेः
न चाधिकरणप्रतियोगिसंसर्गप्रत्यक्षविषयत्वाभावः तथा च सति पिन्नायतादात्म्याभाव एव न प्रत्यक्षः स्यात्
प्रतियोगिसंसर्गप्रत्यक्षस्याप्रसिद्धेः अप्रत्यक्षे अधिकरणप्रतियोगिसंसर्गविषयत्वाभावस्य हेतुत्वमिति
तन्न॰ मंडूकवसाक्तनेत्रस्य वंशोरगप्रत्यक्षेपि वंशाभावप्रत्यक्षोदयात्॰ न चाभावग्राहकत्वातिमतेंद्रिय
जन्यप्रत्यक्षे तद्विषयत्वाभावस्तत्रेति वाच्यं॰ ताहन्नारोपेसत्येवाभावप्रत्यक्षोदयात्॰ आरोप्यनिषिध्यतरत्व
स्फुपगमात्॰ न च यथार्थत्वमपि प्रत्यक्षविशेषणं॰ घटवति घटाभावभ्रमे तस्यापि विषयाबाधेन यथार्थत्वा
त्॰ ताहन्नप्रतियोगित्वमपि तदभावप्रत्यक्षानुदयाद्धेतिचेत्॰ न॰ तदिंद्रियजन्याहार्यप्रत्यक्षे प्रतियोग्य
धिकरणसंसर्गविषयत्वाभावस्यापि हेतुत्वात्॰ तदारोपस्य चाहार्यत्वात्॰ न च व्यधिकरणप्रत्यक्षमादाय॥११७॥

दोषः न सुरभीयत्वस्यापि प्रत्यक्षविशेषणत्वात् यद्यति हिंद्रियेत्यत्र न सप्रदंशवाक्यैकपदनिवृत्तज्ञातीयपरत्वेनोक्तदोषः
न च । अन्यकालीनतादृशप्रत्यक्षमादाय दोषतादवस्थ्यमिति तत्कालीनत्वमपि विशेषणं तथा चासिद्धिरिति वाच्यं । तदा
नीं तदभावस्यैवासत्त्वेन दोषस्यैवाभावात् एतत्कालीनतत्संसर्गाभावस्यैव वाहनुच्यात् न चैवं प्रतियोग्यप्रसि विषयतया
द्धिः प्रतियोग्यारोपस्य एतदप्रसिद्धेः एतेनाभावग्राहकः प्रतियोग्यनुपलंभः संशयविपर्ययसाधारण अयोग्यस स ४
५धि पतदनुपलंभाभाव एव वाच्यः अं करणप्रतियोगिसंशयविपर्ययसत्त्वेपि अभावानिश्चयात् अपि नाभावादेः संशय
विपर्ययोर्मानसप्रसिद्धाववेति तेन तदन्योन्याभावग्रहे प्रतियोग्यप्रसिध्या तदन्याभावसंभवरूपपास्तं । न सुरभी
यत्वादिविशेषणस्यावश्यकत्वात् दप्रसिद्धेः अन्यथा मानसप्रत्यक्षस्य सत्त्वेपि शंखे तद्भावप्रसङ्गः सुषानज
तीयेनेति दिक् । म[illegible]नीति न चैवमनुरूपपरमाणावभिहतत्वाभावप्रत्यक्षापत्तिः स्पष्टत्वादुक्तानुपलंभविषयत्वे
८।२ नैवाभावस्य योग्यत्वात् अत एव घटे दो मनस्त्वापत्त्या बोधाभावादौ रूपवदन्योन्याभावापि प्रत्यक्षस्य एव वोतिवदीतिः
एवामिति । ननु ध्वंसे [illegible] व्यापारत्वेन तत्राकरणत्वात् कथमेवं न वस्तुतः ध्वंस एव व्यापारः प्रागभावप्रत्य

॥४ क्षेत्रव्याप्यगतेः नचन्नाहृद एवव्यापारस्यप्रतियोगितद्भावयोरेकत्राजनकत्वादितिचेन्न श्रोत्रमनःसंयोगस्यक
र्णव्यक्तिकुलीसंयोगस्यैवानथात्वादित्याहुः विशेषणतापीति यद्य भावे विशेषणतयान्यथासिद्धिस्ता
दारुप्यात्तत्रापि तथात्वमित्यर्थः नवेवेति अन्यथाविशेषणतापत्तेः कारणतापि स्यादिति भावः अन्यथेति तथा
यज्ञान्यत्वेन तस्य साधने यथाप्रामाण्यमुपाधिः तथा समवायिनात्राकत्वेनापीति भावः न च प्रागभावेषा
प्याप्तिः जन्यत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिति भावः अत्रेति अन्योन्याभावेऽप्यतात्ता
वेवेत्यर्थः घटत्वाभावादेरपि निषेध्ये यमपि द्रव्यगुणान्यान्यत्वादीनां जातित्वप्रसंगाद्वारि एव तथा
पि जातिसंकरेण घटत्वाभावादेर्जातित्वाभावो नेष्टसंगाल्लोकमात्रं जाति त्वे प्रयोजकं किंतु न त्वावल
म्बनं गौरवं च अभावात्मिकमिति भावः अतएव जातित्वानुपपत्तौ जातित्वापादनं अनुकूलं भवति
गायस्यतर्कं तु गुणत्वादित्यपास्तं समवेते ति न तु समवायिकारणनाशस्य कारणतासमवायक
न्यतानतरकल्प्यासिसमवायकल्पनमेव प्राथमिकमुपजीव्यं च गुणादिन्यायनाभावमपि विषयीकृत्यास ॥१२८॥

नभिमतोपजीव्यविरोधेनतत्रसमवायाभावकल्पनंप्रत्युततद्विरोधेनतत्रसमवायिनात्रानसमवे
तनात्राभावयत्वेतत्रभंगीकारेगौरवस्यप्रामाणिकत्वात् इति चेत्· अत्र वदंति अभावे समवायक
ल्पनं नोक्तकारणतायामुपजीव्यमभावमविषयीकृत्यगुणादिमात्रविषयीकारेण सिद्धे समवा
ये समवायिकारणतात्रास्यहेतुतावच्छेदकसंभवात् इदानीमभावबाधकानवतारेण तस्याभाव
विषयत्वात् तस्मात् धर्मबाधकानवतारात् अभावसाधारणसमवायानुमितावपि अनंतत्वमुक्तबा
धकावतारेण तस्य परित्याग इति· नन्वेवं गुणादिकमविषयीकृत्याभावमात्रविषयीकारेणापि सम
वायसिद्धिसंभवात् स्वरूपसंबंधिकारणतात्राप्येव कार्यतात्राहेतुर्न तु समवेतत्वात्रासमवायिना
त्रैः तथा च संबंधवैपरीत्यमेवास्त्विति चेदत्राहुः अभावस्वरूपाणामभावत्वेनानुगतानां स्वरूप
संबंधकल्पनानन्त्यमनुगतावयविगुणकर्मादीनामत एवाभावत्वेन तत्कल्पनोदन्योन्यात्यंताभा
वयोरपि स्वरूपसंबंधस्य क्लृप्तत्वेन लघुत्वात् स एव कल्प्यते न तु समवायः ध्वंसप्रागभावबाधका

वै॰ न॰ प्र॰॥११९॥

२१

केऽहं कल्प्यमानः स्वरूपसंबंधो ध्वंसत्वविशेषमादाय पर्यवसितभावत्वे सामान्ये पर्यवस्यति अन्यथोक्तबाध
कस्यात्यंताभाववादोऽसंभवेन तत्र समवायस्य कल्पनत्वापत्तेरिति नाद्यं भावत्वेन गुणकर्मादि
नामपि अनुगमसंभवात् अन्यथा समवायोऽपि किमवच्छेदेन कल्प्यः यदि गुणत्वावच्छेदेन प्रत्येकमेव
तदा स्वरूपसंबंधत्वमपि तथैव कल्प्यतां किंच सामान्यतयाघ [illegible] भावत्वे पर्यवसन्नं तदा प्रमेयत्वस्य ५४
चास्तु यदि च भावत्वे समवायनियमः कालाद्यंशेनैवान्यथासिद्धो गुरुणापि भावत्वेनैव स्वरूपसंबंध
त्वकल्पनं तदा भावांतरे तद्बाधकाभावाद्गुरुणापि ध्वंसत्वेनैव तत्कल्पनमास्थेयमिति तुल्यं तथा चात्यं
ताभाववादो समवायेऽदुर्वार एव अपि चैवं सामान्यतया वस्तुत्वाद्यवच्छेदेनैव समवायकल्पनात्
समवायिनाश्यत्वभावत्वमेव तत्र समस्तगौरवस्य प्रामाणिकत्वादिति आश्रयेति समवायीत्य
र्थः ननु यथा घटध्वंसकाले न घटप्रागभावोन्मज्जनं तस्य घटत्वेऽप्रागभावोत्पत्तिविरोधित्वात्तथा ध्वं
सोऽपि घटतद्ध्वंसानयविरोधीति न घटोन्मज्जनापत्तिरित्यत आह स्वध्वंसेति न च ध्वंसापत्तिः तत्रापि ॥११९॥

घटोध्वस्त इत्यनुभवात् आद्यादिध्वंसस्य तदा नष्टत्वेन तदविषयत्वादिति भावः नष्टः प्रत्यय इति षष्ठेन
न्वेति तथा च विशेषणतान प्रत्यासत्तिरिति भावः ननु कारणत्वे सिद्धे करणत्वं कल्प्यं अन्वयव्य
तिरेकेण तु त्रयमिति तन्न हीति अनुविधानमेव त्रयमिति अन्यथेति अत एवेति इंद्रियहेतुत्वादित्यर्थः इ
ष्टलग्नेति नियतान्वयव्यतिरेकवतीत्यर्थः ननु घटाद्यभावग्रहस्य सामान्यत एव प्रतिबंधकत्वात् अभा
वानुपलब्धिर्न हेतुरित्यसंगतं न चाभावानुपलब्धिरपि योग्यताविशेषणतावच्छेदकप्रतियोगिया
द्रष्टुसाकल्यगतत्वेऽपि प्राथमिकभावग्रहे अभावग्राहकप्रतियोगिस्मरणाभावेन तदभावात् न साभा
वग्राहकेति वाच्यं एतावतापि व्यभिचारात् हेतुत्वं प्रासन्नत्वन्यथासिद्धेरिति प्रकृतग्रंथविरोधात् अत
एव प्रतियोगिसत्वप्रसंजितप्रतियोगिकानुपलब्धिर्हेतुर्व्याप्यानेन तादृशापादनस्थल एवाभावधीः
भावग्रहहेतुः प्राथमिकअभावस्य तदानीमनुपस्थितत्वेन तथाप्रसंजिताभावात् न साहेतुरित्यपा
स्तं प्रतिबंधकाभावत्वेनाभावानुपलब्धिमात्रस्य हेतुत्वे बाधकाभावाच्च अथ येन रूपेणाभावानुपल

नः कारणं तेनाभावानुपलंभोन्यथासिद्ध इत्यर्थः तथाहि घटतादात्म्यग्रहेपि न तद्वत्त्वं ताभावे तदाश्रयान्यो
न्याभावयोर्द्वयोरपि नग्रहः इति वस्तुगतिरेव चेन्न तदुभयग्रहे घटतादात्म्याग्रह इत्यपि तथा चाभावग्रहे आ
श्रयाभावानुपलंभो आह कोघटतादात्म्यस्य यत् तदुभयरूपग्राह्यविरहरूपत्वात् तद्यादितेनैव रूपेण तदु
भयाग्रहो घटतासत्त्वग्रहेपि कारणं तेदा घटान्योन्याभावग्रहे [illegible] स्यापि तत्र तादात्म्यापत्तेः अन्योन्या
भावस्य तदभावध्याभावात् न हि यथा तादात्म्य अन्योन्याभावाभावः तथान्योन्याभावोपि तदभावरूपः
ने घटाप्रतियोगित्वापातात् संसर्गाभावत्वापत्तेश्च यथानेष्टापत्तिस्तथा व्यतिरेकिणि वक्ष्यते एवं च सानु
पलब्धिमाविग्रहे ग्राह्याभावकानुपलब्धितया हेतुनत्वेभावावच्छिन्नाव ग्रहे आश्रयाभावानुपलंभत्वेनोतिता
दूप्यत्वेनान्यथासिद्धिरिति भेदः घटत्वात्यंताभाववानित्यग्रहेपि न तद्वत्त्वं तोभावाग्रहणाभावग्रहेपि क्लृ
प्तो वानुपलब्धित्वेना हेतुत्वात् एवमपीन्द्रियस्यादिविरोधात् तस्या एवमानत्वप्रसंगेन तस्य वज्रलेपाय
मानत्वाच्चेति वेदव्यवदंति भावानुपलब्धिर्न तु अभावानुपलब्धिः परेतु रविश्चो भावात् तथा करे ॥१२०॥

विरोधकारणतायामन्यथासिद्ध्यभिधानात् प्रमाणात् एवाक्षेपेणलक्ष्येवसमाधानोचितत्वात् न चैवं
परीत्यमेवास्त्विति वाच्यं अभावानुपलब्धेर्हि न भावग्रहमात्रे कारणं व्यभिचारात् घटाभावग्रहेपि घ
टादेर्निर्विकल्पकसत्त्वात् समानप्रकारकत्वेन ज्ञानयोर्विरोधात् किंच सविकल्पकमपि स्यादेव
घटाभावस्य क्वचिदधिकरणग्रहेपि निरधिकरणस्य प्रतीतेः तथा च तदधिकरणनिष्ठाभावग्रहे
तन्निष्ठाभावानुपलब्धेर्हेतुत्वाच्च न तु सामान्यतस्तथात्वं सामान्यतो इन्द्रियस्याप्रामाण्यकल्पनात्
हेतुरप्यनुपलब्धिर्न प्रमाणमन्यथासिद्धत्वात् अभावधीस्तु निरधिकरणाभावस्यैव नापि निर्विकल्प
कत्वमभावप्रत्यक्षत्वावच्छिन्नं प्रत्येवाभावानुपलब्धेः कारणत्वे च नाप्यन्यथासिद्धिरिति वयं तु ब्रू करण[illegible]
मः पृष्ठलग्नानहेतुर्द्व्याभिधानात् कारणतायामेवान्यथासिद्धिः प्रमाणमतान च ग्राह्याभावग्र
हस्य प्रतिबंधकत्वादवश्यं तदभावो हेतुरिति वाच्यं तन्मयस्यासिद्धेः न चैवं घटाभावग्रहेपि घटो
पलंभापत्तिः इदं हि घटाभाववति घटोपलंभापादनं घटवत्त्विति वा नाद्यः द्वितीयः घटेन्द्रियसंबंधाभावा

देवतदुपलंभासंभवात् तदिदमाह नहीन्द्रियार्थसन्निकर्षे सति नाविनाभावधीविलंब इति· नच
तद्धर्माप्रसिद्धिदोषाभावादेव तदसत्तया ह· नान्यः घटवति तदभावग्रहस्य भ्रमत्वनियमेन तज्जनक
दोषस्यैव तत्प्रतिबंधकत्वात् नच विनिगमनाविरहः दोषजातिबंधकत्वस्यावश्यकत्वात् अन्यथा
ऽभावग्रहकाल एव घटोपलंभापत्तिः नच प्रतिबंधकाभावस्य कार्यसहभूतस्यैव हेतुत्वात् नैवमिति
वाच्यं अभावग्रहजनकाधिकरणग्रहकाल एव तदुपलंभापत्तेः तस्मादावश्यकेन दोषेणैव प्रति
बंधकत्वमन्यथासिद्धं आवश्यकेनें [illegible] द्रियेण तदभावग्र [illegible] हाभानुपलंभोपि कुल्यमिति वेदितेन·
अभावप्रत्यक्षाध्ययनमुपगमेन तत्रेंद्रियेणान्यथासिद्धप्रभावात् तदिदमाह अभावेन च हेतुशब्दः आश्र
भावेनेति· तथा च घटभ्रमायामपि न घटाभावधीः नातीन्द्रियव्यतिरेकात् किंतु तथा तदुपलंभाभावाति
रेकादिति तस्यापि एव हेतुत्वे प्रमाणत्वं च नान्यथासिद्धत्वं तदिदमुक्तं तदुपलंभे तदभावाग्रहादिति· प
घपि घटवति तदभावग्रहस्य भ्रमत्वनियमेन तज्जनकदोषाभावादिविषयाभावबोधात् तदग्रहो न्यथा ॥१२१॥

सिद्धःसंभवतियथापिक्रियायाःकरणजन्यत्वनियमेनकारणांतरानुपपत्तेस्तस्याएवतत्करणत्वंकल्प्यतेनन्वेवम
प्यसिद्धमितिचेन्नोक्तयुक्त्युपष्टंभेनपरस्यैवमेवसिद्धांताद्व॰गंगेशस्ययतएवमामस्त्वितियाद्व॰एवंयथाश्रुतेन
ग्रंथेस्वस्वकरणतायामन्यथासिद्धिरितिकुत्रस्थ्याव्याख्यानंकिमर्थमितितन्नविघ्नःआनविशेषणमितिर्ध्वंसासि
तमित्यर्थःनन्वयोग्यत्वादेवनेंद्रियग्रहणमत्यतआहेंद्रियस्येति॰करणव्यापारविषयत्वेनकर्मत्वादितिभावः॰कि
चेतिरूपादावींद्रियग्राह्यत्वमुक्तयत्रादिसिद्धम्अत्रतुनतथेतिभावः॰नन्वदृष्टांतेदोषत्वकर्मसमत्वमत्रआह
संबंधस्येतिव्याप्तिपुरस्कारात्प्रसत्त्यर्थःनन्वयादिनस्वरूपसंबंधस्तदानसंबंधीविनातदधिकरणत्वादो
वात्अधिकरणग्रहेवस्वरूपस्यामित्यपिविरुद्धमितिचेन्नयद्विशेषणकमभावज्ञानंतज्ज्ञानमेवाधिक
धं॰२ रणज्ञानंतद्विशेषणत्वेचसंबंधीयेनैवकश्चितत्वस्यरूपसंबंधबाह्यत्वाद्यायाहयद्वाएवतदस्यरसादाहस्वरू
पेति॰नक्ष्मपगमेपिनतस्यहेतुत्वमित्यर्थःएतेनेति॰अभावग्रहस्येतिशेषःआप्तिविनेतितथायावच्छेद
कत्वयापरंपराप्रयोजकतयाबोधकर्थंविशेषुरूपप्रयोगेनहुपलंभसाकल्यरूपायोग्यतासिद्धत्वेवेतिभावः

122

अन्यथेति अधिकरणज्ञानमात्रस्याज्ञातिसंभवादितिभावः लिंगेनेति स्वमते लगादिनेति परमते आदिपदग्रा
ह्यं चक्षुरादिमादिपदग्राह्यप्राणाद्य त्रिप्रायेणोक्तमिति बोध्यं तत एवेति तथा च नष्टर्थोकान्योन्याश्रयस्त्वयं
परोक्षत्वयति नच ज्ञानपदमफलं विरोधस्फोरणमात्रार्थत्वात् एवमिति यद्यपीत्यादिग्रंथोपि परास्तत्वोक्ता
वज्ञानकरणकत्वेनेष्टसिद्धेरत्रावधियम्तदुपपादनमफलं तथाप्येवममीष्टासिद्ध्यविरोधात्तन्न दोषः अ
ज्ञातकरणकेति स्यादितिभावः अज्ञातेति अज्ञातकरणकानुभवत्वादित्यर्थः नचेति इंद्रियत्वेन न ज
न्यत्वमित्यर्थः तेन मनोजन्यतया न साधनव्यापकत्वमितिभावः तत एवेति तथा च साधनव्यापकइति
भावः ननु तत एवेत्यत्र तत्पदं यद्यज्ञातकरणकत्वपरं तदा साक्षात्कारित्वसाधनवैयर्थ्यं तेन साधनाय त्वें
द्रियजन्यत्वस्य च तस्य नास्ति सिद्धिः पूर्वमेवासिद्धेः तत्रापि साक्षात्कारित्वस्योपाधित्वात् यदि साक्षात्का
रित्वपरं तदा अन्योन्याश्रयस्तत्र साक्षात्कारित्वासिद्धौ हि तत्रोपाधित्वज्ञानं विरहस्तेनेंद्रियजन्यत्वे
साधिते तस्य साधनव्यापकत्वात् तस्मिन् सत्यज्ञातकरणकत्वेन साक्षात्कारित्वासिद्धिरिति मैवं ॥१२२॥

अत्रांतःकरणत्वे यदींद्रियजन्यत्वव्याप्यत्वसंदेहः साक्षात्कारित्वस्य च तर्केणानिश्चयस्तदा तेन साक्षात्का
रित्वमनुमाय तस्मादिंद्रियजन्यत्वमनुमेयमित्याशयात् नचात्रेंद्रियजन्यत्वसंदेहात्कथं तेन साक्षा
त्कारित्वानुमानमिति वाच्यं इतोः साध्यव्याप्यत्वनिर्णये तद्व्यापकत्वेन तस्य साध्याव्यापकत्व नि
र्णयादित्याहुः गोत्ववादिति नन्वत्र कथमत्र गोत्वस्य लिंगस्य चेंद्रियाजन्यत्वस्याभावघटितत्वादिति चेन्न स्मृ
तिभिन्नपरोक्षे तत्प्रयोजकं ▪ रोक्षमात्रे वा आद्यगोत्ववादितिस्मृतौ तत्प्रयोजकमन्यत्केवलमिदं तु
न्यसाधारणमिति लाघवमित्यर्थः अंत्ये स्मृतावितिरित्यर्थादित्यन्ये एतदस्वरसादाह स्मृताविती
त्यपरे बाध्येति ज्ञानपदमलौकिकप्रत्यासत्यजन्यानुतत्वपरं अतो न स्मृत्युपनीतज्ञानमादाय न दो
षः बाध्यपदं च ज्ञाना ज्ञानादिज्ञाने व्यभिचारवारणाय बाध्यत्वस्याभावविशेषणतया नाभावपदवै
यर्थ्यं नित्यानावलिंगकानुमितिर्व्यभिचारः तच्च तज्ज्ञानत्वस्यैव मानत्वेन साध्यसत्त्वात् जन्यत्वमपि
विशेषणमतो नेश्वरज्ञाने व्यभिचारः अन्यथा प्रमित्यावयवत्वाप्रत्यायतेति न प्रमान इति पद्यध्यत्मात्र पदं संके

तद्ग्राहकोपमानसत्वान्नैनतथापिसिद्धसाधनतीयामानांतराघट्टितिपूर्वकंग्रहणमत्रविवक्षितमित्यर्थं
123 व्यभिचारोबाधश्चेत्याहुः नचेतिनतुवस्तुशब्दैःलिंगतयाऽज्ञातग्राहकत्वादर्थांतरं नचतद्ज्ञानंग्राहकं
नतुवदतिवाचकंदृष्टांतासिद्धिप्रसंगाद्वःतन्मतेनचापिग्राह्यज्ञानस्यैवतथात्वादितिभावःमुक्तंयत्रग्रा
हकपदेनलिंगज्ञानेनग्राहकत्वस्यविवक्षितत्वादित्याहुः हेतोग्राहकपदंग्रहणकरणपरंएवंचविष
यतयास्वग्राहकत्वाद्दिर्धूमत्वादौनव्यभिचारःशब्दपदंचैतज्जातिपदव्यावर्त्यमाहस्वपमानत्वंवातिरा
स्यसादृश्यज्ञानत्वोपाधिरूपत्वमित्यर्थः यद्यपिशब्दत्वस्यजातित्वाज्ञावाचात्रनायंप्रकारस्तथापि
तत्रप्रकारांतरमनुसंधेयमितिभावः अज्ञायमानेतियद्यप्युपनयात्तत्रप्रमापिसंभवतितथापितादि
शोधकप्रमाणसंभवतीतिशब्दोऽक्षेंद्रियसन्निकर्षस्यहेतुत्वादितिभावः त्वन्मयसूतिममनुतचापि
अनुमानस्वीकारेणकार्यत्वेजातित्वेनवतस्याचानुपजेश्च स्वीकारात्कव्यभिचारइतितावश्च व्यभि
चारस्त्वानतिरमाहवाध्याद्यावितिःआत्मेतिःमांदिरोदरइत्यादिवाक्यैतज्ज्ञापकंयथानथाज्ञनारत्नी॥१२३॥

त्यर्थः अपसिद्धान्तादिति नार्थान्तरस्य दोषः किंतु स्ववपरात्मकप्रमाव्याघातेन वादिदोषः तथा च योग्योपलंभादि वा०
नामनुपलब्धिमानीतिरस्यादेव बाधकाभावात् अतो दोषांतरमाह योग्यत्वेपीति मानांतरेणेति घटाभावादि
ग्राहकेण विरोधः अन्यथोपलब्धेरनुपलब्धेस्त्वयोग्यानुपलब्धिग्राहकत्वस्वीकारेणाविरोधापत्तेः अपसिद्धांतप
रिहर्तुमाह यथेति ज्ञातताधर्मतया योग्ये वेति तदभावो योग्यानुपलब्धिग्राह्य इति भावः प्रतियोगिग्राहकेंद्रिय
जन्याधिकरणग्रहाभावे ज्ञातताविरहोपि न च नानुपलब्धिग्राह्य इत्याह वायावादाविति प्रत्यक्षत्वस्वरूप
सदनुपलब्धिग्राह्यत्वे तथा चोक्तव्यभिचारः स्फुट इति भावः ननु व्यवहारसामान्याभावो लिंगमुपेक्षा
ज्ञानादिस्थले व्यभिचारि किंचिद्व्यवहारस्याभावाद्व्यभिचार इत्याशंक्य निराकरोति न चेति यद्वा तोपि न तस्य
लिंगत्वमित्याह न चेति न चैवमपि ज्ञातताविरहग्राहकतयैवानुपलब्धिर्मानीतरस्यादित्यनुशयेना
ह भिवेति न चमस्येत्यादि प्रागुक्तयुक्तेः एकतरसहचरितत्वं प्रतियोगिग्राहकेंद्रियविरहादेव तत्र
विलंबः व्याप्यता येन तस्य हेतुत्वासिद्धेः विनिगमनाविरहाच्च लक्ष्यत्वे राह किंचेति नन्विदमयुक्तरूपा

१२४ त्वाबोधायुक्तेरिति प्रागुक्तानुमानसंभवादित्यत आह यदि चेति नाचेदमप्ययुक्तं घटवति घटाभावधीरनुमि
तिस्तत्र दोषाभावादेवाभावग्रहो न त्विन्द्रियाभावात् किंचालौकिकविषयजन्यतामात्रे योग्यप्रत्यक्षत्वं अप्रमानुमि
त्यादौ व्यभिचारात् किन्तु विषयतया तज्जन्यत्वेनास्य च प्रतिबन्धकाभावत्वेन हेतुमत्त्वं नचैवं घटस्य ज्ञाति ते २
लम्बकत्वे भावग्रहानुपपत्तिः दोषस्योत्तेजकत्वसंभवात् अपि च विषयाजन्यत्वाविशेषेपि यथा करणाभे
दादनुमित्यादिफलभेदः तज्जन्यताविशेषेप्यनुपलब्धीन्द्रियकरणभेदात् फलभेदो स्यादिति चेन्मैवं अनुपल
ब्धेः कारणत्वे मानाभावात् तदुपलम्भे तदभावग्रह इत्यपूर्वोक्तन्यायेनान्यथासिद्धेः न च सन्निकर्षाभावे
नेन्द्रियस्याभावाश्रयकरणान्तरानुपपत्त्यैव तस्याः करणत्वमिति वाच्यं एवं हि अधिकरणज्ञानादेरेव किन्न
न कल्प्यते विनिगमकाभावात् तथा चानुपलब्धिन्यायेन पूर्वं तस्या हेतुत्वमप्यसिद्धमिति तदेव का
रणत्वं करणत्वं च कल्प्यमेवं चोभयसिद्धकारणतावत् तत्रैव करणत्वमात्रं कल्प्यनमुचितं भावत्वेन तद
पेक्षया लघुत्वाच्च निर्व्यापारत्वान्न तथात्वमिति अनुपलब्धावपि तुल्यं तस्मादभावग्रहे इन्द्रियमेव प्रमाणं ॥१२४॥

यादिंद्रियादेवात्मावच्छेदकत्वोपपत्तौ नानुपलब्धिमानमिति तर्कं कल्प्यते गौरवात् अनुमित्यादिवत्साक्षात्कारविनावी
नुः यत्प्रमा व्यवसायात्माव्यवच्छिन्नं च अद्यापि तावान्न तथोक्तलाघवादिनोवक्ष्यमाणत्वेकृत्स्नं तदुपपादकत्वे नैवतेजेवचे
त्रोपपत्ताकल्पनात् अन्यथा संबंधाभावेमानांतरादप्यभावधीनस्यात् अतएवपरस्याभावे चक्षुषोरू
पसंबंधाभावरूपमथबाधादोषाघाताभावप्रतीतेरलौकिकत्वेनेंद्रियजन्यत्वेतत्रापिनकल्पनाच्च अतएवगाङ्गा
स्तिनास्त्वपिअनुमा नेनैवान्यथासिद्धिरितिचवर्णपत्र्याम ॥ अभावत्वेव्यस्यविवरणस्यरूपसंबाति
अथवितिस्मरणाभावेननयोग्यत्वविशेषणं तेननोक्तदोषइत्याहुः यथैवनित्यवेतियद्यपिनायमभावविपर्य
यः तथापिअभावेतिसंशयमात्रान्वितं तथाचाभावसंशयः मेत्रविपर्ययोभ्यनस्यात् सर्वत्रैतदभावनिर्णया
दं दिसेवपूर्वपक्षिकार्थः अभावपत्रैचपरमेव तस्यस्वाभावाभावत्वात् मात्वाय मेत्रसंशयविपर्ययाभावड
संगदूत्येवत्तदर्थइत्याहुः कस्कतस्त्वस्यग्राहकत्वप्रमापकत्वेऽभाव संशयादिनस्यात् इतितदर्थेदं न
वातिचकदाचित्तत्रास्तीत्वमेत्राभावइतिपर्यायइत्येवतदर्थः ज्ञानाभातिएतद्योपलक्षणं ज्ञानातीद्रियत्वेज्ञा

125 न ज्ञानेऽनुमितौ सिध्यति तत्र तु तदेवावच्छेदककालव्यवहारासिद्धिरिति अपि बोध्यं॰ लिंगेति यद्यपि गौ लिंगेन सांज्ञा
यकं तस्य निश्चायकत्वात् तथापि न तत्संज्ञायां विशेषाद्दर्शनान्मानस एव संज्ञायां बोध्यः एकेति पूर्वं गेहा
देरनुभवकालेन तेन सहैकज्ञानविषयतायोग्यस्येत्यर्थः तुल्यपरिमाणेति यत्रांधकारादिना तद्गतोपि ल
घुत्वाद्यननुभवात् तद्गतत्वेनास्मर्यमाणत्वे न व्यभिचारवारणाय तत्तुल्यपरिमाणत्वादि विशेषणं अंध
कारसत्वे तत्तुल्यपरिमाणादेरप्यननुभवो न स्यादिति तत्कालीनो मे ज्ञाना वस्तु ? साध्यते त
त्कालीनत्वेनातुल्यपरिमाणादियोगितया स्मर्यमाणत्वेपीत्यर्थः तेनोत्तरकालीन तत्तुल्यपरिमाणवत्त्वानु म ५
भवमादाय न दोषः नादेवस्थानं न्यवमप्रियवैकदेशेऽन्धकारान्मे ज्ञानमनुभवः अदेशांतरवत् दृष्टतुल्यपरिमाण मा ४
वत्ता नुमेयवत्त्वहेतुसत्वाद्व्यभिचाराद्धारोद्धारिरि एवंचान्यथानुभवेपि तत्तुल्यपरिमाणवत्त्वाशाएवपत्र
पु२ संस्कारोस्यादस्याद्बोधोवानतुमेत्र वत्तांशोपि तथापि व्यभिचारइति मेदयाकुः नतुल्यपरिमाणादिपदे
न तथात्वेनोर्जावित्वग्रहितो यथात्वेन तत्तज्ज्ञायमानतस्तवेसोपिग्रहात एव ततत्स्मिन्नस्मर्यमाणोसौ ।।१२५।।

प्यवक्तुं स्मर्यत एवं चोक्तस्थलद्वये हेत्वसत्वालोकव्यभिचारः अदृष्टकार्यिकात्मविषयेणोक्तं सर्वत्र प्रागुक्तास्ति
तास्थले तादृश्याव स्थैतरग्रहणासंगत्वाहः सर्वसाधारणं चानुमानांतरं श्रुतिपुराणेत्यादिनास्याविवेत हेत्वयोगस्य
तदुक्तं तदा मे घाता पवक्त तदामे चेतना प्येतरसकलतद्रूपलक्षकसमवाहितत्वे सति स्वगोचरानुभवजन्य
स्मरणविषयतावत्वं यत्नावानियमवन्मे चाविषयकतत्कालीनानुभवजन्यस्मरणविषयत्वाहः न च न दवक्तुं
शक्यानियमवत्वमेवादेः कार्यनिश्चयमिति वाच्यं आद्यमातिव्याप्यप्रयोजककार्यविषयविशेषमहात्म्यादिनाविच्छ
नाथ प्रातिमाहृ रिवतन्निश्चयसंगत्वाहः यथा चाहुः कश्चिद्विषयविशेषएवनादृशोयोग्यघट्टि नयाच्छनु
स रूपत्वेनास्मिन्स्मर्यमाणे अवक्त्रयं स्मर्यत एवेति· अन्ये तु मया येच्च कत्वेना स्मर्यमाणत्वादिति हेतु दृष्टव्यभि
न तत्तुल्यपरिमाणावत्तेयाः स्मर्यमाणेऽहेतुरयंनास्त्वात्सिद्धे त्व मावाद स्मरणं पृथक् प्रमाणं न प्रसज्यते यस्मै
तिव्वविशेषणाधस्यनेमत्रेतादृशादरभत्ययस्तत्र संस्कारानुत्पादविलोपादिसंभवाहः असमरणासंभ
वे व्याप्तिकाले मत्संगतिपस्य चानुभवे सति परस्मरणाविषयस्तद्वा यास्मर्यमाणत्वस्याव्याप्तिवा

रन्यथासिद्धत्वकं नन्वयोग्याभावग्रहस्यानुमित्यादौ सामान्यतएव प्रतिबंधकत्वकल्पनान्न दनाव ४
रासनत्वे कोपि कस्यापि नाहं शौक्ल्यप्रतीतिमयत्वकं विशेषणं तत्स्वचनायैव तत्तुल्यपरिमाणस्याविशेषणामि
त्येवेति एतावतानानुपलब्धिमनितरां किंचिंद्रियसहकारिणीति स्फुटं नन्वेवं तस्याः सहकारित्वमपि
कथं घटप्रमायां अभावानुपलंभस्याविषयाभावेनेंद्रियसन्निकर्षाभावेनस्यापपत्तेः दोषाभावेन तद्भ्रमस्या
प्यसंभवात् घटत्वमेव तज्जनकदोषस्यैव प्रतिबंधकतया तदनुपपत्तेः अतएव नाथ अहं त्वभावानुपलब्धि
स्यापि तथैव हेतुत्वकल्पनात् अतापि तद्धेतुत्वमिति चेन्न पीतसानुमितावपि पीतः शंखइत्यादिप्रत्य
क्षोत्पादनात् तथात्वात् तथा योग्याभावप्रत्यक्षाभावत्वेन प्रत्यक्षहेतुत्वमक्लृप्तमेव कल्प्यंत त्वयोक्तदोष
शांतिः एतेनासंसर्गाग्रहस्यापि विशिष्टज्ञानमात्रे हेतुत्वकल्पना पर्यवसन्नाया अनुपलब्धेरपि हेतुत्वमि
त्यपास्तं आनुमानिकपीततासंसर्गाग्रहेपि पीतप्रत्यक्षोत्पादेन सामान्यतस्तद्कल्पनात् इदं चेत
अस्तु नाम एवं तथापि अभावप्रत्यक्षे प्रतियोगिसत्वविरोध्यनुपलब्धित्वेनावश्यहेतुत्वं अन्य
था चक्षुः संयुक्ते पृथिवीपरमाणौ जलत्वाभावग्रहप्रसंगात् भावग्रहे हेत्वाभावोनुपलब्धेः प्रमेय ॥१२६॥
नु द

णादिस्खलितं दण्डाद्याश्रयत्वाद्वाऽव्याप्तिवारणाय पूर्वोक्तियुक्तेस्तु कथं हेतुत्वमिति शंकते नन्वत्र विशेषणतेति
समवायाभावाद्यतीदिय इति भावः अतिरिक्तेति लघ्वितिशेषः अभ्युपगमेवाप्यविसितीति वादे नेति भावः अ
धिकमिति घटवत्यतिप्रसंगस्तदवस्थ एवेति भावः दोषांतरमाह नन्विति अभावभूतलयोरिति शेषः के
वलभूतलस्य न दालंबनत्वदोषांतरमाह नेति घटवदिति न च भूतलमात्रबुद्धिः सेति वाच्यं भावाभावस्या
भावत्वादिति भावः ननु प्रतियद्यपि सव्यवहारो न भूतलस्य किंतु घटभूतलयोरित्यपि परे साक्षुर्यवीन
५२ थापि घटाद्रौ व्यवहाराभावे भूतलस्य व्यवहारलक्षवादसन स्यादिति भावः ननोपीति घटभूतलेंद्रि
यसन्निकर्षजज्ञानादपीत्यर्थः तथा च तदपि भूतलज्ञानमभावः स्यादिति भावः उक्ते निघटाविष
येत्यत्र नत्रयथस्याभावत्वादिति भावः यद्यपि तत्र तज्जातियोग्यविषयाधिकरणबुद्धिरेव नत्रयथ इति
नाभावाभ्युपगमदोषस्तथापि तत्र तत्रापि पर्यनुयोगे तदभ्युपगमे न वस्त्वेकेति भावः अवद्रास्ये
ति घटप्रक्षसपायाज्ञानेष्यक्ति [illegible] घायाः [illegible] स्थिलापासनेव्यवहारोऽधिकस्यावधे

हृ

ज्ञानिहेतु ष्टमेव तथापि तादृशरूपप्रवृत्तिनिमित्तस्याप्यवधिगतत्वस्य व्यवहर्तव्यतयाऽवधेरपि व्य
वहर्तव्यत्वादिति भावः मात्रपदमुपलक्षणं तदुमात्रव्यवच्छेदार्थं तदेतिय यापिस्मरणाभावप्रयोजकत्वेनाधि
पि३ कारस्यतिति तदभिधानमयुक्तं तथा संस्कारोद्बोधकसहकारादर्शनाद्यभावप्रयोजकतया परंपरया प्रयो
जकत्वमस्तित्वनदुष्टमिति भ्रमं नव्यं ननु तत्र कंटकाभावो मास्तु कंटकाभावाभावो ज्ञातस्त्यापिनतेऽऽते
तस्यापि बुद्धिरूपत्वात्तद्भावे बाधे धःकुतस्तस्य कंटकसाध्यत्वात् तस्य च कंटकाभावाभावादन्यत्वादि
त्यरुचेराह नि ज्ञ नि ह्रति ननु तत्रापि कंटकादिबुद्धिसंतयस्त्य स्वरसादाह किंचेति नच यदि तं तव पक्षेऽऽभा
ममतु घटाभावाभावो बुध्यं तरमिति नो क्तदोषइति यदि ब्रूयात्तदा दोषांतरमाह यदिचेति अन्योन्यतिअ
भावज्ञाने सति ततस्ताध्यवहारासिद्धिरुक्तासिद्धो व तद नुपपत्त्याऽभावज्ञानमित्यर्थः नच घटाकाशादेर
ध्यक्षत्वात्तदभावस्य केवलान्वयिनोऽव्यापकमप्रतियोगिमद्धिकरणस्याप्रसिद्धातदभावाप्रसि
द्धिरित्यस्वरसादाह यस्कतद्रति अत्यंताभावेऽवृत्तिप्रतियोगिके न चेवं घटवतिघटत्वज्ञाने कत
लज्ञानप्रभावःस्यादिति क्तदोषापत्तिः नचान्योन्याभावो नास्त्येवअभावव्यवहारापादनं विष्टमेवे ॥१२७॥

तिवाच्यं तद्व्यवहारस्य संवादापत्तेः न च बाधितत्वेन विसंवादित्वमिति वाच्यं तादृशबुद्धेरेव तद्व्यवहारविष
यतया तत्र तत्त्वेऽबाधितत्वात् संभवात् इत्यत आह व्यधिकरणेति निरधिकरणेत्यर्थः साधिकरणघटादेर्घटा
वच्छेद्यव्यवहारे च घटत्वतो न्यूनवृत्तिस्येत्यादिकमेव तत्रेति नोक्तदोष इति भावः अत्र च प्रतियोगिमत्त्वाविषयक
तद्ग्राहित्वे तदभावापत्तिर्न दोषः तदभावस्य केवलान्वयित्वेनेष्टापत्तेः अभावमात्रव्यवहारस्य चाननुगमस्यादो
एवं षत्वात् अत आह समानाधिकरणेति प्रतियोगिसमानाधिकरणेत्यर्थः नचैवं न्यूनवृत्तिमात्रबुद्धिर्नाभावज्ञा
नकारणमित्यर्थः न च भावप्रत्यक्षे तदधिकरणन्यूनवृत्तिबुद्धेः कारणत्वं प्रतियोगिसत्त्वे च प्रागुक्तास्थिताधी
र्नप्रत्यक्षात् तदसन्निकर्षादित्यरुचेराह केवलेति उपलक्षणमिति यदि शोधवाक्यज्ञानस्याभावो न विषयस्तदा घट
वति न्यूनवृत्तिमात्रबुद्धेरभावाधिकरणबुद्धेश्च विषयकृतो न कश्चिद्विशेषः प्रतिपादित इत्यर्थ इत्यारुचेः
प्रागितियथापि न्यूनवृत्त्यायेनेदमयुक्तं तथापि न्यूनत्वविशेष्यकं उपनीताभावविशेषणकं च प्रत्यक्षम
स्ति प्रत्येतदुक्तमित्याह बुध्याश्चेति घटवद्भूतलबुद्धितद्भिन्नबुध्याश्चेत्यर्थः नान्योन्येति यदि तादृशान्
त्वं तदन्योन्याभाववत्त्वं तदा घटान्योन्याभावेपि स्वप्रतियोगिभिन्नत्वं तदवगाह्यं एवं च तेनैव परिहारस्य तद्वृत्ति

१२४ दासाश्रयः अन्योन्याभावातिरेणचेत्तदा तत्तदाश्रयमेवेत्यनवस्थेत्यर्थः अत एवेति अनतिप्रसंगादेवे
त्यर्थः नेवात्रेति भूतलमात्रविषयघटवद्भूतलबुद्धितद्भिन्नभूतलबुद्ध्योरितिशेषः नहीति अर्थं विनाप्य
नुमितः सत्वेऽरितिभावः धारेति एतद्बुद्धेः प्रतियोगिमद्भिन्नत्वानवगाहित्वपक्षे बोध्यं तद्भिन्नत्वप्रकारक
त्वोपगमेवाधर्मेदं एवं अत एव अग्रिमग्रंथोपि तथैवयुक्तं वतथा न हि विषयान्तरे सामग्री तेदृशयुक्तो ज्ञा
नव्यक्तिभेदो धारावाहिकबुद्धिगम्यवहारभेदप्रयोजकं इति ननु घटाभावव्यवहारे प्रतियोगिमत्वमाधि
करणविशेषणं ननु ज्ञानविशेषणमित्यत्र एवं विबुध्यं तत्वविग्रुसरित्यस्वरसादाह यद्वेति नचाधाराधेय
भावानुपपत्तिर्घटाभावे पटाभाववदुपपत्तेः नन्वाकाशाभावादौ प्रतियोगिमदधिकरणाप्रसिद्धिरिति चे
न्न तदनभ्युपगमात् तेनास्योक्तत्वादित्यके आकाशादेरभावानभ्युपगमेयप्रतियोप्रतियोगिकभिन्नाधि ॥१४
करणनिष्ठसंबंधः उक्तस्यार्थोद्रष्टव्यः अस्ति चाकाशप्रतियोगिकभिन्नः स्वनिष्ठः संबंधो ननु घटप्रति
योगिकभिन्नो घटवत्तिसंबंधस्य घटप्रतियोगिकत्वादित्यके वक्तव्यो घटाघभावस्थल एवोक्तलाघवात्
भावास्त्यभिप्रायेण कल्पांतरमितिदं निरधिकरणाभावव्यवहारेवस्वकिंच्य एवंल्य इति भेदस्यो तिन त्वन्योन्या॥१२८॥
के

ज्ञानत्वं कृत्युक्तेरिति भावः स्वरूपस्य भेदत्वे संवादमाह तादात्म्येनेति घटपटयोः स्वरूपस्य भेदत्वमपि भवति
दात्म्यत्वेनाप्रतीयमानत्वेऽपि प्रतीयमानत्वमित्यर्थः अत्र स्वापेक्षयापि स्वस्य स्वरूपभेदत्वं स्यादत उक्तं स
त्यन्तेऽप्रतीयमानतादात्म्याश्रयस्य स्वस्यापि स्वात्मत्वेनाप्रतीयमानत्वसंभवाद्युक्तदोषतादवस्थ्यमत उक्तं प्रती
यमानत्वमिति तदाश्रयस्य स्वात्मत्वेन प्रतीयमानत्वमिति नोक्तदोषतादवस्थ्यं अप्रतीयमानत्वं अप्रमी
यमाणत्वं तेन रजतत्वादप्रतीयमानत्वेऽप्युक्तेनाव्याप्तिः ईश्वरज्ञानमादायाप्रतीयमानत्वासंभवात् प्रतीयमा
नत्वपदी वैयर्थ्यं न वापीत्यक्षन्यायाच्च स्वमतेऽप्रतीयमानत्वाभावेन भेदलक्षणं भेदे न वाऽप्रतीयमानत्वानिवर्चनात्ति
न्ताधिकरणस्येवाभावत्वमित्यन्योन्याभावभेदलक्षणव्यतिरिक्ताभावमतेऽवनत्संनिवर्तते ... विवक्षितमित्या सू॰ ५
मितिघटवत्तादात्म्येनाप्रतीयमानत्वादित्यर्थः ममापी
कुःसमयत्वेदन तत्रैव तद्भेदत्वादित्यत्याह ... मितिघटवत्तादात्म्येनाप्रतीयमानत्वादित्यर्थः ममापी
त्यपलक्षणसुमयत्वेदपि द्रष्टव्यं ... इति न तु त्वदपि स्वरूपमेवेति कथं तदनिश्चयः एवं घटाभावेप्य
टोऽस्ति न वेति संशये यस्त्वथ यथा तथा ममापीति प्रतिलंदो तात्पर्यं हि अभावेपीति अतिरिक्ताभावेपीत्यर्थः
अभावत्वेति स्ववृत्तित्ववत्स्ववृत्तित्वे नित्यस्यापि केवलान्वयित्वे ... त्यात्राह पक्षसामान्यपदं जाति

129

परंतवचस्यवृत्तिविरहितिवासंतवप्रतिबोध्यं॰ अतएवोपाधौस्वरूपनिवृत्तिविरहेपिनदोषइत्याद्यायेनत्वांकेतेनचेति
अन्यथातत्राव्यक्रमदोषापत्तेरितिभावःआधाराधेययोरितितथाचाननुगमइतिभावःअभावाभावस्येतिपाद
वनत्राभावव्यवहारोभावत्वेनेवेतितदव्याप्तिनिरासःअतिरिक्तस्यानभ्युपगमात्तदाऽननुगमादेवाभावव्य
वहारइतिभावःसप्रतियोगित्वेतन्निरूपणाधीननिरूपणत्वंपरकीयत्वंपरविशिष्टत्वमितिभेदःसत्ता
त्य भूत्यस्यैवार्थंविशिष्यासाध्यमनुद्धरतिसत्तात्वंतेतिद्रव्यत्वाद्यात्मेद्रव्यव्यक्तिवदभावत्वेनाव्यांततयासत्तात्वं
नाभावअत्यन्तैवानुगततयाऽनुगमइत्यर्थःसत्तायामेवगतत्वादितिदोषसत्वेवदोषांतरमाहाभावप्रतितत्वे
वेतिआत्माश्रयादितिभावःएतच्चापाततःवस्तुतस्तद्ज्ञानेनप्रतियोगिनिरपेक्षंनवानिर्विकल्पकमिति
